अथ रुद्रकेरलद्रुमसारंभ:

॥ ॐ नमः श्रीगणेशाय ॥ ॐ नमो भगवत्येमहासरस्वत्ये ॥ ॐ नमः शिवायादिगुरवे ॥ ॥ सिद्धिबुद्धिप्रदातारं विघ्यूह
विदारणं । महागणपतिं वंदे लक्ष्मीविघ्नादिभिर्वृतं ॥ १ ॥ श्रीनृसिंहरमानाथं स्मरंश्चिदानंदविग्रहं विद्यासोपासितं वंदे भक्तक
ल्पमहारुहं ॥ २ ॥ सच्चिदानंदरूपाय शिवादेहार्द्धधारिणे नमश्चकारवाच्याय शिवायाभीष्टदायिने ॥ ३ ॥ अज्ञाननिकरध्वंसिसत्य
ज्ञानप्रकाशकं ॥ श्रीमद्गुरुपदांभोजं वंदे सर्वार्थसिद्धये ॥ ४ ॥ याज्ञवल्क्यमुनान्नत्वा कात्यायनमुनींस्तथा कर्कीदान्भाष्यकारां
श्चवेदभाष्यकृतस्तथा ॥ ५ ॥ श्रुतिरातथ्यवाक्यसूत्रवोधायनीयकं ॥ स्मृतिपाराशरंचैव धर्मान्न्यान्बहूंस्तथा ॥ ६ ॥ यद्यल्पोविविधा
अन्याः कृतादेवादिभिस्फुटा ॥ सारंतेषांसमुद्धृत्यनिजबुध्याविमृश्यच ॥ ७ ॥ धीमतानंतदेवेनतदेवेनश्रीमदुद्धवसूनुना ॥ रुद्रकल्पद्रुमा
ख्योयंनिबंधस्तन्यतेमया ॥ ७ ॥ हेमाद्रार्द्धनिबंधास्कबहवःसंतियद्यपि ॥ तेभ्यस्त्वस्यविशेषायः यंरिदुतेस्तोवधार्य्यताम् ॥ ८ ॥
तत्रादौपरिभाषानिरूप्यते तत्रशक्तिवत्वंतावदधिकारितावच्छेदकं सराकुर्याद्धर्मकार्यमापद्यपिशक्तिर्नरइतिटोदरानंदेसप्त
र्षिस्मृतः श्रुतिस्मृत्युदितंकर्मनकुर्यादशक्तिः क्वचिदितिप्रयोगपारिजाते भगवतेश्वशक्तिश्वाधिकारिविशेषणं आरण्यानामर्थब्रु
वतांशक्तिःसहकारिणीतिन्यायात् तदभावेन्येनकारणायं यावन्न्यायात् माधवायेवोधायनोपि यथाकथंचिन्नित्योनिशक्तावं
स्यात्तुरूपतः येनकेनापिकार्याणिनेवनित्यानिलोपयेदिति यथाकथंचित्केनचिदंगेनहीनानीत्यर्थः ॥ येनकेनापिस्वतःपरतो
वेत्यर्थः नित्यानिनैमित्तिकानिप्रारब्धकाम्योपलक्षणं नैमित्तिकस्यापिअकरणेप्रत्यवायात् समाप्तेःशास्त्रार्थत्वेनप्रारब्धंका
म्यमपिनित्यायतइतिषाण्यन्यायात् आरंभान्नियमोदोषश्चासमाप्तोस्यात्सामान्यदर्शनाच्चेतिकात्यायनसूत्राच्च यत्तुकाम्ये
प्रतिनिधिर्नास्तिनित्येनैमित्तिकेवसइतितन्नारब्धकाम्यपरं अन्येनाप्यसंभवेनदोषः तदुक्तंमाधवीये अत्यंतरागयुक्तेरागराजचो
दनयाहिषु गुर्वग्निदेवकृत्येषुनित्यदानेनपापभागिति अत्रनित्यपदेननप्रारब्धकाम्यग्रहणं औपदेशिकनित्यग्रहणेनेवसि

द्धावातिदेशिकनित्यग्रहणेमानाभावात् उपवासोप्यधिकारिविशेषणं स्नानंसंध्यातर्पणादिजपहोमामरार्चनं उपवासवत्क
ताकार्यंसायंसंध्याकृतिर्विनेतिवाराहात् जलस्यापिनरश्नेषप्राशनाद्व्रतंजायते नित्यक्रियानिवर्त्तेतकाम्यंनैमित्तिकेस्मृ
हेतिकालिकापुराणाच्च यत्तुइक्षुगव्यःपयोमूलंफलंनांबुलभोषधं भक्षयित्वापिकुर्वीतस्नानदानादिकाक्रियाइति चतुर्विंश
तिमतेस्मृत्यर्थसारेच इक्ष्वादिपरिगणनंतदशक्तविषयं स्नानमप्यधिकारितावच्छेदकं तदुक्तंहेमाद्रौप्रचेतसा स्नातोधिका
रितावच्छेदकं तदुक्तं) भवतिदेवपित्र्येचकर्मणिपवित्राणांतथाजाप्येदानेचविधिचोदितइति पवित्राणिमंत्राः मंत्रःपवित्रमुच्य
तइतिनिरुक्तात् अग्नेयेस्नानानामपिसर्वेषांवारुणेनचमानवः कर्तुमर्हतिकर्माणिविधिवत्सर्वदाद्विजइति कृतप्रातःसंध्योपा
सनत्वमप्यधिकारितावच्छेदकं संध्याहीनाःशक्तिर्नित्यमनर्हाःसर्वकर्मणीतिछंदोगपरिशिष्टेकात्यायनोक्तेः प्रातःसंध्यांततःकृत्वा
संकल्पंबुधआचरेत् संध्याहीनोःशक्तिर्नित्यमनर्हःसर्वकर्मसु यदन्यत्कुरुतेकर्मनतस्यफलमश्नुतइतिसंवत्सरप्रदीपेरक्षोक्ते
श्च स्नानेहमाद्रौवाराहेपि स्नातःसम्यगाचांतःकृतसंध्यादिकक्रियः कामक्रोधविहीनश्चपाखंडस्पर्शवर्जितः जितेंद्रियःसत्य
वादीसर्वकर्मसुशस्यतइति कर्मांगस्नानेविशेषोमार्कंडेयपुराणे शिरस्नानस्तुकुर्वीतदेवपित्र्यमथापिवा प्राङ्मुखोदङ्मुखोवापि
श्मश्रुकर्मचकारयेदिति तत्रादौश्मश्रुकर्मततःशिरस्नानं अन्यथाःशक्तिवत्वापत्त्यासुनःस्नानापत्तेः तच्चस्नानंमंगलकृत्यादौतिला
मलकादिनोद्वर्त्यांगपूर्वकंवाकार्यं आद्यंतुरुद्रकारिकायांपरशरामेणोक्तं ततःस्वगृहमागत्यमंगलस्नानमाचरेत् सर्वौषधिगं
धचूर्णयुक्तैःकृष्णातिलामलैः उद्वर्त्योगानितैलेनचंपकादिसुगंधिना तैलेनमंगलस्नानं कुर्वीतिब्राह्मणैःसहेति अत्रसर्वशब्दस्यौषधिगं
धचूर्णशब्देनकर्मधारयः सर्वगंधास्तुनैदेनरत्ने कुंकुमागरुकर्पूरकस्तूरीचंदनंतथा जातीफलमितिप्रोक्ताःसर्वगंधाःसदाबुधै
रिति हेमाद्रौगारुडे कर्पूरंचंदनंदर्पः कुंकुमंचसमांशकं सर्वगंधइतिप्रोक्तंसमस्तसुरवल्लभमितिदर्पः कस्तूरी ब्राह्मणैः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सहोत्पन्नस्नेहवदशभिः पुत्रैर्भारंवहतिगर्दभात्यत्रगर्दभ्याभारवाहकत्वेनपुत्राणामिवब्राह्मणानांसाहित्यमात्रेभवनपुनस्तेषांस्नानेकर्तृत्वं
अंतर्तुनिर्णयसिंधौकात्यायनेनोक्तं मांगल्यंविधत्तेस्नानंवृद्धिपूर्वात्मवेषुच स्नेहमात्रसमायुक्तंप्रधान्हात्याक्तदिष्यतइति बृहन्नारदीये
शिरोभ्यंगावशिष्टेनतैलेनांगेनलेपयेदिति अहतयोरधरायोत्तरीययोः परिधानमप्यधिकारितावच्छेदके अधौतेकारूधौतेचपरिद ध्या
न्नवाससी अहतेतुपरिदध्यात्सर्वकर्मणिसंयतइति हेमाद्रौवासहोक्तेः पारस्करगृह्येपि अहतंवाससोधौतंवा ऊर्णोत्रेणाछादयीतपरिधा
स्याइत्यर्थोत्तरायांशसासाम्नेत्यंकंचेत्पूर्वस्योत्तरवर्गेणप्रछादयीतेति॥ ऊर्णोत्रेणारजकेनेत्यर्थः॥ अहतलक्षणमुक्तंस्मृतिरत्नावल्यांरेणु
कारिकायांनागरवाह्निकेचकात्यायनेन ईषद्धौतेनवंशवेतसदर्शयन्नधारितं। अहतंतद्विजानीयात्सर्वकर्मसुपावनमिति मदनपारि
जातेतुशातातपनाम्नेदमुदाहृतं ईषद्धौतमरजकादीनासकृद्धौतमिति नागरवाह्निकेव्याख्यानं कश्यपेनत्वन्यथोक्तं अहतंयत्रनि
र्मुक्तंवासःप्रोक्तंस्वयंभुवा शस्तंतन्मांगलिक्येषुतावत्कालंनसर्वदेति मदनपारिजातेतुसत्यनयानाम्नेदाहृतं मांगलिक्येविहो
वादि अत्रैवंव्यवस्था विवाहादिमंगलकर्मसुयंत्रनिर्मुक्तमेव हृतं शस्तंतन्मांगलिक्येषुतावत्कालमितिवदतातथैवतावत्का
लंतस्यशस्तत्वाभिधानात् अन्यत्रयज्ञादौ षड्हौतमिति नचयज्ञादिकमपिमांगलिक्यमेवेत्याशंकनीयं विवाहोत्सवादेरैहिकफलस्व
स्याभ्युदयस्यत्वमांगलिकत्वात् यज्ञादेस्तुधर्मरूपादृष्टफलदत्वेनमांगलिकत्वाभावात् क्षौमेवस्त्रेहृतेयत्रावेतिसूत्रेश्रीमद्भिरनंतया
ज्ञिकैरप्येवमेवव्याख्यानं हेमाद्रौवृद्धमनुः स्वयंधौतेन कर्त्तव्याःक्रिया धर्म्याद्विपश्चिता नतुतेजकधौतेननोपभुक्तेनवाक्वचिदिति।
तेजकोरजकः व्रतहेमाद्रौ प्रातर्मुरगयंवा धौतंवासःप्रसारयेत् पश्चिमाग्रंदक्षिणाग्रंपुनःप्रक्षालनाकुर्विरिति तत्रैवमार्कंडेयः॥
अन्यैरवभवेद्वासः शयनीयेनराधिप अन्यद्ध्याकृदेवानामर्चायामन्यदेवहि अन्यच्चलोकयात्रायामन्यदीश्वरदर्शनइति याज्ञि
वल्क्यः अभावेधौतवस्त्रस्यशाणक्षौमादिकानिच कृतपंयोगपदंवाद्विवासायेनवेभवेदिति कुजयोनेपालकबलः आपस्तंबः॥ २

आर्द्रवासास्कृयःकुर्याज्जपहोमप्रतिग्रहान् सर्वेतदाक्षसंविद्याद्धिर्जानुचयत्कृतं यज्जलेशुष्कवस्त्रेणस्थलेचवार्द्रवाससा जपहोम
स्तथादानंतत्सर्वंनिष्फलंभवेदिति सप्तवाताहृतमपिशुष्कं॥ अग्निदग्धेसछिद्रेस्यूतेवाससिततःपरिधेये॥ तस्यूतनलदग्धनखरक्तेनविशेषतः
॥ ऋषिकोल्कीर्णजीर्णेनकर्मकुर्याद्विचक्षणः इतिमहाभारतात्॥ बौधायनः काषायवाससाःकुरुतेजपहोमप्रतिग्रहान्॥ नतद्दत्तंकर्म
हव्यकव्येष्वथोहविरिति भवेदितिशेषः आचारादर्शेनरसिंहपुराणे नरक्तमुखरंवासोनानीलंचप्रशस्यते मलाक्तंचसदाहीनंवर्जयेद्व
स्त्रंबुधइति उल्वणंव्यक्तं पतच्छुक्लविशेषणं तेनात्यंतरक्तमित्यर्थः उल्वणंप्रचलमितिकेचिद्व्याघ्रपादः काषायंकुष्णवस्त्रंवाप्यलिनंके
शादूषितं जीर्णनीलंसंधितंचपाक्यंमैथुनेधृतं छिन्नाग्रमुपवस्त्रंचकुमितंधर्मतोविदुरिति अयंचनिषेधः सतिसंभवेबोध्यः अतएवा
हगौतमः सतिविभवेनजीर्णमलवद्वासाःस्यान्नरक्तमुल्वणमन्यधृतंवावासोविभृयादिति नीलंतुसर्वथानिषिद्धमेव नीलारक्तंयद्यव
स्त्रंब्राह्मणोगंधुधारयेत् अहोरात्रोषितोभूत्वापंचगव्येनशुध्यतीत्यापस्तंबवचनात् नीलारक्तमपियद्वस्त्रंननिषिद्धं तदुक्तमाचारचिंतामणौ
॥ कैवलेपट्टवस्त्रेचनीलीरागोनदुष्यति तथास्त्रीणांक्रीडार्थंसंभोगेशयनीयेनदुष्यतीति भृगुः स्त्रीधृताशयनेनीलीब्राह्मणश्चनदु
ष्यति नयस्यवृद्धोवेशस्यपर्वण्येवंविधारणमिति भविष्ये नीलीरक्तेनवस्त्रेणपत्कर्मकुरुतेद्विजः स्नानंदानंतथाहोमःस्वाध्यायःपि
तृतर्पणं वृथातस्यमहायज्ञानीलीरक्तंस्यधारणादिति व्याघ्रपादः नैकवस्त्रोद्विजःकुर्याद्भोजनंनतुसत्कृतं तत्सर्वमस्करेद्राणांब्र
ह्मभागमकल्पयदिति विष्णुपुराणे होमंदेवार्चनाद्याश्चक्रियास्त्वांचमनेतथा। नैकवस्त्रःप्रवर्त्तेतद्विजवाचनकेजपइति द्विजवा
चनकेद्विजस्वस्तिवाचनोक्तौ शातातपः सव्यांसात्पश्चिमंकटिदेशधृतांबरः एकवस्त्रेनुतंविद्याद्देवपित्र्येचवर्जयेदिति आपस्तं
बः देवागारेतथाश्राद्धेगवांगोष्ठेतथाध्वरे संध्योश्चहयोःसाधुसंगमेगुरुसन्निधौ अभ्यागारेविवाहेषुस्वाध्यायेभोजनेतथा उद्ध
रेदक्षिणंपाणिंब्राह्मणानांक्रियासुचेइति उद्धरेदक्षिणंपाणिमिति सव्येसेवस्त्रंनिधायदक्षिणंबाहुमुत्तरीयाद्बहिः कुर्यादित्यर्थः संग्रह

वामपृष्ठेतथानाभौकृच्छ्रत्रयमुदाहृतं त्रिभिःकृच्छ्रःपरिज्ञेयोविप्रायःसप्तविंशवत्॥ आदौकक्षस्ततोनीवीनाभिमध्येवाससी।
नीवीदक्षिणतःस्थाप्याएतल्लिंगकलक्षणं शयनंचार्द्रपादेनशुष्कपादेनभोजनं नोत्तरीयमधःकुर्याद्रात्रिवासस्तथादिने कटिवेष्टं
नुयद्वस्त्रंपुरीषंयेनवाकृतं सूत्रंमेथुनकृद्वस्त्रंधर्मकार्यविवर्जयेदिति दानहोमेष्वेलोकगौतमः स्नानेदानेजपेहोमेदेवपित्र्येच
कर्मणि वध्रीयान्नाक्षरांकक्षांशेषकालेयथासुखं रुचीति तत्रैवयाज्ञवल्क्यः परिधानाद्बहिःकक्षांनिवद्धावासकीमृता धं
र्मकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नतइति बहिःकक्षाबहिर्निर्गताकक्षाइत्यर्थः कक्षापश्चादंचलंप्रांतद्वयमित्यन्ये उपवीतिलं
बद्वशिरिवलंचाधिकारिविशेषणं यथाछंदोगपरिशिष्टेकात्यायनः सदोपवीतिनाभाव्यंसदाबद्धशिखेनच विशिखोव्यु
पवीतिश्चयत्करोतिनतत्कृतमिति अनेनहिदक्षिणबाह्वादिरादिवद्वपवीतत्वस्यवद्वशिखित्वस्यचकर्तुपुरुषोभयार्थत्वमवगम्यते
ते तेनद्विशिखेनव्युपवीतिनाचकर्मणिक्रियमाणोकर्मणापिवैगुण्यंभवति एवंचसतिकर्तुपुरुषोभयार्थायाचारप्रयुक्तंप्रायश्चि
त्तंहयत्रबोध्यं आचारादर्शनोभिलः दक्षिणंबाहुमुद्धृत्यशिरोवधायसव्येसंप्रतिष्ठापयतिदक्षिणं कक्षमनवलंबंभवत्येवंयज्ञो
पवीतिभवति सव्यंबाहुमुद्धृत्यशिरोवधायदक्षिणेसंप्रतिष्ठापयतिसव्यंकक्षमनवलंबंभवत्येवं प्राचीनावीतिभवति मनुः निवी
तिकंठसज्जने हेमाद्रौ दक्षिणंबाहुमुद्धृत्यवामस्कंधेनिवेशितं यज्ञोपवीतमित्युक्तंदेवकार्येषुशस्यते कंठावलंबितंचैवब्रह्म
सूत्रंयदाभवेत् तन्नीवीतमितिख्यातंशस्तंकर्मणिमानुषे उक्षिप्तेवामबाहोतुदक्षिणस्कंधमाश्रितो प्राचीनावीतमित्युक्तं
तित्र्येष्वेवकर्मस्विति निगमपरिशिष्टेपि वामस्कंधकक्षयोरप्रदाययज्ञोपवीतंदेवेप्राचीनावीतमितरथापितृयज्ञे नाध्यो
हिकंठासक्तमुत्सर्गेनीवितं पृष्ठदेशावलंबि ग्राम्यधर्मेषिति ग्राम्यधर्मःस्त्रीसंयोगइतिहारीतः॥ यत्रनीवीतप्राचीनावीत
योर्नविधिःश्रूयतेतत्रापिदैवमुपलक्षणं पित्र्यमनुष्यकार्यादिरिक्तंसर्वमेवमित्याचारादर्शेत्याख्याते उपवीतंहिधानव

सूत्रंसंस्थानविशेषश्च तत्राद्यंशूद्रइत्यनेनोक्तं मिताक्षरायां अंत्यंशूद्रस्यापि भवति उपवीतिनाकर्म्मकर्तव्यकर्मशेषेणशू
द्रस्याप्यदृष्टार्थेकर्मण्युपवीतित्वावश्यंभावात उपवीताद्युत्तरीयवस्त्रेणावीतिपारिजातकल्पनरू यत्रनाशिखीनोपवीतिस्या
न्नोद्धरेत्संस्कृतांगिरमितिश्रीशंकराचार्यकृतश्रीविष्णुसहस्रनामभाष्ये पाद्मेतदसद्वृद्धपरमकर्मकालपरंनवसूत्रपरंवा ह
रिहरभाष्येदेवलः कार्पासक्षौमगोवालशाणवल्कतृणादिकं सदासंभवतोधार्य्यमुपवीतंहिजातिभिरिति क्षुमाअतसी
वल्कं तरुत्वक् असंभवतइतिमार्कंडेयः विभक्तिकस्तस्मिन् मुख्यासंभवइत्यर्थः गोधिलगृह्ये यज्ञोपवीतंकुरुते सूत्रंवस्त्रंवा
पिवाकुशरज्जुवेति बोधायनः कौशंसूत्रंत्रिस्त्रिवृतमाज्ञाभिरिति कौशंकुशमयं सौत्रंकार्पासंत्रिस्त्रिवृतंनवगुणं त्रि
सरीकृतमित्यर्थः नववैत्रिवृदितिश्रुतेः तत्रसूत्रंकार्पासंकुशमयंवाब्राह्मणस्य तथाचमनुः कार्पासमुपवीतंस्याद्विप्रस्यो
र्ध्ववृतंत्रिवृत् शणसूत्रमयंराज्ञोवैश्यस्याविकसूत्रकमिति छंदोगपरिशिष्टेकात्यायनः त्रिवृद्ऊर्ध्वकृतंकार्यंतंतुत्रयमधो
वृतं त्रिवृत्तज्ञोपवीतंस्यात्तस्यैकोग्रंथिरिष्यतइति॥ ऊर्ध्ववृत्तमाहसंग्रहकारः करेणदक्षिणेनोर्ध्वगतेनत्रिगुणीकृतं बलि
तंमानवैःसूत्रंशास्त्रेऊर्ध्ववृतंस्मृतमिति ऊर्ध्वगतेन दक्षिणकरेणयद्गृहीतंतदूर्ध्ववृतमित्यर्थः वामार्कंत्रिगुणंकृत्वाप्र
दक्षिणावर्तंनवगुणंविधातव्यंत्रिसरैकृत्वायंग्रथिमेकंविदध्यात् यत्तुयज्ञोपवीतंकुर्वीतसूत्राणिनवतंतवः एकेनग्रंथिनातंतु
र्द्विगुणस्त्रिगुणोथवेति द्विगुणोद्विसरस्त्रिसरासंभवेज्ञेय इत्युक्तं नारायणवृत्तौ यत्तूपवानमित्यचनं कार्पासमुपवीतं
तु ब्राह्मणस्यक्षौमंयंराजन्यस्याविकंवैश्यस्येति तदपिनवतंतवसंभवेतंतुषट्कंविधत्ते त्रिवृत्तेत्रिसरमित्यर्थः अथवानवगुणं
त्रिसरह्येनषट्रज्जुकमित्यर्थः क्षौमेयमतसीभवं अत्रवल्कशाणरगोवालादिषुनत्रिगुणात्रिसरादिनियमः सूत्रएवतन्नि
यमोपदेशात् अवघातादयस्तूक्तधर्मत्वात्तत्कार्यकारिष्यपिविधयः सूत्रएवतन्नियमोपदेशात् अवघातादयस्तूक्तधर्मत्वात्

हि धर्मत्वाच्चैत्तत्कार्ये कारिष्यमिति ध्येयः अत्रत्रिगुणत्रिसमंदर्यज्ञोपवीतंतन्तुभेत्वमितिव्यक्तंनारायणवृत्तौ
यज्ञोपवीतरचनाप्रकारस्तुस्मृत्यर्थसारेहरिहरभाष्येच शुचौदेशेशुचौसूत्रंसंहतांगुलिमूलके आवेष्टयेषन्नवत्या
तत्त्रिगुणीकृत्ययत्नतः अङ्गुंगकेस्त्रिभिः सम्यक्प्रक्षाल्योर्ध्ववृतंचततत अप्रदक्षिणमावृत्तेस्त्रिवृत्त्रिगुणीकृते ॥
अधःप्रदक्षिणावृत्तंसमंस्यान्नवसूत्रकं त्रिरावेष्टयदृढंबध्वाहरिब्रह्मेश्वरान्वितं यज्ञोपवीतंपरमंपवित्रंमितिधारयेत्॥
सूत्रंसलोमकंचेत्स्यात्ततः कृत्वाविलोमकं सावित्र्याशुक्लवाङ्मंत्रिताभिस्तदुक्षयेत् त्रिच्छिन्नंवाप्यधोयातंभुक्त्वाकामि
मितमुत्सृजेत् अनध्यायेपराण्हेचब्रह्मसूत्रंनतद्वेत्तइति प्रकारांतरमाह छंदोगपरिशिष्टेकात्यायनः पृष्ठवंशोच
नाभ्योच धृतंयद्विदतेकटिं तद्ब्रह्मसूत्रंपरमंपवित्रंमितिधारयेत् स्मृत्यर्थसारेपि पूर्वप्रकारापेक्षयाप्रकारांतर
मेवेदमुक्तं यद्वेत्युपक्रम्यपृष्ठवंशेचनाभ्यामितिवाक्योपन्यासात् वामस्कंधेकृतंनाभिपृष्ठवंशयोर्दृतंसद्यथाकटिप
र्यंतं प्राप्नोतितावत्परिमाणमित्यर्थः नातोलंबनचोच्छ्रितमिति अतोऽस्मादुक्तान्मानादधिकंलंबमानंनधार्यं नाप्यस्मान्
मानादुच्छ्रितंह्रस्वमितियावत् अस्मिन्पक्षेनषण्णवत्याआवेष्टनं किंतुयावताउक्तमानमुपवीतंसंपद्यतेतावत्सूत्रमानंक
ल्पनीयं अत्राहनारायणवृत्तिकृत एतच्चगोभिलायानांकात्यायनानांचान्येषांतु स्नानादूर्ध्वमधोनाभेर्नधार्यतत्कथंचने
तिदेवलोक्तंप्रमाणमिति॥ यज्ञोपवीतमानाभरितिबौधायनोक्तस्याप्येषैवव्यवस्था अस्यकंठादुत्तारणनिषेधप्रक्षा
लनार्थत्वशास्त्रविशेषेणतदपवादंचाहभृगुः मंत्रपूतंस्थितंकाये यस्ययज्ञोपवीतकं नोद्वेज्ञततः प्राज्ञोयइच्छेच्छ्रेय
आत्मनः सकृदुत्तारणात्तस्य प्रायश्चित्तिभवेद्द्विजः तैत्तिरीयाः कठाः काणवाश्चरकावाजसनेयिनः कंठादुत्तार्यसूत्रंतु
कुर्युर्वैक्षालनंद्विजाः बह्वृचाःसामगाश्चैवयेचान्येयज्ञशास्त्रिनः कंठादुत्तीर्यसूत्रंतुपुनरर्हंतिसंस्क्रियामिति पुनः

संस्क्रियांमंत्रेणोपवीतांतरधारणंहयं यज्ञोपवीतेतिभेदापत्तेरित्युक्तं प्रयोगरत्नेनारायणभट्टैः वह्निमानोप्येवं एतेनप्रतिकर्मशि
खाबंधःपरास्तः यत्तुकुशेपग्रहोवह्निशिखीयज्ञोपवीत्यावमेतिकात्यायनेनस्नानकालेशिखाबंधनमुक्तं तद्देवान्मानुषाद्वामुक्तशिखबंध
नार्थंनतुविमुच्यबंधनीयेत्येतदर्थमित्युक्तमाचारादर्शे शूद्रस्यत्वनियताःकेशविषाइतिवशिष्ठोक्तेः शिखादिकल्पः सचसदसद्भूद्विष
यत्वेनव्यवस्थितइतिशिखाबंधेपिविकल्पइतिशूद्राचारशिरोमणिः कर्मकौमुद्यांत्वकर्मकालेशूद्रस्यनशिखाबंधनियमइत्यूक्तं सर्वेषां
शिरसियत्रकुत्रचित्केशसत्वेतत्रैवशिखाबंधः स्वल्पत्वादत्वेसर्वथाकेशाभावेविशेषउक्तः काढकगृह्ये अथवेत्यमादान्नशिखास्यान्तदाकेशि
शिखांब्रह्मग्रंथियुतांदक्षिणकर्णेनिदध्यादिति शिखाभिन्नकेशानामपिकर्मकालेबंधः यथाबृहद्दक्षिष्ठः मुक्तकेशैर्नकर्तव्यंप्रेतस्ना
नेविनाक्वचित् स्नानंदानंजपंहोमंमुक्तकेशंनकारयेदिति नचपूर्वार्द्धेप्रेतस्नानभिन्नस्नानएवमुक्तकेशत्वनिषेधः उत्तरार्द्धेस्नानपद
वैयर्थ्यापत्तेः स्नानेनदनुवादेदानादीनांहविर्धौवैरूप्यापत्तेः उत्तरार्द्धएवसर्वत्रमुक्तकेशत्वनिषेधेवाक्यभेदापत्तेः पूर्वार्द्धेवैयर्थ्यापत्तेश्च
नचप्रेतस्नानपर्युदासार्थंपूर्वार्द्धं। आद्यपादवैयर्थ्यापत्तात् तेनोत्तरार्द्धेकवाक्यतयाप्रेतस्नानान्यकर्मसुमुक्तकेशत्वंनिषिध्यते
हेमाद्रौकौशिकः कुशासनंसदापूर्तंपत्नीतानंतुविशेषतः कुशासनोपविष्टस्यसिद्ध्यतेयोगउत्तमइति विष्णुपुराणे कुशोपरिनिविष्टेन
तथायज्ञोपवीतिना सर्वकर्मप्रकर्तव्यमन्यथाविफलंभवेदिति कुशोपरिनिविष्टेनेतिकुशासनोपादानंकर्महार्सनोपलक्षणे आसनान्या
ह्याह्निकाशिकायांस्मृतिः शमीकर्पूर्य्यशब्दाश्वकरंबोवारणस्तथा पंचासनानिशस्तानिश्राद्धेदेवार्चनेतथेति श्राद्धेदेवार्चनइतिदे
वपित्र्यकर्ममात्रोपलक्षणं दानहोमादौशौनकायनः दानमाचमनंहोमंभोजनंदेवतार्चनं प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्पणं ॥
आसनानरूपादस्कंजान्वोर्वाजंघयोस्तथा कृतावसवित्र्यकोपस्कप्रौढपादःसउच्यत इति कृतावसवित्र्यकोकृतपदबंधः मंत्रेणपवि
त्रधारणेचाधिकारितावच्छेदकं तदुक्तं प्रयोगपारिजाते मंत्रेणधारयेद्विप्रःपवित्रं सर्वकर्मसु मंत्रेविनाधृतंयस्तुपवित्रमफलंभवे
त् पवित्रवेतइत्यादिमंत्रद्वितयमस्मत्पितृमातृपितामहप्रपितामहानांक्रमेणपवित्रत्वकामनया उभाभ्यामेवपाणिभ्यांविप्रैर्दर्भपवित्रके धारणीयेप्रयत्नेनब्रह्मग्रंथिसम

न्विते ब्रह्मयज्ञे जपेचैव ब्रह्मग्रंथिर्विधीयते भोजने वर्तुलः प्रोक्ता एवं धर्मोनहीयतेइति वृत्तग्रंथिमत्पवित्रलक्षणमुक्तं हेमाद्रौ गारुडे अर्द्धं प्रदक्षिणीकृत्य शिरवायां संप्रवेशयेत् वैष्णवेनैवमार्गेणावृत्तग्रंथौपवित्रके इति वैष्णवोमार्गः पश्चाद्भागः द्विगुणीकृतानां दर्भाणां शिरवानांपाशाः प्रदक्षिणमर्द्धावेष्टनंविधाय पश्चाद्भागेनयदाप्रवेश्यतेतदावर्तुलाग्रंथिरित्यर्थः ब्रह्मग्रंथिमत्पवित्रलक्षणमपितत्रैवोक्तं मत्स्यज्यैवैष्णवमार्गब्रह्ममार्गविनिःसृतं सकृत्प्रदक्षिणीकृत्यपवित्रमभिधीयते नद्विब्रह्मग्रंथिमत्पवित्रंवेदवादिभिरिति पवित्रकर्तुरभिमुखप्रदेशोब्रह्ममार्गः यदासपवपाशःप्रदक्षिणेयनसमग्रमेवेष्टनंविधायपुरोभागेनप्रवेश्यतेनदाब्रह्मग्रंथिरित्यर्थः पवित्रदर्भशिरवासंख्यापितत्रैवोक्ता सप्तभिर्दर्भपिंजूलैः कुर्याद्ब्राह्मंपवित्रकं पंचभिःक्षत्रियस्यैवचतुर्भिस्तथाविशः। ह्याह्योशूद्रस्यविहितमंतराणांतथैववेति। मार्कंडेयस्तु चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं। एकैकन्यूनमितरेषांवर्णेवर्णेयथाक्रमं। सर्वेषांवाभवेद्ब्राह्म्यांपवित्रंग्रथितंनवेत्याहारानच्चसंख्याविशिष्टंपवित्रलक्षणंग्रंथिमत्पवित्रंपक्षेतदभावपक्षेतु अनंतर्गर्भिणंसाग्रंकौशंहिद्विदलमेववच। प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचिदितिछंदोगपरिशिष्टकात्यायनोक्तलक्षणंज्ञेयं हिद्विदलमखंडैकपत्रात्मकमित्यर्थः। केचिद्धिदलंयत्रह्यात्मकमितिव्याचक्षते। तत्पवित्रेकरोतीतिकुशोसमावशाणीग्रावनंतर्गर्भौकुशौच्छिनत्तिपवित्रेस्थइतिशातपश्रुतिकात्यायनसूत्रकारकंदेवभाष्याध्वरिवल्लग्रंथविरूढमित्युपेक्षणीयंहारीतः॥ आचामेतप्रयतोनित्यंपवित्रेणद्विजोत्तमः नोच्छिष्टंतुभवेत्तस्यभुक्तशेषंतुवर्जयेदिति पवित्रेणसहयुक्तंपाणिमित्यर्थः येनतुपवित्रेणसहभोजनंकृतंनहवाच्छिष्टतयात्याज्यंनान्यत् एतच्चग्रंथिरहितपवित्रविषयंग्रंथिर्यस्यपवित्रस्यनेनाचमनंचेरदिति हारीतस्मरणात् एतद्पिब्रह्मग्रंथिमत्पवित्रविषयंनब्रह्मग्रंथिनाचामेदितिहेमाद्रावादित्यस्मरणात् एतच्चश्रुतेराचामतोवदितव्यं प्रयतइतिवचनात। अन्येतुकर्मांगाचमनविषयमेतदित्याहुः नथावेहमाद्रौकात्यायनः सपवित्रःसदर्भोवाकर्मांगेपितृकर्मणि अशून्यंतुकांकृत्वा सर्वत्राचमनंचरेत् नोच्छिष्टंतत्सदर्भंश्चभुक्तोच्छिष्टंतुवर्जयेदिति अत्रपवित्रशब्देनग्रंथिमत्पवित्रंमित्येके प्रयोगपारिजाते नित्येने

मित्तिकेवाप्यकर्मांपक्रमणेद्विजः धृतंपवित्रंकर्मांतेग्रंथिमुत्कातुतत्त्यजेदिति हेमाद्रौशातातपः जपेहोमेतथादानेस्वाध्याये पितृतर्पणे अशून्यंतुकांकुर्यात्कवर्णरजतैःकुशैरिति तत्रैवकश्यपः स्नानेहोमेजपेदानेस्वाध्याये पितृतर्पणे सपवित्रोसदर्भोवाकरोकुर्शीतनान्यथेति उभावपिकरोसपवित्रौसदर्भौवाकर्मांगत्वेनसंपादनीयौ अत्रचकश्यपः पवित्रवतावच्चग्रंथिमद्ग्रामग्रंथिमद्ग्रांवापवित्राभ्यामित्येकः यस्तु द्वौदर्भौदक्षिणेहस्तेसव्येत्रीनामनेसकृदितिवचनोक्तरीत्याचसदर्भताइत्यपरः सव्येपाणौकुशान्कृत्वाकुर्यादाचमनक्रियां सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकइतिछंदोगपरिशिष्टकात्यायनोक्तेः सव्येपाणौत्रिकुशान्दक्षिणेपवित्रं धारयेदितिहेमाद्रयः हेमाद्रौगृह्यपरिशिष्टे दर्भाःकृष्णाजिनंमंत्राब्राह्मणाहविरग्नयः अयातयाम्यान्येजानिनियोज्यानिपुनःपुरिति यातयामत्वेनैकत्रप्रयोगानर्हत्वं अयातयामत्वंतुएकत्रविनियुक्तस्याप्यन्यैकक्रियांतरोपयोगयोग्यत्वं हविरत्राज्यमेव॥ नाज्यादशेषादितिकात्यायनेनाज्यस्यशेषत्वाभावप्रतिपादनेनयातयामत्वाभावात्पुनः पुनर्विनियोज्यत्वस्यनत्रैवसत्वात्। पुरोडाशोदनादेस्तुशेषत्वेनपर्य्युषितत्वेनचयातयामत्वात्पुनः पुनर्विनियोज्यत्वस्यासंभवात् कौशादावाज्यनामकहविःशब्दपरामर्शाच्चदर्भाणामयातयामत्वंतुनभोमामीयाःमावास्यागृहीतदर्भविषयं॥तदाहहारीतः सोमेनसम्यमावास्यातस्यांदर्भाश्चयोमतः अयातयामास्तेदर्भानियोक्तव्याःपुनःपुनरिति नभःश्रावणः अमावास्यात्वमौतमासेनैवबोद्धव्या तत्रश्वेतेउपयुक्ताअप्ययवादवर्जंक्रियांतरेपिपुनःपुनरुपयोज्याःकालांतरगृहीतस्तुएकत्रविनियुक्ताश्चेद्यातयामात्वात्क्रियांतरेष्वनेनविनियोज्याः अपवादवाक्यानितुहेमाद्रौलघुहारीतः वितोदर्भाःपथिदर्भायेदर्भायज्ञभूमिषु स्तरणासनियेदुषुषट्कुशान्परिवर्जयेत् पिंडार्थंयेकृतादर्भायैःकृतेपित्रतर्पणं मूत्रोच्छिष्टधृतायेचतेषांत्यागोविधीयते नीवीमध्येषुयेदर्भाब्रह्मसूत्रेचयेकृताःपवित्रांस्तान्विजानीयात्तथाकायस्तथाकुशाइति गृह्यपरिशिष्टेपि अमेध्यलिप्तायेदर्भास्तेषांत्यागोविधीयतइति दर्भलक्षणंहेतुं माद्रौकौशिकेनोक्तं सप्तपत्राःशुभादर्भाश्चिलक्षेत्रसमुद्भवाः तेप्रशस्ताहिजातीनांदेवपित्र्येचकर्मणि॥ अप्रस्तृताःस्मृतादर्भा

प्रस्तास्तकुशाःस्मृताः समूलाः कृतयाः प्रोक्ताश्छिन्नाग्रास्तृणसंज्ञिताइति अप्रसृता असंजात प्रसवा अपुष्पिताइत्यर्थः रत्निप्रमाणतावदर्भाणां रत्निमात्राः प्रमाणेनपितृतीर्थेनसंस्कृताइतिछंदोग्यपरिशिष्टे कात्यायनोक्तेः एतद्वीयंडाधह्मरणार्थनामेव तदुक्तंवायुपुराणे रत्निप्रमाणाश्शस्तावैपितृतीर्थेनसंस्कृताः उपमूलेतथाग्रेनाःप्रस्तरार्थे कुशोत्तमाइति कृतमुष्टिहस्तोरत्निः अन्येषांतुगोकर्णप्रमाणता तदुक्तंब्रह्मपुराणे हरिताश्वसपिंजूलाःस्निग्धाःयुष्टाः समाहिताःगोकर्णदीर्घास्कुशाः सकृत्छिन्नाःसमूलकाइति गोकर्णपरिमाणंचप्रादेशतास्तर्जन्यादियुतेततेगोकर्णाख्यइत्यभिधानकोशप्रतिपादिते अथाचमनेचाधिकारितावच्छेदकं तदुक्तंमार्कंडेयेन देवार्चनादिकार्याणितथागुर्वभिवादनं कुर्वीतसम्यगाचम्यप्रयतोपिसदाद्विजइति आचांतस्यप्रयतस्यापिकर्मारंभप्रयुक्ताचमनमनेनोक्तंभवति तत्रायमाचमनप्रयोगः बद्धशिखउपवीतिप्राङ्मुखउङ्मुखइशान्यभिमुखोवाआजानुक्षालितपादयुग्म आमणिबंधंप्रक्षालितहस्तद्वयेनकेनापिभिन्नहिद्वामास्तेतरुवीरत्रीकृत्वाशुचौदेशेअप्रसारितसमस्थितपादयुगःऋजुमनास्तन्मनाःप्रणतोभूमिष्ठपादोनासनस्थोभुक्त्वाऽनस्थोपिअजस्रंस्थोजानूर्ध्वंजलेतिष्ठन्वाअनयावृत्तशिरकंठःकेशानिव्यधःकायधरणीरस्पृशन्ततत्स्पर्शेतुप्रक्षालितहस्तः अजस्रमहर्मन्नगलन अप्रोढपादःकमथस्पृशत अचलन्क्वचिदपिअनावर्जितदृग्दिशआत्मानेचानवलोकयन् अरण्यास्थोऽज्वरोवाग्यतहस्ताम्स्पृष्टमफेनमविवरणंमविरसमदुर्गंधिअबुद्बुदंशरदाशुचेकयारायनावर्जितंवर्षधारातिरिक्तंपादप्रक्षालनशेषातिरिक्तंछर्पचैतदाभूमिस्थाविनाग्नेअग्निप्रोक्षणार्थंजलंशेषातिरिक्तंहस्तेनालोडितंतेअप्रदक्षप्रभवंप्रदक्षप्रभवमपिगोतृप्तिक्षमंअतमंतीगणस्तप्तमपिअकलुषंयनांगुलिनागोकर्णकृतिनादक्षिणंहस्तेनत्रिश्चतुर्वाब्राह्मणक्षत्रादिनातदवरोधेकायेनतदवरोधेदेवेनब्राह्मणोत्तदाग्निक्षत्रियःकेटगामिवैश्यस्तालुगामिजलमाचामेत् शूद्रःसर्वैवचस्त्रीमुखवाग्यांतरप्राप्तिक्षमंयोक्तंभव

MEMORIAL

जलमाचामेत्। ततःसंवृतशिरवांताधरोष्ठंमुखमंगुष्ठमूलेनाद्भिःपरिमृज्यपाणिंप्रक्षाल्यतर्जनीमध्यमानामिकाभिस्तादृशेवक्त्रवमोष्ठमभ्युक्षेत्। धःरपावादुपरिद्विरुपस्पृश्यपुनःपाणिंप्रक्षाल्यवामपाणिंपादौशिरस्त्वाभ्युक्षेत्वतर्जन्यंगुष्ठाभ्यांसोदकाभ्यांदक्षिणोत्तरनासापुटेभ्रूतोंगुष्ठानामिकाभ्यांसोदकाभ्यांमक्षिणी।ह्रिद्रोगलेनतदावादाक्षिणीतिविशेषः॥परिमार्जनयोर्मध्येपाण्याद्यभ्युक्षणमितिचविशेषः॥ततोंगुष्ठनामिकाभ्यांदक्षिणोत्तरेश्रोत्रे ततःकनिष्ठांगुष्ठाभ्यांनाभिंस्पृष्ट्वापाणिंप्रक्षाल्यकरतलेनतद्दद्यंसर्वांगुलिभिःशिरअंगुल्यग्रेणांसद्वयंचस्पृशेत् ततःशेषजलेकिंचिद्ग्राह्यहस्तेदद्यंद्वनादाचमनंहिराचमनेपादप्रक्षालनवर्जंमखिलभावर्ननेभोजनोपक्रमाचमनेसकृदेवोष्ठस्पर्शः तथाहिजातौनामपिपुनराचमनेओष्ठस्पर्शमात्रंप्रत्युपस्पृश्यात्ततः शुचिर्भवतिइतिगोभिलगृह्यादितिकेचित् एतावत्यशक्तोतुत्रिःपीत्वाहस्तौप्रक्षाल्यमुखंप्रमृज्यखानिस्पृशेत् अत्यशक्तोतुत्रिःपीत्वाहस्तेप्रक्षाल्यश्रोत्रंस्पृशेदिति इत्याचमनप्रयोगः अत्रमूलंमिताक्षरायांस्मृत्यर्थसारे आचारादृशेआचारचिंतामणौचद्वेयं कृतप्राणायामत्वमप्यधिकारिविशेषणं तदाहवृद्धमनुः प्राणानायम्यकुर्वीतसर्वकर्माणिसंयतः प्राणायामैस्त्रिभिःपूतस्तत्तओंकारमर्हतिइति प्राणायामलक्षणंछंदोगपरिशिष्टे कात्यायनेनाभिहितं भूराद्यास्तिस्रोवेतामहाव्याहृतयोऽव्ययाः महर्जनस्तपःसत्यंगायत्रीचशिरस्तथा अयोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरितिशिरः प्रतिप्रतिकंप्रणवमुच्चारयेदंतेचशिरसःएतापतांसहानेनतेथभिर्दशभिःसह त्रिर्जपेत्आयतप्राणःप्राणायामःसउच्यतइति मुक्तिफलत्वाद्व्ययाः पताः सप्तव्याहृतयः एतांगायत्रीं अनेनशिरसासह तेथभिर्दशभिः प्रणवैःसह आयतप्राणोनिरुद्धप्राणस्त्रिर्जपेदिति अयमेकःप्राणायाम इत्यर्थः योगयाज्ञवल्क्येपि सव्याहृतिंसप्रणवांगायत्रींशिरसासह।त्रिःपठेदायतप्राणःप्राणायामःसउच्यतइति कूर्मपुराणेईश्वरगीतासु प्राणःस्वदेहजोवायुरायामस्तन्निरोधनमिति।

दानयज्ञपरिशिष्टे ब्रह्मयज्ञोजपोहोमो देवर्षिपितृकर्मच अनोंकृत्यकृतंसर्वंनभवेत्सिद्धिकारकमिति शाकायनोपि दानयज्ञत
पःस्वाध्यायजपध्यानसंध्योपासनप्राणायामहोमदेवपित्र्यमंत्रोच्चारणब्रह्मचारिणादिनिप्रणवमुच्चार्यप्रवर्त्तयेदिति अतश्चसंत्र
मात्रोच्चारणे आदावोंकारःकार्य्य इतिसर्वानुक्रमसूत्रभाष्ये केचित्तुप्रवर्त्तयेदितिवचनात्प्रारंभएवयुक्तः तथाछंदोगपरिशि
ष्टे कात्यायनः नोंकुर्याद्धोममंत्राणां पृथगादिषुकुत्रचित् अन्येषांचनिकृष्टानांकालेनाचमनादिने ति। अस्यार्थः गोभिलगृ
ह्यप्रभृतिषुइष्टइतिविशेष्यत्वाहुतिमंत्रेषुप्रतिमंत्रमादौ नओंकारप्रयोगंकश्चिदपिकुर्यात् किंतुप्रथममेव अन्येषांजपाद्यर्थी
नांसंध्याध्यायादीनांमध्येअप्रायत्येसतिआचमनादिनाकालेन ओंकारेणसहव्यवधानेनाचमनानंतरंपठ्यमानस्यमंत्रस्यादा
वोंकारप्रयोगःकर्त्तव्यः होममंत्रेषेवंव्यवधानेओंकारःकर्त्तव्यएवेतिनारायणस्तुतिकृताव्याख्यातंअतएवशास्त्रांतरीयानकु
र्वंतित्याहुः पारस्करगृह्यभाष्येहरिहरस्तुअन्येषांचाविकृष्टानांइतिपाठंधृत्वाअविकृष्टानांकालेनाचमनादिनाव्यवधि व्याख्या
तवान् सचत्रिमात्रस्तादृशस्यैवनियोगात् मदनरत्नेव्यास त्रिमात्रस्तुप्रयोक्तव्याकर्मारंभेषुसर्वशइत्यारभ्यकर्मारंभेचित्यन
सासहनसंधिःपृथग्विधानेनसहसंधिर्नभवतीत्युपपादितंविषमान्मूषामितिसूत्रे सर्वदेति अस्यपृथग्विधित्वान्मंत्रेसर्व
शइति ओंमित्यधिकृत्यापस्तंबोपि त्रिमात्रस्तुप्रयोक्तव्यः कर्मारंभेषुसर्वेषुकर्कोपाध्यायेः अध्याहारस्तुलौकिकस्तान्मं
त्रेणसहसंध्यभावइत्यपिप्रतिपादितंपक्षंपूर्वार्द्धे समनकृत्यधिकृत्यसंतइतिप्रतिमंत्रमितिसूत्रेकर्कोपाध्यायेः दानहोमा
द्यैमदनरत्नेवयाज्ञवल्क्यः आर्षंछंदश्चदेवत्यंविनियोगस्तथैवच वेदितव्यंप्रयत्नेनब्राह्मणेनविशेषतः अविदित्वानुयःकु
र्याद्याजनाध्ययनंजपं होममंतर्जलादीनितस्यचाल्पंफलंभवेदिति ब्राह्मणेचविषतइतिमदनरत्नेदानकांडेपाठः तथा
यश्चजानातिनित्यत्वेन आर्षंछंदश्चदेवते विनियोगंब्राह्मणंचमंत्रा र्थज्ञानमेवच एकैकस्यऋषेःसोपिवेदात्यग्निर्विवहेत

एकैकस्यऋषेः एकैकस्यमंत्रस्येत्यर्थः देवतायाश्चसायुज्यंगच्छत्यत्रनसंशयः पूर्वोक्तेनप्रकारेणकृष्यादिवेत्तियोहिजः।
अधिकारोभवेत्तस्यरहस्यादिषुकर्मसु येनयद्दृषिणाद्दृष्टंसिद्धिःप्राप्ताचयेनवै मंत्रेणतस्यतत्प्रोक्तंसूत्रेभाष्यंतरार्षकं॥
छंदनाच्छंदउद्दिष्टं वासनीइवचाकृतेः आत्मसंछादनोदेवैर्मृत्योर्भीतैरुकंवैपुरा। आदित्येवैरुकंभारुड्डेस्तेनछंदांसिता
निवै यस्ययस्यतुमंत्रस्यउद्दिष्टोदेवतानुयः तदाकारंभवेत्तस्यदेवत्वंदेवतोच्यते॥पुराकल्पेसमुत्पन्नामंत्राःकर्मार्थमेवच॥
अनेनचेदंकर्त्तव्यं विनियोगमउच्यते॥तेउक्तंअस्यमंत्रस्यविनियोगप्रयोजनं। प्रतिष्ठानंस्मृतिश्चैववासुरुपदिहोच्यते॥ए
वंपंचविधंयोगंजपकालेत्वनुस्मरेत्॥होमेचांतर्जलेयोगेस्वाध्यायेयोजनेतथेतिपूर्वानुक्रमसूत्रेकात्यायनोपिऋषिःछंदेवत
छंदास्यनुक्रमिष्यामइतिप्रकृत्याह एतान्यविदित्वायोधीतेनुब्रूतेजपतिजुहोति यजतेयाजयतेतस्यब्रह्मनिर्वीर्यंयातयाम
भवत्यथांगराश्चगर्त्तेवापद्यतेस्थाणुंवर्छनिप्रमीयतेवापापीयान्भवत्यथविज्ञायेतानियोधीतेतस्यवार्यवत्तरंभवति जपित्वाहुत्वे
ष्टीतत्फलेनयुज्यतइति अत्रऋषिछंदोदेवताइत्येवक्रमःस्वीकार्यः आर्षंछंदश्चदेवत्यंविनियोगस्तथैवच वेदितव्यंप्रयत्नेन
ब्राह्मणेनविशेषतइतिवाक्येवेदितव्यमितिविधिस्थानीयतव्यप्रत्ययश्रवणात् अत्रऋष्यादिज्ञानपदार्थेकर्त्तव्यंविधीयते त
स्मिंश्चविधीयमानेयागानुपूर्व्याःवगम्यमानक्रमोमितदाक्षिणोविधीयते क्रमोनापरियहेविनिगमनाविरहात् यत्तुकात्यायनेनक्र
मिष्येवतछंदार्षंस्यनुक्रमिष्यामइतिसर्वानुक्रमसूत्रेऋषिदेवतछंदांसिइतिक्रमउक्तः सनज्ञानार्थत्वेन किंतुअनुक्रमिष्यामइत्यु
क्तेरनुक्रमार्थत्वेन वेदितव्यमितिवदत्रऋष्यादिज्ञानकर्त्तव्यतायोधकसाक्षाद्विध्यश्रवणात् क्रमकल्पस्यार्थंध्येक्रमविधेरबली
यस्त्वाच्च अतएवयोगयाज्ञवल्क्येन प्रजापतेर्मुखात्पन्नस्तपःसिद्ध्यैवैपुरा तेनोपात्तस्ततस्तस्यब्रह्मार्षत्वमयंभुवः गायत्रीच
भवेत्छंदोअग्निर्देवतमुच्यते आदौसर्वत्रयुंजीतविधिषेवकर्मस्वित्यादिनाप्रणवव्याहृत्यादिमंत्राणामृषीछंदोदेवताइतिक्रमे

णेवार्ष्यादिक्रममभिहितं गृह्यगंगाधरयद्भावपि ऋषिमादौ प्रयुंजीतेच्छेदोमध्ये नियोजयेत् देवतामवसानेच मंत्रज्ञोमंत्रमि
च्छेदिति एतेनऋषिदैवतच्छंदांसीतिक्रमंवदंतोदेवयाज्ञिकादयःपरास्ताः आचारादर्शयोगियाज्ञवल्क्यः संध्यामधिकृत्याघ
मर्षणसूक्तस्यापोहिष्ठेतिसूक्तस्य दुपदायाश्चऋष्यादिकमभिधायाह एवंज्ञात्वातु मंत्राणांप्रयोगेवेद्विजोत्तमः संध्यामुपा
सयेद्यद्यावत्तेनिषीदतेति अत्रच संध्याग्रहणं विहितऋष्यादिज्ञानकर्मोपलक्षणं पूर्वोक्तकात्यायनयोगीया
ज्ञवल्क्यादिवचनैकवाक्यतयातथात्वावगमात् अत्रकेचिदाहुः सर्वेषामेव मंत्राणामादावृष्यादीनिस्मृत्वाततः संध्याप्रयोगइति
तन्नातीवयुक्तं एवंत्वंगभूतेनऋष्यादिस्मरणेनसहसर्वेषांमंत्राणामनंतर्ण्यायागतंबाधेत ॐकारस्यमस्तकाद्यावदौंनोगायत्र्याः
शिरसश्चसुष्ठ्वादीनिस्थलोत्तरेयोगयाज्ञवल्क्येनाभिहितानीति कथंनुतत्पूर्वभावः किंच अघमर्षणसूक्तस्यऋष्यादेःपृथ
गभिधानात्तदेवप्रथमंस्यात् तस्मात्ज्ञात्वेतिप्रयोगाद्बहिर्ज्ञानंप्रयोगकालेसौ कथ्यार्थ्य अथवाज्ञात्वोपासयेदितिप्रत्येकमभिसंब
ध्यते तेनतत्तन्मंत्रस्यऋष्यादिकंतत्तन्मंत्रप्रयोगात्पाक्ज्ञातव्यमित्यर्थः सित्यादि अयमेवपक्षोबहुसम्मतः प्रणवव्याहृ
तिगायत्रीशिरसांचमिलितानामेवमाणायामेविनियोगात्तेषांचमिलितानामेवऋष्यादिकंस्मृत्वाप्राणायामःकार्यः अन्यत्रापियत्रै
कस्यांक्रियायामनेकमंत्राणांविनियोगस्तत्राप्येवमेव यथारुद्रजपरुद्राभिषेकादौ एवंपंचविधंयोगमितिब्राह्मणांतर्भावेनपं
चविधत्वंप्रकारांतरं अधिकफलार्थंवा आर्षंछंदश्चदैवतंविनियोगस्तथैवचेत्यादिनानास्थानेषुचतुर्णामेवाभिधानात् एवंज्ञात्वा
तुमंत्राणामितियोगयाज्ञवल्क्येनाथविशेषेतानियोधातइत्यादिनाकात्यायनेननचऋष्यादिज्ञानस्यैवांगत्वाभिधानार्थंज्ञानपक्षत्व
ज्ञानमेवांगंनतुऋष्याद्युच्चारणं मानाभावादमेवदृश्यतायापत्तेश्चेत्युक्तमाचारादर्शे आचारचिंतामणौच इदंचऋष्यादिज्ञानंयत्रमंत्रे
ष्वामाणांकिंतुतःप्राक्प्रयोगएवकर्तव्यं एतच्चऋष्यादिज्ञानंवैकल्पिकं एतान्यविहितेस्वपक्षप्राप्तत्वस्यन्यत्रापिनिर्वार्यत्वात्तथात्वे भव

तीत्युक्तत्वात् अथविज्ञायेतानियोधीनेतस्मर्तव्यंवदित्युक्तेः सर्वमेतन्नछंदोदेवतमार्षंचविज्ञायायत्किंचिज्जपेहोमादिकरोति तत्सफ
लमद्भुतइत्यकर्तृकश्रुतेश्चेति दर्शपूर्णमासपद्धतौदीक्षायांचवैद्यनाथमिश्राः प्राच्यग्रंथेतु अध्ययनाध्यापनोत्तरंजलजपेषु नियमोऽन्यत्रपुरुषा
र्थतानकर्मचेतुण्यमितिकश्चिदस्यापवादःकृष्णभट्टीये नवस्मरेद्दर्षिछंदः श्राद्धेवैतानिकेमरेदिति नारायणनतिस्मृत्याधिकारिविशे
षणे तदुक्तंवामनपुराणे सर्वमंगलमंगल्यंवरेण्यंवरदंविभुं नारायणंनमस्कृत्य सर्वकर्माणिकारयेदिति नारायणग्रहणंगणेशो
मामहेश्वरासुपलक्षणंकारयेदितिस्वार्थेणिच् कृतसंकल्पत्वमप्यधिकारिनावछेदकं तदुक्तंमार्कंडेयपुराणे संकल्पविधिवत्
कुर्यात्स्नानदानव्रतादिकमिति संवत्सरप्रदीपेदक्षः प्रातःसंध्यांततः कृत्वासंकल्पंबुध आचरेत् संध्याहीनोऽफलिनित्यम
नर्हः सर्वकर्मसु यदन्यत्कुरुतेकर्मनतस्यफलमश्नुतइति तिथितत्वेभविष्ये संकल्पेनविनायत्किंचित्कुरुतेनरः फलंचाल्पा
ल्पकंतस्यधर्मस्यार्हत्वयोभवेदिति संकल्पशब्देनामुकफलार्थमिदंकर्मकरिष्यइत्याकारकंमानसंकर्मोच्यते तदुक्तंभट्टाचार्यैः सं
कल्पः कर्ममानसमिति तत्रविशेषमाहहेमाद्रेः मासपक्षर्तुतीर्थानांचनिमित्तानांचसर्वशः उच्छेदेवनमकुर्वाणोनतस्यफलभाग्भवे
दिति अमोचसंकल्पः केवलमदृष्टार्थएवनानुसंधानरूपदृष्टफलार्थः अनुसंधानोत्तरमेवतस्यकर्तृव्यत्वेनतस्यतत्फलत्वानुप
पत्तेः मासपक्षतिथयःप्रयोगाधिकारणभूताःसर्वेपि यत्तुअनेकदिनसाध्यैकर्मणाद्यदिनेसंकल्पकालेनातिथ्यधिकरणत्वेनोक्ति
रव्यज्योतिष्टोमेनाहंपशूनित्यादिवाक्यप्रयुंजतेवायज्ञकाः तन्नुग्रहानामन्वयायोगादनादर्तव्यमितिनीलकंठभट्टाः यदपिकेचित्तेनऋ
षेणप्रयोगांगतयाविहितानामेवमासादीनामुच्चैरवइतिवदपि अविहितमासादिकेअधानारोमासपक्षतिथीनांज्योतिष्टोमेएकादशा
व्रतारोचमासपक्षमोरुत्तरेवाभावप्रसंगाच्च अतोज्योतिष्टोमादावेकादश्यादिपूर्णिमांतानामुच्चैरवः सएवमन्यत्रापीतिदिक् अ
त्रकेचिदाहुः ग्रहणादिनिमित्तस्यमासपक्षतिथीनांप्रयागादेश्चदेशविशेषमात्रस्योच्चैरवः कार्योनतु व्यापकानामुत्तरायणमध्यदेशा

दीनामिति अपरेत्याहुः प्रयागादिषु तीर्थेषु पुण्यशब्दायतनेषु वेति माम्यवाक्याद्यथा प्रयागादितीर्थविशेषस्यांगत्वं एवमार्या वर्त्तः पुण्यभूमिर्मध्यं विंध्यहिमांगयोरित्यादावाक्येनार्यावर्त्तादिसामान्यस्यापि अंगत्वावगमान्निमित्तानांच सर्वशाइतिसर्वशः पदस्वारस्याच्च सर्वत्रनिमित्तानामनुछेखः कार्य्यः नचानेनैव सिद्धेर्मामपक्षतिथीनामित्यनर्थकमिति वाच्यं विधिस्तावांकार्त्तिकमाघादीनामनुछेखेऽपि तदस्यसाधारणमासायनुछेखप्राप्त्यर्थत्वात् तेनव्यापकानांव्याप्यानांचसर्वेषामनुछेखः कार्यइतिसंकल्पेचमनुस्वाच्चांद्रमासातिरिक्तगौणमासमयुक्तकर्मस्वपि विष्णुदक्षिणेशुक्लादेस्तदुत्तरेकृष्णादेश्चांद्रमासस्यैवानुछेखेऽनुगुणानामित्युक्तकालतत्वविवेचने कर्मांगतिथ्यन्यतियेसंकल्पकालसंतुसंकल्पकालवार्त्तमानतिथिमेवकर्मतिथिमनुछेखावपिमिहोनरस्यैष साधारणमासायनुछेखप्राप्त्यर्थत्वात् तेनव्यापकानांव्याप्यानांचसर्वेषामेवयुक्तत्वेनरूपेणाधिकरणतयोल्लिख्यसंकल्पकार्यसंकल्पवाक्यमनुहेमाद्रौश्राद्धखंडे प्रदर्शितं दुइहपृथिव्योजंबूद्वीपे भारतवर्षे कुमारिकाखंडेप्रजापतिक्षेत्रेदंडकारण्ये अमुकस्मिन्प्रदेशे इत्यादिदेशंसमनुकार्त्य ॐ ब्रह्मणोद्वितीयेपरार्द्धेश्वेतवाराहकल्पेवैवस्वतमन्वंतरेऽष्टाविंशतितमेकलियुगस्यप्रथमचरणेइत्यधिकारिसंकल्पेप्रभवादिसंवत्सरपंचमात्मकमवांतरयुगमनुकीर्त्तयेत कुमारिकाखंडेऽलक्षणगिरौतशिरामणौ ऐंद्रकेतेशकलंकिलताम्रपर्णमन्यद्गभस्तिमद्ध्वकुमारिकाख्यं नागचक्षोम्यसिंहवारुणमत्स्यखंडंगांधर्वसप्तमिति भारतवर्षमध्ये वर्णाव्यवस्थितिरिहेवकुमारिकाख्ये शेषेचौत्यजजनानिवसंति सर्वरतिनानिवद्युगानिद्वादशैवमाहुः वैष्णवमथप्रभवत्रचार्हस्त्यमतःपरं ऐंद्रमाग्नेयमतस्मादाहिर्बुध्न्यंचमैत्रकं वैश्वदेवंचसौम्यंच प्राजापत्यंचमारुतं भौश्विनंभाग्यमित्येवं युगानिद्वादशैवहि इति प्रभवादिसंवत्सरनामान्याह निर्णयसिंधौनारदः प्रभवोविभवश्शुक्लःप्रमोदोथप्रजापतिः अंगिराःश्रीमुखोभावोयुवाधातेश्वरस्तथा बहुधान्यश्चप्रमाथीचविक्रमोथवृषस्तथा चित्रभानुःसुभानुश्चतारणःपार्थिवोऽव्ययः सर्वजित्सर्वधारीचविरोधीविकृतःखरः नंदनोविजयश्चैवजयोमन्मथदुर्मुखौ हेमलंबोविलंबोथविकारिशार्वरीप्लवः शुभकृच्छोभनःक्रोधीविश्वावसुपराभवौ प्लवंगःकीलकःसौम्यःसाधारणविरोधकृत् परिधावीप्रमादीचआनंदोराक्षसोऽनलः कालयुक्तश्चसिद्धार्थीरौद्रदुर्मतीदुंदुभि रुधिरोद्गारीरक्ताक्षःक्रोधनःक्षयइति॥ ननुश्चसंवत्सरपरिवत्सरेदावत्सरानुवत्सरेइत्सरेषुवर्त्तमानंयुगावयवमनुकीर्त्यवर्त्तमानसंवत्सरायऋतुमासपक्षतिथीवारनक्षत्रयोगकरणरौद्रादिकालनामानि समभ्यर्चानिकीर्त्तयेत स्मार्त्तानिरौद्रादिकालनामानितु कालमाधवेपुराणांतरेदर्शितानि रौद्रःश्वेतश्चमैत्रश्चतथासारभद्रःस्मृतः सावित्रोवैराजश्चगांधर्वःकुतपस्तथा रोहिणश्चविरांचश्चविजयोनिर्ऋतिस्तथा शंबरोविजयश्चैवभैत्राःपंचदशस्मृताइति नंदपंडितकृतबालभूषायांशंखवस्त्वन्यथानामान्याह रौद्रश्चैवश्वमैत्रश्चतथासालकटःस्मृतः सावित्रश्चजयंतश्चगांधर्वःकुतपस्तथा रोहिणश्चविरांचश्चविजयोनिर्ऋतिस्तथा महेंद्रोवरुणश्चैवभैत्राःपंचदशस्मृताइति एतेपंचदशमुहूर्त्तोदयारभ्यैकमादिवामुहूर्त्ताः तथारात्रिमुहूर्त्ताः शंकरश्चाजयादश्चतथाहिर्बुध्न्यपैतृकौ आश्विनोयाम्यवह्नेयौवैधात्रश्चांद्रएवच आदितेयोथजैवश्चैवेष्वाद्याःसौरएवच ब्राह्मोनाभस्वतश्चैवमुहूर्त्ताःक्रमतोनिशीति एवंदेशकालावधिकरणतयासमनुकीर्त्यामुकफलार्थंसमुककर्मकरिष्यइति तत्रकैश्चिन्मातृपूजादीनांप्रयोगवह्निभूतांगत्वेवदद्भिर्दर्शपूर्णमासावारभ्यमाणोऽन्वारंभणीययापस्यइति वाजपेयेन यस्यमाणोबृहस्पतिसवेनयस्यइतिसंकल्पवत्करिष्यमाणामुककर्मांगत्वेनमातृपूजादीनिकरिष्यइत्येवंमातृपूजादीनांसंकल्पउक्तः अन्यैस्तुप्रधानप्रयोगांतःपातिगुणत्वेवदद्भिरमुककर्मकरिष्ये तदंगत्वेनमातृपूजादीनिकरिष्यइत्येवंप्रधानसंकल्पोत्तरमेवैषांसंकल्पउक्तः वस्तुतस्तुकर्मादिषुचसर्वेषुमातरः सगणाधिपाइत्यादिवक्ष्यमाणवचनान्मातृपूजादीनांस्वस्मिंवाचनांतानांकर्मणोंगेप्रयोगवह्निभूतांगत्वमेवयुक्तं प्रतिभाति अतएवामुककर्मारंभनिमित्तंमातृपूजादी

निकरिष्यइत्येवमाचांसंकल्पवाक्यं छंदोगपरिशिष्टे कात्यायनः यत्रोपदिश्यतेकर्म कर्तूरंगं तदुच्यते दक्षिणस्तत्र विज्ञेयः कर्मणांपारगःकरः यत्रदिङ्नियमोनस्याज्जपहोमादिकर्मसु तिस्रस्तत्रदिशः प्रोक्ताऐंद्री सौम्याःपराजितेति ऐंद्रीपूर्वा सौम्योदीचि ऐशानी अपराजिता तिष्ठन्नासीनःप्रह्वोवाभियमोयत्रनेदृशः तदासीनेनकर्त्रंगेनप्रह्वेननति स्तुतिति प्रह्वोनम्रः कात्यायनः रौद्रर्क्ष-राक्षसमाक्रूरंमभिचारणिकं मंत्रमुक्त्वापिप्यमात्मानंचालभ्योपस्पृशेदपइति अत्रचशब्दानदेवत्यंकर्मकृत्वेतिककोपाध्यायादयः सर्वकल्पसूत्र भाष्यकाराव्याख्यातवंतः हेमाद्रौयात्तवल्क्योपि रौद्र पित्र्याक्रूरान्मंत्रास्तथाचैवाभिचारकान् व्याहृत्यालभ्यचात्मानमयःस्पृष्ट्वान्यदाचरेदिति छंदोगपरिशिष्टे कात्यायनोपि। पित्र्यमंत्रानुद्रवणे आत्मानंभे अवेक्षणे अधोवायुसमुत्सर्गेप्रहासेऽनृतभाषणे मार्जारमूषकस्पर्शेक्रोधेऽप्येवं निमित्तेष्वेषुसर्वत्रकर्मकुर्वन्नपःस्पृशेदिति अनुद्रवणमुच्चारणं आत्मालंभोहृदयस्पर्शः अवेक्षणमपितस्यैवअ त्रपित्र्यमंत्रोच्चारणात्मालंभावेक्षणनियमादोविहितान्येवयात्याणिनलौकिकानि प्रहासेमहतिहासेनस्मितमात्रे मार्जार स्पर्शेमार्जारकृतएव स्वयंकृतेनुस्नानस्योक्तत्वादित्युक्तमाचारादर्शे आक्रोशेपरुषभाषणे क्रोधसंभवोमानसिकोपि॥ हेमाद्रौबृहस्पतिरपि अधोवायुसमुत्सर्गेआक्रंदेक्रोधसंभवे मार्जारमूषकस्पर्शेप्रहासेऽनृतभाषणे निमित्तेष्वेषुधर्मार्थं कर्मकुर्वन्नपःस्पृशेदिति अपःस्पृशेदित्यनेन अणेस्पर्शनमेवविवक्षितंनत्वाचमनमिति भर्तृयज्ञपितृभूतिकर्कोपाध्यायवा स्रदेवगार्गश्रीअनंतदेवयाज्ञिकादयः सर्वेकल्पसूत्रभाष्यकाराः व्याख्यातवंतःसंप्रदायादयः पद्धतिकाराश्च अणेस्पर्शनमात्र मनुमितिहेमाद्रिणाव्याख्यातं अत्रसर्वेषुवाक्येषुयः स्पृशेदितिपादः स्पर्शोजलस्पर्शएवयाज्ञिकसंप्रदायाविरुद्धः येषुतुपस्पृ शेदितियावत्तत्रतत्स्पर्शनमात्रमनंमित्युक्तंमाचारादर्शे आपस्तंबः स्वप्नेस्रवेऽशुचिधाणिकाश्लीलेऽनृतेलोहितस्यकेशानाम

म्नेर्गवांब्राह्मणस्यस्त्रियाश्चालंभेमहापथंगत्वाःमेध्यंचोपस्पृश्याप्रयतंचमनुष्यंनिवाचपरिधायापउपस्पृशेदिति ऋत्वयःकृ तंमिवाणिकानासिकामलः अभ्युनेत्रजलं अपःस्पर्शोत्राचमनं हेमाद्रौमार्कंडेयपुराणे कृतादोसम्यगाचामेत्स्पृशेद्वाङ्मृ णादिकं कुर्वितालंभनंवापिदक्षिणश्रवणस्यैव यथाविभवतोत्यंतत्पूर्वोक्तोभेततःपरं नश्यियमानेपूर्वंचउत्तरंप्रतिष्ठियतइ ति तत्रैववसिष्ठः क्षुतेनिष्ठीवतेस्कंदेपरिधानेश्वपाचने पंचस्वेतेषुचाचामेच्छ्रोत्रंवादक्षिणंस्पृशेदिति पराशरः स्कंदेनिष्ठिव तेचैववदंतंश्लिष्टेतथान्हते पतितानांचसंभाषेदक्षिणंश्रवणंस्पृशेत् प्रभासादीनितिथीनिगंगाद्याःसरितस्तथा विप्रस्य दक्षिणेकर्णेसंतीतिमनुरब्रवीत् आदित्योवरुणःसोमोवह्निर्वायुस्तथैवच विप्रस्यदक्षिणेकर्णेनित्यंतिष्ठंतिदेवताइतिमदनर त्नेबोधायनः कर्मयुक्तोनरोनाभेरधःस्पर्शंविवर्जयेदिति स्कंदपुराणे पाखंडिनश्चपतितायेचवैनास्तिकाद्विजाः पुण्यकर्मणि तेषांवैसन्निधिर्नेष्यतेकविदितिछंदोगपरिशिष्टे कात्यायनः अक्रियाश्चविधाप्रोक्ता विद्वद्भिःकर्मकारिणां अक्रियाचपरोक्ता चतृतीयाचायथाक्रिया स्वशास्त्रवाग्रयमुत्सृज्यपरशास्त्रवाग्रयंनुयः कर्तुमिच्छतिदुर्मेधामोघंतत्तस्यचेष्टितं यत्प्राप्तंस्व शास्त्रायंपरोक्तमविरोधियत् विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति यथाछंदोगादिभिःस्वशास्त्रवानुक्तमपियज्ञकर्मवदशास्त्र स्रविहितमग्निहोत्रादिकर्माविरुद्धत्वादनुष्ठीयते यद्वास्वशास्त्रोक्तस्याकांक्षापूरकत्वेनस्वरूपतोवा यदविरोधियथामनोक्तस्य मेरवलम्भित्रंदंडंसुपवीतंकमंडलुं अक्षसूत्रमस्यविनष्टानिगृह्णीतान्यानिमंत्रवदित्यस्यमंत्राकांक्षापूरकंगृह्यांतरे मंत्राभिधावे तद्भर्मज्ञैःकर्तव्यमेव पोराणिकाहिनुमाधारणत्वान्नपारक्य मिति तदपिस्वशास्त्रोक्तादधिकमनुष्ठेयमेव यथादेवताभ्यइतिमं त्रजपादि यत्तुगृह्यपरिशिष्टं वंध्वल्पंवास्वगृह्योक्तं यस्यकर्मयकीर्तितं तस्यतावतिशास्त्रार्थे कृतेसर्वः कृतोभवेदितिसाधा रणानांपरोक्तानांचनावश्यकमनुष्ठानमित्येवं परंनतुगृह्योक्तमात्रमेवानुष्ठेयमिति अन्यथागृह्यानुक्तानांसाधारणानामुपदे

ज्ञानर्थक्यापत्तेःशारद्वाजाधिकरणविरोधाच्च तस्मादेव प्रवृत्तमन्यथाकुर्याद्यदि होमोत्कथंचन यतस्तदन्यथा प्रवृत्तं ततएवसमापयेदिति प्रवृत्तं प्रारब्धं कर्मान्यथाकर्मान्यतेन कुर्यात्तत्रयस्मात्सदार्थादारभ्य यत्कर्मान्यथाजातं ततएवारभ्यपुनर्यथोक्तप्रकारेणकुर्यात् यथागोदोत्सर्गगंधदानयोःकर्मान्यत्वेनानुष्ठाने अन्यथाकरणकाले ज्ञातयोस्ततएवारभ्यपुनरनुष्ठानं नतस्मादेव समाप्तेयदिज्ञानीयान्मयेतदन्यथाकृतं तावदेवपुनःकुर्यान्नावृत्तिःसर्वकर्मणाइति समाप्तेअन्यथाकरणज्ञानेसति यत्पदार्थान्यथाकरणंजातं तमेवयथोक्तप्रकारेणपुनःकुर्यात्ततआरभ्यसर्वकर्मकांडं एतच्चपुनरनुष्ठानं सविलंबेसकलेचकर्तव्यं यत्रतुविलंबोदुःकरत्वंवातत्र विष्णुस्मरणमेवनावृत्तिः यथाःकृतोत्सर्गस्यान्नस्याब्राह्मणेभोजनेपुनरन्यंतरोपादानेनोत्सर्गे अन्यथाब्राह्मणोयरोधसहत्वाधापत्तेरित्युक्तंनारायणवृत्तौ तत्रैव प्रधानस्यक्रियायत्रसांगंतन्नतत्क्रियेतपुनः तदंगस्याक्रियाणेतुनावृत्तिर्नचतत्क्रियेति यत्रप्रधानस्यकर्मणोदानादेरकरणान्मुत्सर्गश्चतदंगभूतः कृतस्तत्पुनरंगानुष्ठानसहितंकर्तव्यं अंगमात्रस्यतूत्सर्गस्याकरणे कृतस्यप्रधानस्यनावृत्तिः नापितावदंगमात्रकरणं किंतुतत्समाधानार्थं अज्ञानाद्वैदेवामोहात्प्रच्यवेनाध्वरेषुयत् स्मरणादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिरितियाज्ञवल्क्योक्तं प्रायश्चित्तमनुष्ठेयं एवंसमाप्तेश्चयोगेअकरणज्ञानेप्येतदेवसमाधानमिति अन्येतुतदंगस्यसांगप्रधानांगस्यचोपवीतित्वादेरकरणेनसांगप्रधानस्यावृत्तिः नाप्युपवीतित्वादेःकरणं किंतुतत्समाधानार्थंविष्णुस्मरणमेवप्रायश्चित्तमित्याहुः श्रीशंभोश्चरणद्वयमाधायतदयांबुजे उद्धवस्थतनूजेन काशीपुरनिवासिना ९ श्रीमतानेनदेवेनपरिभाषानिरूपिता गुरवस्तेनतुष्यंतु विद्वांसश्चतथामयि ॥२॥ ॥इतिश्रीमद्धूर्वेदि उद्धवात्मजेन श्रीमद्धूर्वेदिश्रीदेवानुजेन श्रीमद्धूर्वेदि अनंतदेवेन विरचिते श्रीरुद्रकल्पद्रुमेपरिभाषा अथप्रसंगादितरसर्वकर्मसाधारणान्यपिगणपतिपूजनादीनिस्वस्तिवाचनोनानिरुद्रागानिनिरूप्यते ॥

तत्रतावद्गणपतिपूजनं तदुक्तं पद्मपुराणे नार्चितोहिगणाध्यक्षो यज्ञादौयत्करोतिमाः तस्माद्विघ्नसमुत्पन्नंमत्कोधजमिदंतवेति अस्माच्चार्थवादाद्विघ्नन्यनेइष्टेअब्रह्मवर्त्तेपि कुंडिराजःप्रियःपुत्रोभवान्याःशंकरस्यच तस्यपूजनमात्रेणत्रयोपिवरदाःसुराःत्रयोब्रह्मविष्णुशिवाः भवानीशिवगणेशाइतिवा गणेशःसर्वदेवानांमोदोपूज्यःसदैवहि सर्वेरपिमहाविघ्नानाशकोन्यानविद्यतइति पूजाविधिमाहरुद्रपद्धतिकृत्यारुरामः गणेशंपूजयेत्पूर्वंनिर्विघ्नार्थंस्वकर्मणः पद्मेवासृन्मयेपीठेरुद्रवस्त्रेःरुणाक्षतैः कार्यमष्टदलंपद्मंतस्योपरिगणेश्वरगणानांचेतिसंस्थाप्यपूजयेत्तदनेतरं गणेश्वरंसंस्थाप्यगणानांचेतिमैत्रेणपूजयेदित्यन्वयः हेहेरंबमेत्यहिआवाह्येवंगणेशंतंपूजाद्रव्यैःसपूजयेदितिस्थापनंगणेशप्रतिमायाः पूजायामेतन्नभीवादिबाहनंमप्यनेनैवमंत्रेणज्ञेयं गणानांचेतिमंत्रपरिसमाप्तिरुक्तकांडिकायांसमास्याज्ञेयासर्वत्रस्मार्तकर्मणिमंत्रावसानबोधकप्रमाणाभावेमंत्रस्यकंडिकांतत्वात् उक्तंचरेणुकारिकायां गृह्यकर्मरुद्रयेमंत्राःज्ञेयास्वाध्यायपाठतः किंचमध्यमवृत्योक्तंनुतानविलंबिताइतियत्तुकाशीदीक्षितैर्विघ्नानाथभट्टश्चमयोगरत्नेरुद्रयज्ञेचगणानांत्वेत्यमंत्रोवसोममेत्यंतइत्युक्तंतत्कारणंवशरवाविषयं काणवशारवायोगणानांचेतिकंडिकायांवसोममेत्यंतायाएवसमाधानत्वात्तथैवमित्युक्तमंत्रैः तत्रहेहेरंबचमेत्यहीत्यादयः तेषांगणानांचेतिमंत्रेणमहाव्याहृतिभिश्चसहविकल्पः विनायकंतथादुर्गांवायुमाकाशमेवच आवाहयेद्यात्रतिभिस्तथैवाश्वकुमारकाविति ग्रहयज्ञेमत्स्यपुराणवचनात् उपचारैःसमिद्भिरश्वत्थनैरुक्तचंदनैः पुष्पैर्धूपैस्तथादीपैर्नानाखाद्यनकशोभनैः इतिपंचोपचारैश्चयन्मयापूजनंकृतं प्रारब्धकर्मसिद्ध्यर्थंदेवायकल्पयामितत् नालिकेरेणदेयोर्घ्यःफलेनफलकांक्षिभिरिति अर्घमंत्रान्प्रार्थनामंत्रांश्चप्रयोगेवक्ष्यामः इतिपंचोपचारैरितिवाक्येपंचोपचारग्रहमुपलक्षणंतेनषोडशोपचारा श्रयिभवति अतएवपद्धतिकाराः षोडशोपचारैः पंचोपचारैर्वी

पूजेत्याहुः षोडशोपचारास्तु आचारचिंतामणौ पंचायतनपूजायामुक्ताः आसनंस्वागतंचार्घपाद्येचाचमनीयकं मधु
पर्काचस्नानवसनाभरणानिच गंधपूष्पेधूपदीपौनैवेद्यंचंदनंतथेति विष्णुपुराणेतु पूर्वमावाहनंप्रोक्तंआसनंतदनंत
रं ततश्चपाद्यमर्घ्यंचततस्त्वाचमनीयकं स्नानंवस्त्रंचोपवीतंततोगंधादिचंदनं पुष्पंधूपंचदीपंचनैवेद्यंतदनंतरं
ततोदेवयः प्रणामश्चततोदेवप्रदक्षिणाविसर्जनंततोदद्यापेदुचारास्तुषोडशेत्युक्तं एतदनुसारशिष्टाचारोपिकृचि
त्तुप्रणामप्रदक्षिणास्थानेतांबूलदक्षणेउक्तेपंचोपचारपूजायांतुनदक्षिणा गंधादिकानिवेद्यांतापूजापंचोपचारिकेत्या
चारचिंतामणौवचनात् षोडशोपचारपक्षेतुस्नानेवस्त्रेचनैवेद्येदद्याद्याचमनंहरेरिति ऋग्विधानवाक्यस्नानाद्यंगत्वेन
चमनंदद्यात् यत्तोपवीतोपचारानंतरमाचमनसमर्पणमंत्रनोक्तं तथापि अर्घस्नानेतथावस्त्रेउपवीतोपहारयोः ततोविरा
डित्यनयादद्याद्याचमनीयकमितिस्नानसूत्रयद्यतोरेवयाज्ञिकोहात्तनवचनात्कार्यं हरेरितिदेवांतरोपलक्षणं क्वचित्तुविसर्ज
नमाग्निमारुताद्ध्वंमनुयाजेश्वरंतावदुत्कृष्यतेयथानवग्रहमखादावंतेविसर्जनं तेनसंवत्सरषोडशोपचारेवपूजापंचोप
चारपूजात्रयत्रस्थापितदेवानांविसर्जनात्माकृमध्येपूजोक्तातद्विषयेतिरामकृष्णभट्टः इति रुद्रकल्पद्रुमेगणपतिपूजनं
अथमंडपदेवतास्थापनं तदुक्तंहेमाद्रौचतुर्विंशतिमते अभ्युदयिकेसंप्राप्ते देवतास्थापनस्मृतं जातिधर्मकुलाम्नाते
लोकानांवृद्धिकारकमिति अस्यार्थोहेमाद्रिणैवमुक्तः अभ्युदयिकश्राद्धेकर्तव्यतयाप्रस्तुते सतिब्राह्मणक्षत्रियादि
जातिविभागेनऋत्यादिषुसमाम्नातंकुलवृद्धैश्चोपदिश्यमानंदेवानांप्रतिष्ठापनंकर्तव्यतयास्मृतं तद्विलोकानांवृद्धेर्मं
गलपरंपरायाःकारणमिति मंडपश्चविवाहादिपंचकर्मसुकार्यः तदुक्तंपारस्कारगृह्ये पंचसुबहिःशालायांविवाहेचूडा
करणमुपनयनेकेशांतेसीमंतोन्नयनइति अस्यार्थः विवाहादिषुपंचसुसंस्कारकर्मसुबहिर्वाद्योग्नृत्योर्लौकिकोग्निर्भ

वतीत्यर्थः कर्कोपाध्यायाअपिविवाहादयश्चाग्नृत्याग्निविषयइति शालायांमंडपेकर्मकर्तव्यमितिशेषः यद्वाबहिः
शालायामित्येकं पदं गृहाद्बहिर्बाह्याशालाबहिःशालातस्यांबहिः शालायांमंडपइतियावत् अत्राप्यग्निर्लौकिकएव बहिःशा
लाविधानसामर्थ्यात् नहिकर्मार्थंवचनमंतरेणावसथाद्गृह्याद्बहिरावसथ्याग्निप्रणयनंसंभवति औपासनमरण्यपर्यंत
मेवेतिशूलगवपशौसूत्रारंभसामर्थ्यात् यदिहिकर्मार्थेगृह्याग्नेर्गृह्याद्बहिः प्रणयनंस्यात्तर्हि शूलगवार्थत्वेनापिप्राप्तत्वा
त्पुनस्तदर्थत्वेनोपासनमरण्यपर्यंतमेवतिसूत्रारंभोनिरर्थकएवस्यात् किंच आवसथ्योग्नृत्यःशालाग्निरित्यन्वर्थसंज्ञा
करणादप्ययमर्थोलभ्यते यदयमावसथ्याग्निर्विनावचनमन्यत्रकर्मार्थंनप्रणेतव्यइतिकिंच आवसथ्यशब्दप्रवृत्तौ
त्यावसथंसंबंधोनिमित्तं आवसथसंबंधाभावेचशब्दप्रवृत्तिनिमित्ताभावाद्बहिःप्रणीतेतस्मिन्नावसथ्याग्नेर्निमित्तापा
येनैमित्तिकस्याप्यपायादावसथ्यशब्देनभवर्तेत तस्मान्नृत्याग्नेःप्राप्त्यभावादग्निसाध्याद्विवाहादिषुलौकिकोग्नि
रेवभवति ननुचाग्निमादधीतेत्यात्मनेयदादात्मसाध्याग्निक्रियाफलकानोभवर्मणामाधानंसंपाद्याग्निसाध्यत्वावगमादथो
दन्यगाग्निक्रियाफलककर्मणांस्वहितेग्नौनिषेधप्रतीतेः यस्माग्नावन्यद्धोमःस्यात्सैवश्वानरदेवतं चरुंनिरूप्य जुहुयात्प्राय
श्चित्तंतुतस्यवतइतिछंदोगपरिशिष्टेकात्यायनेनप्रायश्चित्तविधानाच्चैतानि संस्कारकर्मणिलौकिकाग्नावेवभवितुंयुक्तइति
पुनर्विधानेकिमर्थमितिचेत् अत्रोच्यते गृह्यस्थालीपाकानांकर्मत्वेनोपक्रमबलात्कृतसंस्कारहोमाः स्विष्टकृदवसानाःस्युस्तन्माभूदि
त्येतदर्थमन्यथापुत्रानुत्पाद्यसंस्कुर्यादित्यनेनकृतसंस्काराणांस्वाधिकारिकलावगमाज्ज्ञातेहिन्यायाद्गृह्यस्थालीपाकानांकर्मे
त्युपक्रमाच्चकृतसंस्कारकहोमाःस्विष्टकृदवसानाःस्युरेव तथाग्निमिन्मतेग्निसंबंधेगृह्यसूत्रेविहितान्यकर्मव्युदासार्थंच पंचस्वेवा
ग्निसंबंधेचनग्निरधिक्रीयतेनान्यत्रेतिएवंचसतिहिनीयविवाहोग्निमतेतिलौकिकाग्नावेवभवति बहिःशालाविधानसाम

र्थादेव नहिबहिःशालायामवसथ्याग्निप्रणयनसंभवतीत्युक्तं नचस्वस्थानस्थितेगृह्याग्नावेवविवाहहोमःस्यादितिवाच्यम् बहिःशालाविधिविरोधात्यत्तुछंदोगपरिशिष्टे सदारोन्यान्पुनर्दारान्कर्ध्वंचित्कारणांतरात् यइच्छेदग्निमान्कर्तुंकहोमास्य विधीयते स्वेग्नावेवभवेद्धोमोलौकिकेनकदाचन नत्याहिताग्नेःस्वंकर्मलौकिकेग्नौविधीयत इतिकात्यायनवचनंयच्चो क्तंप्रायश्चित्ताध्याये देवपद्धतौ भार्यायांविद्यमानायांद्वितीयामुद्वहेद्यदि तदैवबाहिकंकर्मकुर्याद्गवसथ्याग्निमानितिनत्छंदो गविषयं अतएवोक्तंदेवपद्धतौ स्मृतिचंद्रिकायां जीवत्यामपिज्येष्ठायांद्वितीयस्त्रीपरिणयनेकृतउत्सर्गेश्रौताग्नीनुत्सृज्यान्य यासहपुनरादध्यादिति हरिहरभाष्येपि अक्षयदक्षिणावसथ्याधानोयजमानःप्रजार्थीकामार्थीवोद्वहेत्तन्नान्येअरणी संपाद्यप्रातर्होमंविधायदिवाविवाहंकृत्वाश्वचतुर्थीकर्मणोहोमंत्यक्त्वातदंतेअतिक्रांतहोमद्रव्यं दत्वापंचमेहनिपुनराधानंय थोक्तमित्येकःपक्षः प्रातर्होमंकृत्वादिवाविवाहं संपाद्यसद्यश्चतुर्थीकर्मचकृत्वातद्दिनएवावसथ्याधानमितिद्वितीयः अत्रपक्ष द्वयेपिपूर्वारणयोःस्कोदितयोरवसथ्येदहने अन्यारणयोराधानं पात्राणितुतान्येवयत्नसदारोन्यान्पुनर्दारानित्यादिके नत्या हिताग्नेःस्वंकर्मलौकिकेग्नौविधायतइत्यंतेछंदोगपरिशिष्टेपुनराधानाभावप्रतीपादनंतत्छंदोगविषयमित्युक्त इत्थमभिहृध ताहरिहरेणविवाहहोमभावसथ्याग्नेःकुर्वतोतुनपुनराधानमित्येतदभिहितंभवति अन्यथापुनराधानाभावप्रतिपादनमि तिहरिहरोक्तेरसंगतत्वापत्तेः नत्यनेनछंदोगपरिशिष्टेनपुनराधानाभावःप्रतिपाद्यते किंतर्हिविवाहहोमस्यावसथ्याग्नावनुष्ठा नमिति तत्रचपुनराधानाभावप्रतिपादनंतत्छंदोगविषयमित्युक्तवताहरिहरेणविवाहहोमस्यावसथ्याग्नावनुष्ठानप्रतिपादन मपिछंदोगविषयमित्युक्तंभवति अत्रगृह्याग्नौविधिस्थालीपाकःकार्यः यएवाहिताग्नेःपुरोडाशास्तएवानाहिताग्नेश्च रवइत्युक्तत्वात् अत्रविवाहादिपदस्यपदसमासतः प्रणयनंतत्तत्तत्तत्तत्संबंधान्यकर्मणोप्युपलक्षणार्थं विवाह इतिचतुर्थी

कर्मणउपलक्षकं तदेकदेशात् अतएव परिणीतायाःस्वगृहंप्रतिनीयमानायःस्त्रियामार्गरक्षोर्थो भेगादिनिमित्ते विहितेनैमित्तिकेकर्मणितमेवाग्निमुपसमाधायेतिविवाहाग्नेरुदीरणानुवृत्तिरिष्यते तच्चधारणंचतुर्थीकर्मार्थं अन्यथाऽन र्थक्यापत्तेः चूडाकरणइतितदव्यवहितपूर्वकालिनोन्नाशनस्याप्युपलक्षणं उपनयनइतिव्रतादेशोपलक्षणं केशांतइतिवद ढ-समाप्यस्नायादित्यादिनाविहितसमावर्त्तनस्नानोपलक्षणं सीमंतोन्नयनइतिश्रुत्युक्तगार्भिकहोमजातकर्महोमानामुपल क्षणं इतिशब्दप्रकारे तेनपाकयज्ञविधानेनविहितोप्यवकीर्णिनः पशुराज्याहुतीवालौकिकेग्नौवभवति हविर्यज्ञविधानेन विहितस्यापितथोक्तत्वात् नव्रात्यस्तोमवदलौकिकेव्रात्यस्तोमाअपिलौकिकेग्नौवेतिकर्कसंप्रदायस्तेन यत्तुदेवयाज्ञिकै र्नौपासनश्रुतेरितिसूत्रेभार्यादिरग्निर्दायादिर्वातस्मिन्गृह्यागणइत्यापस्तंबसूत्रमुद्वाह्यत्यगृहायहितंगृह्येगृहशब्दश्चदंपत्यो र्वर्त्तनेअतश्चयत्किंचिद्दंपत्योर्हितंशांतिकंपौष्टिकव्रतांगभूतहोमादिकंतत्सर्वंभावसथ्येग्नौभवतीति अतएवाहकात्यायनः। नस्वेग्नावन्यहोमःस्यान्मुक्त्वाकांसमिदाहुतिं स्वगर्भसत्क्रियार्थांश्चयावन्नासौप्रजापतेः अग्निस्कनाम्नेयादौहोमसर्वत्रलौ किकः नहिपित्राद्यसमानीतःपुत्रस्यभवतिक्वचित् अतश्चसीमंतोन्नयनंस्मार्ताग्नौकार्य्यमित्युक्तंतत्छंदोगविषयं छंदोगपरि शिष्टश्रुत्येवकात्यायनवाक्यस्योपसंहारात् वाजसनेयिभिस्तुकृतावसथ्येपिसीमंतोन्नयनंलौकिकाग्नावेवकार्य्यं बहिःशा लाविधानसामर्थ्यात् सीमंतोन्नयनार्थत्वेनबहिःशालायांगृह्याग्नेःप्रणयनस्याशक्यत्वादित्युक्तंतच्च नचस्वस्थानस्थितेशा लाग्नौस्यादितिवाच्यं बहिःशालाविधानविरोधात् नचशारवोतरोपसंहारन्यायेनगृह्याग्नौस्यादितिवाच्यं आकांक्षायाअ भावात्तस्यशारवाविरुद्धत्वाच्च अतएवगर्गोपाध्यायाः विहीदिपंचकर्मसुलौकिकाग्निमुवुः कर्कोपाध्यायाश्चापि विवाहादय स्त्वाग्नृत्याग्नविषयइति यत्तुक्तं गृहशब्दश्चदंपत्योर्वर्त्तनेइति तच्चिंत्यं सर्वनिबंधेषुहिदारवचनस्यशालावचनस्यवागृह

शब्दस्य दृष्टत्वेन दंपत्योर्वचनस्य गृह शब्दस्य काण्यदर्शनात् यदप्यत्र श्वयत्किंचिद्दंपत्योर्हितं शांतिकपौष्टिकव्रतांगभूतहो
मादिकं तत्सर्वं भावसध्यग्नौ भवतीति दर्पिगृह्यसूत्रोक्तकर्मविषयं तस्मिन् गृह्याणि इत्यापस्तंबसूत्रात् गृह्याणि गृह्यसूत्रोक्ता
नीत्यर्थः धर्मशास्त्रपुराणोक्तेषु तु यत्रैवविशेषोपासनाग्नेर्विधानं तत्रैवोपासनाग्निरन्यत्र तु लौकिक एव तथाचोक्तं स्मृत्यर्थसा
रे ग्राह्यौपासने कुर्यात्सर्वा धानात्तु लौकिके स्मार्ते तु लौकिके कार्ये श्रौतं वैतानिकाग्निषिति गृह्यसूत्रविहितं गार्ह्ये
सर्वा धानमस्त्र औपासनाग्नेरभावाल्लौकिकेतत् स्मृतिपुराणादिविहितं तु स्मार्ते तेनशांतिकपौष्टिकव्रतहोमतुला
ग्रहयज्ञमहारुद्रनवरात्रानादिव्रतशतचंडीड्या होमास्तौ यंगया श्राद्धादीनि चलौकिकेग्नौ भवंति एतच्चाग्निनिर्णये
विस्तरतो वक्ष्यतइत्यलं प्रसंगागतचिंतया प्रकृतमनुसरामः मंडपकर्मकर्त्तव्यमित्युक्तं मंडपश्चवसिष्ठेनोक्तः षोड
शारत्निकं कुर्याच्चतुर्द्वारोपशोभितं मंडपंतोरणैर्युक्तं तत्रवेदिं प्रकल्पयेत् अष्टहस्तं तुरत्नेमंडपंवाह्निषट्करमिति
हिगुणिताः षट्करास्यस्य नंदाद्शहस्त उत्तमः षोडशोहस्तोमध्यमोद्वादशद्शहस्तोधमोऽष्टहस्तः अयंचवैकल्पिकोमं
डपोगृहमानतएवकार्योनतुस्वेच्छया तदुक्तंसमधिमतेविवाहपटले मंगलेषुचसर्वेषु मंडपोगृहमानतः कार्यःषोडशह
स्तोवाह्निषट्कुस्तोद्शावधीति गृहमानइतिमहतिगृहेमहान्मंडपोन्यूनेन्यूनइत्यर्थः द्शावधीतिन्यूनतायांद्शमंरत्नावधि
रित्यर्थः अतोवसिष्ठोक्तोऽष्टहस्तपक्षोऽत्यंताल्पविषयः अत्रवेद्यपुक्तानारदेन हस्तोच्छ्रितावत्तुर्हस्तैश्चतुरस्रासमंततः॥
स्तंभैश्चतुर्भिः कुशलक्ष्णोवामभागेस्वसद्मनः समंडपांचतुर्द्दिक्षुसोपानैरुपशोभितां अगुदक्प्रवणांगारैर्भास्तंभैर्हैस
शुकादिभिः विचित्रितांचित्रकुंभैर्विचित्रैस्तोरणांकुरैः एवंविधांममागेहेन्मिथुनेसाग्निवेदिकांकृतिं साग्नीतिभिन्नपदं
मिथुनस्यविशेषणं वेद्यांविशेषःसप्तर्षिमते स्तंभैश्चतुर्भिरेवात्रमध्येवेदिप्रतिष्ठिता॥शोभितांचित्रितांकुंभैरास

मंतांश्चतुर्द्दिक्षु द्वारविद्धावलीविद्धाकूपवृक्षसमधातथा नकार्यावेदिकातत्रैः शुभामंगलकर्मणीति वलीकाक्षुपाषाणादिनि
र्मितस्तंभः रेणुकारिकायामपि अविघ्नकारिणंदेवंविघ्नराजंप्रपूज्यच्च षोडशारत्निकंकुर्याच्चतुर्द्वारोपशोभितं मंडपंतोरणैर्युक्तं
तत्रवेदिंप्रकल्पयेत् अष्टहस्तोभवेद्वापि मंडपोयोवाह्निषट्करः पृथुचैर्घ्यधिकरविधेयाहस्तोच्छ्रयाः पंक्तमंदिष्टकाभिः बद्धा
गृहान्निर्गमदक्षिणेनविवाहेदक्षिमिकतोपकीर्णा आद्यावेदीब्राह्मणस्योपदिष्टा हाद्यामुनाक्षत्रियस्यांगुलाद्यां वैश्येशूद्रेत्यधि
हीनाहिसैववेदीमानंवैवसिष्ठेनचोक्तमिति अध्वर्यवश्चत्वारः व्रतबंधेसंस्कार्यत्वाद्दुहस्तेनैववेदीनिर्माणं विवाहेतु कन्यागृह
एववरपूजनस्योक्तत्वाद्गृहस्याश्रमस्यतदापत्तत्वात्कन्याहस्तेनैववेदीनिर्माणमित्युक्तं स्मृतिकौस्तुभे मंडपादौस्तंभनिवेशनंतुवृषा
ङ्राशीत्रयेसूर्यसतिआग्नेय्यांकार्यं सिंहाद्राशित्रयेईशान्यां वृश्चिकाद्राशीत्रयेवायव्यां कुंभाद्राशीत्रयेनैर्ऋत्यां अन्याश्चदिक्षुव्युत्
क्रमेणराहोर्मुखंमध्येषुडुंचतिष्ठति अतस्तत्रस्तंभनिवेशनमुचितं यदाहविश्वकर्मा वेद्यांवृषाङ्गृहे सिंहाश्रिकंभीनास्त्रा
लये ईशानतोव्यस्तगत्यापृश्चिस्तस्यशुभावहेति तस्यराहोर्वृषादित्रयेसूर्यसतिईशानदिशिमुखं अग्नेव्यस्तगत्याविलोम
मित्यर्थः पृष्टिः पृष्टदिक् आग्नेयांशुभायत्तूक्तं शिल्पशास्त्रेविश्वकर्मणा कन्यासिंहेतुलायां भुजगपतिमुखंशंभु कोणेग्निरवाते
वायव्येस्यात्तदास्यं मकरधनुरलावीशखानंवदंति कुंभमीनेचमेषेनिर्ऋतिदिशिमुखंवायुकोणेहिखातं वह्नेः कोणेमुखंवैवृष
मिथुनगतेकर्कटेरक्षखातं इतितद्गृहविषयं गृहेसिंहादित्यकत्वात् अमुमेवार्थमभिप्रेत्योक्तंसंग्रहे स्तंभाः स्थाप्याः क्रमाद्
र्के वृषराशेस्त्रिभेस्त्रिभे आग्नेय्यांचतथैशान्यां वायव्यांनिर्ऋतौदिशीति तेदिशांति मंडपप्रतिष्ठाविधिरुक्तोरेणुकारिकार्यो मंडपस्थापनं
कुर्यात्स्वस्तिवाचनपूर्वकं चतुरोब्राह्मणांस्तत्र पूजयेद्दक्षिणादिभिः नंदिनीनलिनीमित्र्याउमाचपरुवर्द्धनी मैडपस्थापने
योज्याःस्तंभेमात्राःप्रकीर्तिताइति इतिरुद्रकल्पद्रुमेमंडपदेवतास्थापनविधिः अथमातृपूजनं तदुक्तंडंडपरिशिष्टेऽ

त्यायनेन कर्मादिषुचसर्वेषुमातरः सगणाधिपः पूजनायाःप्रपञ्चेनपूजिताःपूजयंतिताइति सर्वेषुकर्मादिषुसर्वैवैदिककर्मारंभे
त्यर्थः मातरश्चतत्रैतेनोक्ताः गौरीपद्माशचीमेधास्सावित्रीविजयाजयादिवसेनास्वधास्वाहामातरोलोकमातरः धृतिःपुष्टि
स्तथातुष्टिरात्मदेवतयासह गणेशेनाधिकात्यतावृद्धौपूजाश्चतुर्दशेति अंतेश्रुतमपिगणपतिपूजनमादौकार्यं आदौविना
यकःपूज्यो अंतेचकुलदेवताइतिस्मृतिकौस्तुभेबह्वृचपरिशिष्टात् एतेनमहानरत्नादिनामंतेगणपतिपूजोक्तिरनादरणीयाइदं
त्वगणपतिपूजनमातृपूजांगं मातरःसगणाधिपाइत्यनेनसगणाधिपानांमातृणांपूज्यत्वविधानेनगणपतिपूजायामातृपूजांग
त्वावगमात् अतएवकर्मारंभेनिर्विघ्नफलसिद्ध्यर्थंमध्येगणपतिपूजनंभवतीत्युक्तवता श्राद्धादिपाकरूतामहारुद्रपद्धतिकृता
काशीदीक्षितेनचैवमेवदर्शनान्निर्विघ्नफलसिद्ध्यर्थंकाद्रिनिबंधेमुक्तं एवमेवमहानरत्नदानकांडेजलाशयोत्सर्गकांडेच नचा
त्रसंप्रतिपन्नदेवताकत्वात्मदशाप्राजापत्यानितिवक्तव्ये गणगणपतिपूजास्यादितिवाच्यं निर्विघ्नफलसिद्ध्यर्थंयागणपति पू
जायाः पुरुषार्थत्वेनमातृपूजांगंभूतायइकर्मार्थत्वेनचफलभेदात् प्राजापत्येचतुफलेक्वादेशकालकर्मैक्याच्चनंवता इ
हतुसत्यपिदेशकालकर्मैक्येफलभेददेवतंत्रता अतएवकात्यायनः कर्मणांयुगपद्भावस्तंत्रमिति तंत्रंएकस्यफलकर्मदे
शकालद्रव्यदेवतागुणसामान्यइत्यनेनफलसाम्यादीनितंत्रत्वेकारणान्यभिधायफलादीनांभेदेतंत्रभेदाह नैष्टदेभेदइति
मंडपदेवतास्थितियागणपतिमातृपूजयोर्मध्येव्यवधानेतुनेयंतत्रांशकानचेत्तरे मातरालोकमातरइतिसर्वासांविशेषणं ए
तामातरोलोकमातरोभवंति एतामातरोवृद्धौपूज्याइत्यर्थः ततश्चवृद्धौपूज्याश्चतुर्दशेत्यपपद्यते एवमेवनारायणबृहत्
वाशिष्ठेत्यभाष्येच परशुरामोप्याह गौर्यादिनुष्टिपर्यंतामात्मदेवतयासह गणेशेनाधिकात्यतावृद्धौपूज्याश्चतुर्दशेति
हेमाद्रिरूपनारायणमहानरत्नदानसागरदानप्रदायादिकागस्तपूज्याश्चषोडशेत्येवमातरोलोकमातरइतिपरिगणनातःपठंति

तत्रहेमाद्रिकागादिसकलशिष्टपरिग्रहेणप्रामाण्यनिश्चयादुक्तोयेपक्षइतिकेचित् उभयत्रापिशिष्टपरिग्रहस्यविशिष्टत्वेनप्रामा
ण्यनिश्चयाविशेषाद्वावपिपक्षौयुक्तावित्यन्ये अतएवपद्धतिकौस्तुभेहेमाद्रौप्रतिष्ठाकांडोदाहृतानांपोरा
णानांगोर्याद्यावाहनलिंगकानांचतुर्दशमंत्राणांभेदसत्वाच्चतुर्दशेत्येवपाठः श्रेयान् अतएवाग्निहोत्राध्ययनसंप्रदायसमाग
तंपाठंसम्यक्जानंतः परिशिष्टाध्येतारोपिवृद्धौपूज्याश्चतुर्दशेत्येवंपठंति अत्रकेचित् मातरःसगणाधिपाइत्यत्रमातृणांगौ
र्याद्यविशेषितानांपूज्यत्वावगमात्तासामेवमिलितानांदेवतात्वंनतुगौर्यादिविशेषितानां अश्रुतत्वात्तासां यद्यपिगौरीपद्मेत्या
दिनाविशेषिताएवमातरोदेवतात्वेनश्रूयंते तथापितस्यवचनस्योद्देशमात्रपरत्वान्मिलितानामेवमातृणांदेवतात्वमितिमन्यंते
अन्येतुगौर्यादीनांप्रत्येकंदेवतात्वमाहुः युक्ततरमिवचैतत् अन्यथाबहुत्वविशिष्टमातृणामेकदेवतात्वेवृद्धौपूज्याश्चतुर्दशेति च
तुर्दशसंख्यानुपपत्तेः दशोपचारेर्दशधाप्रत्येकंनामभेदतइतिरुद्रयामले प्रत्येकंपूज्यत्वविधानानुपपत्तेश्च हेमाद्रौप्रतिष्ठाकां
डोदाहृतेगौर्याद्यावाहनलिंगकचतुर्दशमंत्रविरोधापत्तेश्च किंच आदौविनायकःपूज्यःस्यादंतेकुलदेवताइतिबह्वृचपरिशिष्टे
मपिप्रत्येकंदेवतात्वएवोपपद्यते इतरथाह्यादितत्तद्भावःस्यात् मातरःसगणाधिपाइतिप्रयोगस्तुअभिधानक्रियापेक्षयाप्यु
पपद्यतेगर्गभोज्यंतामितिवत् तस्मात्प्रत्येकंदेवतात्वं वाजसनेयिभिश्चयद्यपिस्वगृह्येमातृपूजाविधेरनुक्तत्वात् सर्वेषामपि
पक्षाणांस्वगृह्योक्तंविधायेतेस्वगृह्योक्तस्यचाभावेग्रहणंस्वेऽयाभेवादितिसंग्रहवचनाच्चछंदोगपरिशिष्टेकात्यायनोक्तमात
रश्चतुर्विंशतिमतोक्तावामातरोविकल्पेनपूज्याइत्यवगम्यते तथापिछंदोगपरिशिष्टोक्तएवमातरः पूज्याः सूत्रपरिशिष्टयोरेक
कर्तृत्वात्संस्कारमतस्याश्रयणीयत्वाच्च तथाचस्मृतिसंग्रहः नगृह्योक्तानिस्मृतिर्येषांश्राद्धादावुपलभ्यते कर्तुमर्हतितेसर्वेसंस्कार
मुनीशिनोमिति पेरेषांकरोतीतिव्युत्पत्तेः श्राद्धकाशिकायांमप्येवं एवमेववाजसनेयिनःसमाचरंति केचित्तुछंदोगपरिशिष्टो

१६ क्तानांच तुर्विंशतिमेतेषां चमातृकाणांसमुच्चयमाहुः तन्तुवाजसेनेयिनां तथाचारदर्शनादुपेक्षणीयं यथाकुलाचारंव्यवस्थापनीयंवा एवंचसतिचतुर्विंशतिमतेषां मातरइहोपयोगाभावान्नोपन्यस्ताः पूजाविधिमाह छंदोगपरिशिष्टेकात्यायनः प्रतिमासुचशुभ्रास्फटिकस्फटिकाविल्वापटादिषु अपिवाक्षतपुंजेषुनैवेद्यंचपृथग्विधेरिति प्रतिमास्फटिकप्रतिकृतिषु शुभ्रास्फटिकजातस्फटिकाहेमपीठेषु शुभ्रहारस्त्रितिपाठेप्ययमेवार्थः अथमुख्यकल्पोऽनुकल्पमाह लिखित्वाविल्वापटादिष्विति वर्णकलिखितावातत्रविनायकप्रतिमास्वरूपंहेमाद्रौमध्यपुराणे स्वदंतंदक्षिणकरेउत्पलंचतथापरे लड्डुकंवामहस्तेचैववामतः संप्रकल्पयेत् संयुक्तंबुद्धिरूद्धिभ्यांमध्यस्तान्मूषिकान्वितमिति तत्रैवसिद्धार्थवृत्तायांचंद्रार्द्धनवचक्षुर्भ्यांभास्करेणशशिनाचविद्योतेकरायस्याःपद्मासनाप्रकीर्तिता १ कास्कव्यजनीचैवव्यंजनंसमिधंतथा याविभर्तिकराग्नेःसाशचीनाम्नीप्रकीर्तिता २ धत्तेयासमिधंहस्तेरजनीकारकावपि क्रमतस्तालवृंतंचसाचमेधाःप्रियायते ३ अक्षसूत्रंस्रुवंचैवशक्तिंकांचकमंडलुं कलयंतिकरायस्याःसावित्रीसामकीर्तिता ४ पाकपात्रंचकोशंचपायूषंपाशमेवच याबिभर्तिकरांभोजैर्विजयासाप्रकीर्तिता ५ क्रमात्तोशकपालंचपीयूषंचसपाशकं आश्रित्ययत्करांभोजैर्विजयंतेजपाचसा ६ तत्सागरसंहितायां दर्पणंपंकजंपद्मंपुष्टिकांक्षंधतोस्मरेत् पुष्टिंलक्ष्मींसितांसोम्यांपंकजासनसंस्थितां ७ वज्रंपद्मंतथादर्शंपीयूषंदधतिस्मरेत् समातुष्टिर्महालक्ष्मीःस्थितावाराससंस्थिता ८ तदेवंविशेषतः कासांचिन्मातृणांस्वरूपंदर्शितं सामान्याकारेणतुसर्वासांमहापंचरात्रेउक्तं पूज्याश्चैतेऽथवार्चायांवरदाभयपाणायइति आपत्कल्पमाह अक्षतपुंजेष्वपिवामातरः पूजनीयाइत्यनुषंगइतिनारायणवृत्तिकृताव्याख्यातं आश्वलायनकाशिकाकारस्तुजातकर्मणिबालानांनामाकरणकर्मणि निष्क्रमणेप्राशनेचयवस्थेमातृपूजनमितिवचनाद्वाशब्दोव्यवस्थितविकल्पार्थइत्याह रेणुकारिकायांतु॥ १६

कुलानुरूपमोद्देश्यमनोदेवतानांहरिद्रारंजोभिर्लिखित्वाभूवल्ल्यै प्रतीचीमुखाःस्थापयित्वाभूकूड्येततः प्राङ्मुखःपूजयेत् पुष्पधूपेरितिविशेषउक्तः अक्षतपुंजायवमुष्टयइतिनारायणवृत्तिआश्वलायनकाशिकादयः युक्तंचैतत् अक्षताभूयवाःप्रोक्ता भत्रस्थाधानाभवंतिते भ्रष्टाभूव्रीहयोलाजाः घटाःस्युर्वाडिक उच्यतइतिछंदोगपरिशिष्टेकात्यायनोक्तेः अक्षताभूयवाःप्रोक्ता अभावेव्रीहयस्मृताः तदभावेचगोधूमानतुरवंडितंदुलाइतिपराशरोक्तेश्च निवेदनीयैश्चनानाविधैर्गंधपुष्पधूपदीपदधिपायसमोदकापूपादिभिः चकाराभक्तिभ्रष्टसमुच्चयेइतिनारायणवृत्तौ गंधनांबूलवस्त्रादिश्चशब्दार्थइति
घ्यो निश्चाश्वलायनकाशिकायां आघ्रेयैर्गंधपुष्पैश्च धूपंनिवेदयेदितिवाक्ये अर्घ्यग्रहणेनवोपचारपूजाऽवशिष्टेति घोत्यतइत्युक्तंस्मृतिकौस्तुभे रुद्रयामलेतुविशेषः अमंत्रास्थापयामीतिमंत्रेणनामभेदतः स्थापयित्वाततःप्राणान्प्रतिष्ठाप्यप्रपूजयेत् दशोपचारैर्देवेशिप्रत्येकंनामभेदतः आदौगणाधिपःपूज्यःस्यादनेकुलदेवताइति एताश्चषडर्थानुसमयेनपूजनाइतिरुद्रषड्ढतोनारायणभट्टाः ग्रहपूजापिषडर्थानुसमयेनैवेति शांतिदानमयूखयोः अत्रनिर्वापवत्पूजेवषडर्थानवैकोपचारसमर्पणेषडर्थः तस्यमुष्टिवत्षडर्थावयवत्वात् अक्षतपूजादौपूजनेत्यावाहनादिविसर्जनांतंसर्वत्रकार्यं प्रतिमापूजनेत्यावाहनविसर्जनेनस्तः एतच्चयत्रयत्रवृद्धिश्राद्धंतत्रतत्रकर्तव्यं यत्रयत्रभवेच्छ्राद्धंतत्रतत्रचमातरइतिछंदोगपरिशिष्टेकात्यायनोक्तेः इदंचमातृपूजनंश्राद्धात्पूर्वंकार्यं छंदोगपरिशिष्टेतथैवपाठात् अकृत्वामातृयागंतुयः श्राद्धंपरिवेषयेत्॥ तास्तस्यक्रोधमंपन्नाहिंसांकुर्वंतिदारुणमितिहेमाद्रौ भविष्येमातृपूजामंतरेणाभ्युदयिकानुष्ठानेनिंदाश्रवणाच्च अत्रकेचित् अकृत्वामातृयागंतिहेमाद्रौ भविष्योक्तेर्मातृपूजनंवाजपेयेनेष्ट्वाबृहस्पतिसवेनयजेतेतिवदाभ्युदयिकश्राद्धांगं आभ्युदयिकश्राद्धांतेचमातृविसर्जनमित्याहुः अपरेत्वाहुः कर्मादिषुचसर्वेषुमातरःसगणाधिपाइत्यादिवचनेनःसाक्षात्क

प्रांगत्वेनावगतायाएवमातृपूजायादर्शपूर्णमासाभ्यामिष्ट्वासोमेनयजेतेतिवत्श्राद्धात्पूर्वकालतामात्रबोधनादंगांगित्वे
मानाभावात्तत्यपिचांगत्वेविसर्जनांतायाएवमातृपूजायाअंगत्वापपत्तेःपूर्वंविसर्जनांतामातृपूजांकृत्वापश्चात्श्राद्धमिति॥
एवंचसतिश्राद्धसंकल्पात्पृथगेवास्याःसंकल्पःवृद्धिश्राद्धांगत्वात् स्मार्तकर्मांगानांपृथक्संकल्पेआचारएवप्रमाणं
प्रधानसंकल्पेनैवांगसंकल्पस्यापिसिद्धेः अतएवयाज्ञिकाःश्रौतकर्मस्वंगसंकल्पंपृथगेनैवाचरंतीति इतिश्रीरुद्रक
ल्पद्रुममातृपूजा अथवसोर्द्धाराः तांश्चपाठक्रमान्मातृपूजासमाप्येवकार्याः एवंताःसंपूज्यकिंकर्तव्यमत्याहकुड्यलग्ना
वसोर्धारेत्यादि शौनकनारायणवृत्तिकारादिभिर्व्याकृतत्वाच्च रुद्रयामलेमातृपूजासमभिधायतत्पुरःसंनिधानेवेत्याद्युक्तेश्चस्म
तिरत्नावलिदानरत्नखंडमदनरत्नढोढमिश्रप्रयोगरत्नादिनिबंधेष्वप्येवंयेतुपूर्ववसोर्द्धाराःकृत्वामाहुःसंस्थाप्यमातृणांवसोर्धा
राणांचयुगपत्पूजनमित्याचरंतितउक्तंग्रंथविरुद्धाचारकत्वादुपेक्षणीयाः वसोर्द्धाराप्रकारस्तुकेदारपरिशिष्टकात्यायनेनो
क्ताः कुड्यलग्नावसोर्द्धाराःसप्तधाराघृतेननु कार्यास्तंचधारावानातिर्नाचानचोच्छ्रिताइति वसोश्चेद्विराजस्याग्नेर्वा तदु
द्देशप्रवृत्तेस्तेनततसंबंधिनि वसोश्चसर्वोत्तरप्रवर्तकत्वेनमंगलेहेतुत्वाद्विवाहपुत्रजन्मादिमंगलकर्मसुपूजायुक्तकारयेदि
तिस्वार्थेणिचि सकर्मकलान्नियमार्थोदोतिश्रीकाशिकायांमाशादित्यभाष्यंच वसोर्द्धारास्तुस्वतंत्राएवनतामातृसं
प्रदानिकाःमंत्रलिंगादेर्बोधकस्यास्याभावाद्वसोर्द्धारेतिसमाख्यानाच्चेत्युक्तंश्राद्धदीपिकायां एताश्चवसोर्द्धाराःमातृपूजा
संनिहितकुड्यलग्नाविवक्षिताः परशुरामकारिकायांत्वत्रविशेषउक्तः नातिनावोच्छ्रितेकुड्येवसोधारातुसर्पिषा पंचवा
सप्तधारावावसोर्मंत्रेणकारयेत दुग्धेनवावसोर्धाराःकार्यास्तासांचदेवताः श्रीश्चलक्ष्मीर्धृतिर्मेधास्वाहामज्ञासरस्वती
ति रुद्रयामलेपि तत्पुरःसन्निधानेवाकुड्येरेखाघृतेनैवे धारालिंगनमंत्रेणसमरेखाःसमालिखेत् एकीकृत्यो र्ध्वभागतुरो

चंतंकुंकुमादिना प्रतिष्ठाभिन्नतोकार्यापूजनंसुगंधद्रव्यैश्च चंदनेकुंकुमेपोक्तंदूर्वायुग्मंऋणानिवे गुडधूपोमवेद्दीपःस
र्पिषापरिकीर्तितः नैवेद्यंतुभवेद्दाक्षायणंवदर्घयथेच्छया दशोपचारैःपूर्वोक्तैरर्घदानांतिकैःप्रिये। पूजांगोर्यादिमनुभिर्यथाश
क्त्यविधानतः अनुक्तपूर्वतोयात्यमाम्नायैक्यान्महेश्वरि संप्रार्थयेन्ततोदेवान्मातृधारागणेश्वरान्ति वसोःपवित्रमसि
शतधात्वयंधारालिंगकोमंत्रः पूर्वतोमातृपूजाविधेः प्रार्थनामंत्रस्तुप्रयोगवक्ष्यते ततआयुष्यमंत्रजपःकार्य्यः तदुक्तंदोग
परिशिष्टेकात्यायनेन आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः षड्भ्यःपित्र्यैस्तरन्नुभक्त्याश्राद्धमुपक्रमेदिति आयुष्यं
हिरान्यायुष्यंवर्चस्यमित्यादीनिमंत्रवाक्यानीतिनारायणवृत्तिकृताव्याख्यातं हमाद्रिस्त्वानोभद्राइत्यादिनियान्याशीः प्रधा
नानिसूक्तानितथाविधमंत्रा धारापाणिसामानिचेतिव्याचख्यौ तत्रकर्मादौ यद्यायत्रमातृपूजावसोर्धारांश्चकृतातत्र शांत्य
र्थंमंगल्यनाशायजप्त्वा अत्रजस्वेतिवक्ष्यमाणप्रत्ययादेशाद्वाक्यगतंतदनुशब्दाच्चश्राद्धोपक्रमस्थायुष्यमंत्रजपानंतर्यमवगम्य
ते अतएवमातृपूजावसोर्धाराःयुग्मजपेभ्यो।नंतरंपित्रादिभ्योमातामहादिभ्यश्चश्राद्धदानप्रारंभेदितिनारायणवृत्तौव्या
ख्यातं इतिश्रीमाहिष्मतीवरोद्भवात्मजानंतदेवविरचितेश्रीरुद्रकल्पद्रुमेवसोर्द्धाराः॥ अथाभ्युदयिकंनिरूप्यते ---
--- पित्रंतश्राद्धेवैदिककिंचिदाचरेदिति नानिष्ठातुपित्रंतश्राद्धेकर्मवैदिकमाच निष्ठातुपित्रंतश्राद्धेनकु
र्यात्कर्मवैदिकमित्येवमादिभिः शातातपस्य गर्गपरिशिष्टस्यकात्यायनादिवाक्येस्तस्यवैदिककर्ममात्रांगत्वावग
माद् कर्मत्वाच्च तत्रतावत्कात्यायनसूत्रं आभ्युदयिकेप्रदक्षिणमुप पित्र्यमंत्रवर्जंजपक्रमेवोस्मी
येवेत्तिलार्थःसपन्नमितितृप्तप्रश्नःसंकल्प मुर्द्धधिवरगास्तमिश्राःपिंडानांदीमुखान्पितृतावाहयिष्यइतिपृ
च्छति पितरःप्रीयंतामित्यस्यस्थानेनांदीमुखान्पितृनवाहयिष्यइतिपृ तामित्यनुज्ञातोनांदीमुखाः

पितरंपितामहाप्रपितामहाःप्रमातामह तामहाश्वमीयंतामिनिनस्वधांप्रयुंजीत युग्मानाशयेदत्रेति अस्यार्थः
पिकइति पुत्रजन्मविवाहादिरूपोऽभ्युदयो वृद्धिस्तस्मिन्सतिक्रियमाणंश्राद्धमाभ्युदयिकं शब्देवाच्यंवृद्धिवाच्यंशब्देश्राद्धंवा।
यशोगार्ग्यः अभ्युधानाभिषेकादिविशिष्टंतैस्त्रियाकृतो वृद्धिश्राद्धंप्रकुर्वीत आश्रमग्रहणे तथा पुत्रोत्पत्तिप्रतिष्ठाकृतन्मौंजी
त्यागबंधने चूडायांचविवाहेषुवृद्धिश्राद्धंविधीयतइति ननुचनांदीमुखं कर्मांगमेवेतिसंज्ञाभेदात्कथमाभ्युदयिकं वृद्धिश्राद्ध
मितिसंज्ञाद्वयमुक्तं उच्यते नामान्नचौलगोदानसीमंतोन्नयनपुंसवे स्नानाधानविवाहेषुनांदीश्राद्धं विधीयतइति लौगाक्षी
वाक्येवृद्धिश्राद्धएवनांदीमुखमितिसंज्ञाभेदकथनं तत्प्रयोगविशेषणार्थं तथाच वृद्धवसिष्ठः पुत्रजन्मविवाहादौवृद्धि
श्राद्धंमुदाहृतं तत्रनांदीमुखइतिविशेषःसमुदाहृतइतियत्तुकर्मांगमितिसंज्ञांतरंतदपिवृद्धिधर्मीतिदेशेनतद्रूपमेवसंज्ञाभे
देपिइत्यविरोधः तथाचहेमाद्रौपारस्करः निषेककालेसोमेवसीमंतोन्नयनेतथा ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवत्कृतमि
ति अत्रकर्मांगमितिपरिभाष्यते वृद्धिवदितिनांदीमुखवदेवतावत्स्वाहाशब्दप्रयोगादधिकरादितिअपिंडत्वादयोवृ
द्धिश्राद्धधर्माअतिदिश्यंते विहितंचवृद्धिश्राद्धंयाज्ञवल्क्यादिस्मृतिषुसर्वप्रदक्षिणावृत्तो वृद्धौनांदीमुखान्पितॄन् यजे
तेत्यादिभिर्वचनैः वृद्धिश्राद्धंचवृद्धवसिष्ठादिभिर्दर्शितं पुत्रजन्मविवाहादौवृद्धिश्राद्धमुदाहृतमिति अत्राभ्युदयिक
श्राद्धविशेषेवृद्धिश्राद्धशब्दः परिभाष्यते आदिशब्देनगर्भाधानंपुंसवनंसीमंतोन्नयनव्यतिरिक्तानामन्नप्राशनचूडाकर
णादिसंस्कारकर्मणांग्रहणंगर्भाधानादिसंस्कारत्रयांगभूताभ्युदयिकम्यकर्मांगशब्देनाभिधानात् एतच्चवृद्धिश्राद्धाख्यं
कर्मांगं वृद्धिवदितिपारस्करवाक्येऽतिदेशदर्शनात् भेदेत्यतिदेशोभवति। अत्रनिषेकादिग्रहणमाधानाद्युपलक्षणार्थमि
तिपारिजातादयः सोमशब्देतेषामुपलक्षणार्थइतिमदनरत्नादयः अन्येतुनिषेकादिशब्दानामुपलक्षणार्थतामन्या

प्यामन्यमानानिषेकादिगणितेष्वेवकर्मांगश्राद्धसंज्ञेत्याहुः इदमेवयुक्ततरं तत्राभ्युदयिकेश्राद्धेप्रदक्षिणोपचारः उपचर
णमुपचारः अनुष्ठानंकरणमितियावत् तेनात्रसर्वमनुष्ठानंप्रदक्षिणंभवतीत्यर्थः अत्रप्रदक्षिणग्रहणंकर्मकर्तृमिष्टसक
लदेवधर्मोपलक्षणार्थं ततश्चप्राक्संस्थ्यचोदकसंस्थ्यत्वोपवीतित्वप्राङ्मुखत्वोदङ्मुखत्वदक्षिणजानुनिपातंचदेवतार्थव
त्प्राप्तिदेवधर्मः कृतस्तोत्रभवति यथाहहेमाद्रौशातातपः कर्तव्यंचाभ्युदयिकंश्राद्धमभ्युदयार्थिना सव्येनचोपवीतेन
ऋजुकर्मभिश्चधारता पितॄणांरूपमास्थायदेवाभ्यंसमश्नुते तस्मात्सव्येनदातव्यं वृद्धिश्राद्धेतुनित्यशः यथैवोपचरे
द्देवांस्तथावृद्धौपितॄनपीति छंदोगपरिशिष्टेकात्यायनोपि दक्षिणंपातयेज्जानुंदेवान्परिचरन्सदा पातयेदितरज्जानुं पि
तॄन्परिचरन्नपि निपातोनहिसव्यस्यजानुनोविद्यतेकचित् सदापरिचरेदित्यत्रापितॄनप्यत्रदेववदिति अत्रैकेप्राङ्मुखस्य
कर्तुरुदक्संस्थतायोविधानसामर्थ्यात्प्रादक्षिण्यमपास्येदित्याहुः तत्रापिप्रादक्षिण्यमेवेत्युदङ्मुखस्यैवकर्तृत्वमित्यन्ये एत
च्चमनहृदयंश्राद्धकाशिकाकारउपन्यस्तवान् अत्रब्रूमः प्रागग्रेषुदर्भेषु आद्यमामंत्र्यपूर्ववत्। अपःक्षिपेन्मूलदेशेऽवनि
क्ष्वेतिनिक्षिलाः हितयंचतृतीयंचमध्यदेशाग्रदेशयोः मातामहप्रभृतींस्तुएतेषामेववामतइतिछंदोगपरिशिष्टेकात्यायनेनापि
त्रादीनांवामतोमातामहादीनामवनेजनंविदधतांप्रादक्षिण्यानुग्रहायावनेजनपिंडपंक्त्योर्दक्षिणसंस्थतांविधानात्प्राङ्मुख
स्यकर्तुरुदक्संस्थतायांविधानसामर्थ्यात्प्रादक्षिण्यमपास्येदित्ययुक्तं उदङ्मुखःप्राङ्मुखोवायजमानःसमाहितः वृ
द्धिश्राद्धंप्रकुर्वीतनान्यवक्त्रःकदाचनेतिहेमाद्रौमार्कंडेयपुराणे वृद्धिश्राद्धशब्दवाच्यपार्वणेप्राङ्मुखत्वोदङ्मुखत्वयोर्विक
ल्पस्यविहितत्वेनोदङ्मुखस्यैवकर्तृत्वमित्यप्ययुक्तमेवप्रदक्षिणोपचारइत्यनेनैवदैविकेयेधर्मास्तेसर्वेप्यत्रकर्तव्यानपित्र्य
श्राद्धधर्माइत्यक्तं भवति विश्वान्देवानुद्दिश्यक्रियमाणंकर्मवैश्वदेविकं अत्रत्वप्रकृतिवदेवदेवेप्राङ्मुखाःपित्र्येचोद

ऽप्युदङ्मुखवाविप्राऽउपवेशनायानपुनर्देवधर्मत्वेनसर्वेपिप्राङ्मुखाः तदाहुंदोगपरिशिष्टेकात्यायनः प्रातरामन्त्रितान्विप्रान्युग्मानुभयतस्तथा उपवेश्यकुशानदद्याद्दक्षिणेवर्हिषाणिनेति अत्रप्रातःशब्दः प्रथमघटकात्रयवाचीतिनारायणवृत्तिकृत् अपरेतुभाद्रप्रहरात्मककालवचनः प्रातःशब्दः तदाहगार्ग्यः ललाटसंस्थितेभानौ प्रथमःप्रहरःस्मृतः सएवाध्यर्द्धसंयुक्तः प्रातर्विद्वस्त्वभिधायतइति अध्यर्द्धमधिकार्द्धमाद्यंप्रहरइत्यर्थइत्याहु अतेंद्रतत्वे प्रातर्वृद्धिनिमित्तकमितिवचनादस्यचपूर्वाह्णविधिनातुल्यार्थकत्वाच्चगार्ग्योक्तप्रातःशब्दार्थःआह्निककालविषयः नारायणवृत्तिकृदुक्तःप्रातःशब्दार्थस्त्वामंत्रणकालविषयःप्रातरामंत्रितानितिभूतकालीनईशात् उभयतोदेवपित्र्यवतथा। पार्वणवत्तेदेवप्राङ्मुखान्पित्र्यवदङ्मुखान् हेमाद्रौप्रविष्यत्पुराणे पि। प्राङ्मुखश्चतुरश्चउदङ्मुखान् निवेशयेत्तुभिर्दद्यादामनमादरादिति सर्वानेवतुतान्विप्रान्प्राङ्मुखानुपवेशयेदितिहेमाद्रौ [illegible] छागलेपोक्तेदैवेपित्र्येचयेविप्रास्तेसर्वेपिप्राङ्मुखाउपवेशनीयाइत्यपिपक्षान्तितथापिछंदोगपरिशिष्टेकात्यायनेनप्रकृतिप्राप्तस्यापिब्राह्मणोपवेशनस्यपुनर्विधानात्प्रकृत्यनुग्रहाच्चपूर्वादाद्दतपक्षएवकात्यायनादिसंमतइतिराजसनेयिभिः सएवाश्रयणीयः परंत्वनावान्तिशेषः अत्रप्रदक्षिणोपचारनाविधानान्तदनुग्रहायब्राह्मणपंक्तिनिवेशः प्राग्पक्वमःपश्चादपवर्गएवविधेयइति अत्रकर्तुर्दिङ्नियमोभिहित आश्वलायनगृह्यपरिशिष्टे आप्युदयिकेयुग्मब्राह्मणअमूलादर्भःप्राङ्मुखेभ्यउदङ्मुखेदद्यादुदङ्मुखेभ्योवाप्राङ्मुखेहोवर्भौपवित्रेइति अत्रप्राङ्मुखेभ्यउदङ्मुखेदद्यादितिउदङ्मुखतानियमः उदङ्मुखेभ्योवाप्राङ्मुखइत्यनेनप्राङ्मुखत्वोदङ्मुखत्वयोर्विकल्पउक्तः अतएवहेमाद्रौमार्कंडेयपुराणेउदङ्मुखःप्राङ्मुखोवायजमानसमाहितः। वृद्धिश्राद्धेप्रकुर्वीतनान्यवक्त्रःकदाचनेति॥ अत्रवृद्धिशब्दवाच्येपित्रपार्वणंमातामहपार्वणंचेतिपार्वणद्वयंभवतिनतुनैत्यिकंवृद्धिश्राद्धेहेशनैवनैत्यिकधर्मा

णामेवविधेयत्वात् पूर्वाह्ण पूर्वसूत्राद्विभक्तिव्यत्ययेनहीतियोतमाप्युदयिकपदमत्रानुवर्त्तते ततश्चपूर्वाह्णे आप्युदयिकंविधेयमित्यर्थः प्रकृतेरपराह्णप्राप्तमपेतत्पूर्वाह्णेविधीयते प्रकृतौतुपिंडपितृयज्ञवदुपचारइतिवचनात् अपराह्णप्राप्तिः अतआप्युदयिकंपूर्वाह्णकर्त्तव्यं अत्रपूर्वाह्णस्त्रेधाविभक्तस्याह्नः प्रथमोभागः पूर्वाह्णोवैदेवानांमध्यंदीनोमनुष्याणामपराह्णः पितृणामित्यर्थवादेपूर्वाह्णमध्याह्नापराह्णाणांत्रयाणांदिवसभागानामभिधानात् अतएवछंदोगपरिशिष्टेकात्यायनः। पिंडान्वार्येहोकंआद्यंक्षीणेराजनिशस्यते। वासरस्यतृतीयेशेनातिसंध्यासमापन्नइतित्रेधाविभागमाह विभागस्तुसमोज्ञेयः समंस्यादश्नुतत्वादितिन्यायात्॥ अन्यत्रधेयाप्युदयिकेतुगालवः पार्वणंचापराह्णेतुवृद्धिश्राद्धंतथाग्निकमितिति॥ अग्निकमन्यत्रधेयंनिमित्ताप्युदयिकमपराह्णेतुयादित्यर्थः इदंचध्यानपूर्तेर्हिनेवोद्वायनोक्तनांदिश्राद्धविषयंआपस्तंबसूत्रानुसारिणांतुयत्संभारस्पर्शान्तरंभाष्यकारादिभिरुक्तंतत्पूर्वान्तरपदार्थोनैवैकमत्वान्नपृथक्कालमपेक्षतइतिनतद्विषयं। नापिकात्यायनविषयंविहितोत्यग्न्याधेयोपक्रमोदिवाशनात्पूर्वमाचार्येण॥ दिवाशनंचाष्टधाविभक्तस्याह्नःपंचमभागोदक्षादिभिःस्मर्य्यते। नहित्रेधाविभक्तेहेधाविभक्तेवापराह्णेआप्युदयिकानुष्ठानपूर्वकंक्रियमाणोग्न्याधेयोपक्रमोदिवाशनकालात्पूर्वंसंभवति। यत्रजन्मादौपुनस्तत्कालएवनपुनस्तत्रपूर्वाह्णनियमः। यथाहलोगाक्षिः।नियतेषुनिमित्तेषुप्राप्तवृद्धिनिमित्तकं।तेषामनियतत्वेनुतदंतर्यंमिष्यतइति यद्यप्याप्युदयिकेप्रदक्षिणमुपचारइत्यत्रप्रदक्षिणग्रहणस्यसकलदैवधर्मोपलक्षणार्थत्वेनव्याकृतत्वात्तेनैवसूत्रेणपूर्वाह्णप्राप्तेः पुनःपूर्वाह्णेहीतिसूत्रमनर्थकमिवभातितथापियथैवोपचरेद्देवास्तथावृद्धौपितृनपीतिशातातपेनसदापरिचरेदुक्त्याऽपितृनप्यत्रदेववदितिकात्यायनेनचपितृणांदेववदुपचरणमात्रस्यैवातिदिष्टत्वात्प्रकृतेरपराण्हेहविर्विहितत्वादंगप्रधानयोश्चैककालत्वेनतल्लेषभूतेदेवकर्मण्य

पि अपराह्ण स्येव सत्वान्नाभ्युदयिके प्रदक्षिणमुपचारइति सूत्रस्थप्रदक्षिणग्रहणस्यसकलदेवधर्मोपलक्षणार्थत्वेनेहपूर्वाण्हग्रामिः किंत्वपराण्हएवप्रकृतितः प्राप्नोति। अतआभ्युदयिकस्यपूर्वाण्हे विधानार्थंपूर्वाण्हेइतिसूत्रं वक्तव्यमेवेत्यलं॥ यत्तुमात्राद्याश्राद्धंतुपूर्वेद्युः कर्महिनित्तुपेतृकं। मातामहंचोत्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृतमिति। पूर्वाण्हे मातृकं श्राद्धं मध्यान्हेपैतृकंतथा। ततोमातामहानांच वृद्धौश्राद्धत्रयं स्मृतं इत्यादिहेमाद्युदाहृतगार्ग्यशातातपादिस्मृतिवाक्यैराभ्युदयिकं श्राद्धमेकेकमात्रादिश्राद्धस्यैकैकदिनसाध्यत्वादिनत्रयसाध्यमस्मन्मते पूर्वाण्हादि कालत्रयसाध्यत्वेनैकदिनसाध्यमुक्तंतदन्यशास्त्रावविषयं वाजसनेयिनंतुएकवचननिर्देशादेकवचनपूर्वाण्हे आभ्युदयिकं कार्यमित्यर्थकात्यपूर्वाण्हइतिसूत्राद्याभ्युदयिकश्राद्धस्यैकपूर्वाण्हकालसाध्यतावगमात्। यदितुमात्रादित्रीणिश्राद्धानिसूत्रकृताउक्तानिस्युस्तदातेषांदिनत्रयसाध्यतापूर्वाण्हादिकालत्रयसाध्यतावास्यात्। नचसूत्रकृतात्रीणिश्राद्धान्युक्तानि। किंतु पितृमातामह पार्वणहयात्मकंश्राद्धहयमेवोक्तं। अपिचमात्रादिश्राद्धानांकालभेदात्त्रयोगभेदोभविष्यति सूत्रकारस्तद्धयोःश्राद्धयोःप्रयोगेकत्वंदर्शयतिनांदीमुखाःपितरःपितामहाःप्रपितामहामातामहःप्रमातामहावृद्धप्रमातामहाश्चप्रीयेतामिति। एतच्चप्रकृतिप्राप्तमहप्रयोगएवोपपद्यते। प्रागग्रेषुदर्भेषु आद्यमामंत्र्यपूर्ववत्। अपःक्षिपेन्मूलदेशेऽवनेनिस्त्वेतिपात्रतः॥ हितीयंचतृतीयंचमध्यदेशाग्रदेशयोः॥ मातामहप्रभृतीनामेतेषामेववामतइति छंदोगपरिशिष्टे कात्यायनेननिःसंदिग्धंमहप्रयोगोदर्शितः। आद्यंपितरं। हितीयंपितामहं। तृतीयंप्रपितामहं। नहिप्रयोगभेदेपित्रादीनांवामतोमातामहादीनामवनेजनंसंभवति। यद्यपिअलाभेभिन्नकालानांनांदीश्राद्धत्रयंबुधैः पूर्वेद्युर्वैप्रकुर्वीतपूर्वाण्हे मातृपूर्वकमितिवृद्धमनुवचनेतदपिशास्त्रांतरविषयं यत्रहिमात्रादिश्राद्धत्रयविधिः कालत्रयेसंतितत्रैवानुकल्पतयाकालिकत्वेनविधियुक्तः॥ नहिकात्यायनसूत्रादौ कालत्रयेमात्रा

दिश्राद्धत्रयविधिरस्ति। तस्माद्वाजसनेयिभिरेकस्मिन्पूर्वाण्हेऽवैकप्रयोगंपार्वणहयात्मकंमाभ्युदयिकं श्राद्धमनुरुध्यमितिस्वसूत्रानुरूपं॥ पित्र्यमंत्रवर्जंजपः पित्र्यमंत्रा अग्नत्कृजपेदित्यत्रोक्ताउदीरतामवरइत्याद्यस्तान्वर्जयित्वाजपः कर्तव्यइत्यर्थः। पित्र्यमंत्रग्रहणंमधुमतपितृसंहितायोरुपलक्षणार्थं॥ तथाच श्राद्धकाशिकायां मनुकात्यायनौ॥ मधुवाताजपस्तानेकुर्यात्तत्रयन्ततः। उपास्मैगायतेत्यादिऋचःपंचजपेत्तथेति॥ इदंच मधुमतीजपस्तानेउपास्मैगायंतानर इतिपंचर्चीजपविधानान्मरुत्शास्त्रविषयं मधुवाताऋतायतइतित्र्यृचः स्थानेउपास्मैगायतेतिपंचमधुमतीः श्रावयदक्षन्नमीमदंतेतिचषड्भिरित्याश्वलायनोक्तंमधुमतीजपस्थानेमंत्रांतरजपविधानादेवमधुमतीजपोनिषिद्धएवा। अयंचमधुमतीजपस्याविधानात्। यस्तुमधुमध्वितियस्तत्रत्रिर्जपोशीतुमिश्रितां। व्याहृत्यनेतरं सात्रमधुमंत्रविवर्जितइतिछंदोगपरिशिष्टे भोजनात्प्राक्कालीनोमधुमंत्रजपनिषेधःसछंदोगपरः। कात्यायनीयश्राद्धकल्पेमधुमंत्रजपस्यभोजनात्प्राक्प्रकृतौविधानाभावात्। ततश्चभोजनोत्तरकालविहितोमधुमंत्रजपोभवत्येव। पूर्वकालेनिषेधादित्युक्तेनारायणवृत्तौदानकांडेमदनरत्नेच। छंदोगपरिशिष्टे कात्यायनः। नचाश्नत्सुजपेत्तत्रकदाचित्सहितंजपं। अन्यएवजपःकार्य्यःसोमसामादिकःशुभइति। अत्रस्करावंतमित्याद्यामंत्राःपितृसंहिताश्लेनाभिधीयंतेस्करावंतादिकंसर्वंजपेच्चपितृसंहितामितिश्राद्धकाशिकाकंकारोदाहृतवचनात्। अत्रजपत्वाविशेषादुपंतुनइत्यादीनामपिप्रतिषेधइतिकेचित्। तदयुक्तं। अग्नत्कृब्राह्मणेषुविहितस्यपित्र्यमंत्रजपस्यापित्र्यमंत्रवर्जजपइत्यनेनप्रतिषिद्धत्वेनान्येषांप्रतिषेधाभावादापंतुनइत्यादितपस्यावाहनार्थत्वाच्च। कर्कोपाध्याया अप्येवमाहुः। हेमाद्रिरप्याह अत्रजपशब्दाद्योमुजानेषुहिजेषुपितृलिंगकानांमंत्राणांजपः सएवप्रतिषिध्यतेनतुपदार्थानुधानेकरणीभूतानामपि। अतएवाहजात्कण्र्यः। पितृलिंगेनमंत्रेणयत्कर्ममनुभिःस्मृतं। तेनैवतद्धिधातव्यंममंत्रमकृतंयतइति॥ ऋजवोदर्भाः॥ अ

त्रामूलाक्रजवो दर्भाभवंतिन हिगुणाइत्यर्थः । दर्भाणामग्रमूलत्वविशेषणंमुक्तमाश्वलायनसूत्रे । अभ्युदयिके युग्मब्राह्मणाग्र मूलादर्भाइति । ननुचाभ्युदयिके प्रदक्षिणमुपचारइत्यत्रप्रदक्षिणाग्रहणस्यसकलदैवधर्मोपलक्षणार्थत्वात्प्रकृतौचदैवेकर्मणि ऋजुदर्भाणामिवविहितत्वादिहऋजवोदर्भाः प्राप्तापवर्किमर्थमेतत्सूत्रे । उच्यते । कुशस्थानेचदूर्वाः स्युर्मंगल्याभिवृद्धये इतिहेमाद्रौब्रह्मांडपुराणे दूर्वायाउपदिष्टत्वेनातिदिष्टानामृजुदर्भाणांबाधोमाभूदित्येतदर्थं । एवंचदूर्वापक्षे दर्भैर्विकल्पः । सोपि मंगलात्मकविवाहाद्याश्रमेक्रियमाणवृद्धिश्राद्धेकुशस्थानेदूर्वाविधिर्यज्ञाद्याश्रमेतुक्रियमाणेऽमूलक्रजुदर्भविधिरित्येवं व्यवस्थितइत्यक्तस्मृतिकौस्तुभेकेचित्तुपषाकात्यायनादीनांसूत्रेऽमूलक्रजुदर्भविधिरस्तितेषाममूलक्रजुदर्भविधिर्येषां नास्त्यमूलक्रजुदर्भविधिस्तेषांदूर्वाविधिरितिव्यवस्थापुराणस्यसर्वशाखासाधारण्येनसर्वान्यतिप्रवृत्तत्वेनपान्प्रतिऋजु दर्भविधिः॥ सावकाशत्वात्तत्सूत्रस्यचासाधारण्येननिरवकाशत्वादित्याहुः॥ ॥यवैस्तिलार्थः॥ अर्थः प्रयोजनंकार्य्यमि तियावत्तयस्तिलार्थः समर्थायवैर्निर्वर्तितव्यइत्यर्थः । हेमाद्रौपद्मपुराणेतिलार्थस्तयैवः कार्य्यः सत्यैर्नैवानुपूर्वशः।मंगलानि चसर्वाणिवाचयेद्द्विजपुंगवानिति । तत्रैवविष्णुधर्मोत्तरेपि। वृद्धिश्राद्धेपुकर्त्तव्यास्तिलस्थानेयवास्तथेति । तत्रइज्याग्निधा यकत्वात्तन्मंत्रोपवीसीति यथार्थमूहितव्यः। मंत्रोहश्वाश्वलायनसूत्रेप्रदर्शितः। यवोसिसोमदेवत्योगोसवोदेवनिर्मितः॥ प्रत्नमद्भिःप्रक्तःपुष्ट्यानांदीमुरवासिदन्लोकान्प्रीणाहिनः॥स्वाहेति। अन्यत्राप्युक्तं। तीलोसीतियस्थानेयवोसीतिप दंवदेत्। अन्यत्राप्युक्तं। तीलोसीति)। स्वधयेतिपदस्थानेपुष्ट्याशब्दंवदेद्वृद्धिपित्रर्थेतिपदात्पूर्ववदेवेत्यादि मुरवानीति) ननुचाभ्युदयिकेप्रदक्षिणमुपचारइत्यत्रप्रदक्षिणग्रहणस्यसकलदैवधर्मोपलक्षणार्थत्वात्प्रकृतौचदैवेकर्मणियवैर न्यवर्कार्योथभाजनेसपवित्रके। शन्नोदेव्यापयइत्यायवोसीतियवास्तथेतियाज्ञवल्क्येनयवविधानादैवधर्मत्वेनयव २१

प्राप्तेर्यवैस्तिलार्थइतिसूत्रानर्थक्यमितिचेत्। अत्रब्रूमः। प्रकृतौदैवेकर्मण्यपिअवकारणादितिलैरेवयथास्याद्धितिद्योतनीयनुरुमि मत्वेग्नावेवकार्योऽन्यत्राभावेतुपाणाविति।यत्तुपंचसूनाबहिःशालायांविवाहेचूडाकरणउपनयनेकेशांतेसीमंतोन्नयनइतिपार स्कारेण। नस्वेग्नावन्यत्रहोमःस्यान्मुक्तेकांसमिदाहुतिं।स्वगर्भसल्किर्यार्थीश्रयावन्नोसोप्रजापते। अग्निसूक्तनामधेयादीहोमेस र्वत्रलौकिकः।नहिपित्रासमानीतःपुत्रस्यभवतिसंस्कर्त्तेतिछंदोगपरिशिष्टेकात्यायनेनचलौकिकाग्निविधानंतत्प्रधानभूतसंस्का रकर्मविषयमित्युक्तंगंगाधरपद्धतौस्मृतत्तरमिवेतत्।यत्तागर्भाधानादिसंस्कर्त्तापिताश्रेष्ठतमःस्मृतइति।तत्तसूक्तनामकुर्वीत पितेवदशमेहनिपिताकुर्यादथोवाकुलवृद्धइति। पितेवोपनयेसुतंतदभावेपितुःपितेति।पुत्रानुत्पाद्यसंस्कुर्यादित्यादिभिःस्मृ त्यंतरविष्णुपुराणशौनकस्मृत्यादिवाक्यैःसूक्तसंस्काराणामपिअधिकारिकत्वावगमाद्गर्भाधानेतिस्थात्मनेपदश्रवणादात्मगा मिक्रियाफलकानामेवकर्मणांस्वाहितेग्नौविधानादुपनयनादीनांचतेषामन्यगामिक्रियाफलकत्वात्तेषुस्वाहिताग्नेःप्राप्त्यभावेपि ज्योतिष्टोमन्यायेनतस्मिन्प्राप्तेपंचसूनाबहिःशालायामित्यादिनाअग्निसूक्तनामधेयादीहोमेसर्वत्रलौकिकइत्यादिनाचलौकिकेऽग्निर्वि धीयते। एवंचसतिसूक्तसंस्कारागभूतेवृद्धिश्राद्धेलौकिकाग्निविधेभावाज्ज्योतिष्टोमन्यायप्राप्तःस्वाहिताग्निरेवभवतीतिसूक्तविधि र्विभावनीयंयत्त्वाश्वलायनगृह्यपरिशिष्टे। आन्वष्टक्यंचपूर्वेद्युर्मासिमास्यथपार्वणं काम्यमभ्युदयेष्टमामेकोदिष्टंतथाष्ट मेचतुर्थाद्येषुसाग्नीनांषट्सोमोविधीयते। पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्थेपिइति । अष्टकानामुपरितनानवम्योऽन्वष्टकान्त र्निमित्तश्राद्धमन्वष्टक्यं। अष्टकापूर्वेदीनरूपासूक्तमन्नमीषुक्रियमाणंश्राद्धंपूर्वेद्युः । मासिमासीतियस्यांकस्यांचित्तिथौप्रतिकृ ष्णापक्षंक्रियमाणंश्राद्धं।अमावास्यानिमित्तकंश्राद्धंपार्वणं । पुत्रादिकामनयाक्रियमाणंकाम्यं। अभ्युदयेपुत्रजन्मविवाहादौ क्रियमाणं। अष्टकासंज्ञकायामष्टम्यांक्रियमाणंमुख्येकोद्दिष्टेनोकरणाभावात्सपिंडीकरणस्थेकोद्दिष्टपार्वणोभयात्मकत्वा

देकोद्दिष्टशब्देनलक्षणयासपिंडीकरणमेवोच्यते । तत्राद्येषुचतुर्षु श्राद्धेषु साग्नेरग्नावेवहोमः॥ इतरेषुचतुर्षु श्राद्धेषुनिमंत्रितोपि पाणौहोमइत्याभ्युदयिकश्राद्धेऽग्निमतःपित्र्यब्राह्मणहस्तेग्नौकरणहोमविधानंतत्रछात्रविषयमित्यत्रकं श्राद्धेहोद्वोस्मृतिदर्पणे च॥ कर्कीशयोप्येवं । येनाग्न्यभावेतु विप्रस्यपाणावेवोपपादयेदिति तदकृतावसंध्याधानाभ्युदयिकविषयमित्याह। अकृतावसंध्यस्यपाणिहोमेवदतोकृतावसंध्यस्यलाबसंध्येहोमइत्यत्रकं भवति। अन्यथाकृतावसंध्यस्यापिपाणौ यितुंयचेक्तिलार्थइति सूत्रे। नचयंवैरत्नवत्कार्यमितियाज्ञवल्क्योक्तंदैवेकर्मण्यप्यवकारणादियंवैरवस्यादितिवाच्यं।यदित्यवकारणाहिसाधनत्वंयवानां सूत्रकृतोऽभीष्टंस्यात्तदार्थंवैस्वदर्कार्यमितियाज्ञवल्क्योक्तिर्वचयवानादार्थोकारंकृत्वेतिवमिष्ठोक्तिर्वचसूत्रकृताप्यभिहितंस्यात्। न चतथाऽभिहितं।तस्मान्नयवानांतत्साधनत्वं। अन्यथाप्रक्षिणग्रहणस्यसकलदैवधर्मोपलक्षणार्थत्वेनेहापितत्तद्यवप्राप्तेर्यवैस्तिलार्थइतिसूत्रस्यवैयर्थ्यमेवप्रसज्येत । अतएवप्रकृतौदैवेकर्मण्यपिप्रकरणानुग्रहादवकीरणादितिलैरेवाभिहितंकर्कोपाध्यायेरित्यलं। अत्रार्घदाने विशेषमाहछंदोगपरिशिष्टे कात्यायनः। ज्येष्ठोत्तरकरान्युग्मान्कराग्याग्रपवित्रकान्कृत्वार्घःसंप्रदाव्योनैकैकस्यात्रदीयतइति।युग्मान्पित्र्यब्राह्मणान्ज्येष्ठोत्तरकरान्ज्यष्ठस्यप्रथमोपविशितस्यकरउपरिधार्यते । तथाकराग्रेपवित्राग्रेयेषांतेकराग्याग्रपवित्रकाः तान्स्तथाविधान्कृत्वार्घोदातव्यइत्यर्थः। इदंचछंदोगविषयंतत्परिशिष्टगतत्वादितिस्मृतिरत्नावलिकाकारःतेनास्यमतेप्रकृतिवेदेवार्घदानंनत्विहकश्चिद्विशेषः। अन्येमदनरत्नढोढपद्धतिकाराद्यस्तु अर्घदाने विशेषविधेर्बाजसनेयिशाखाविषयत्वात्साधारण्येमन्यंतेअत्रचशेषंप्रकृतिवदित्यतिदेशेनप्राप्तार्घपात्रस्यन्युब्जतापाप्तवत्येव।श्राद्धकाशिकाकारस्तु अपसव्यंपित्र्यमंत्रावाभजानुनिपातनोन्युब्जंपात्रंनकर्त्तव्यंबह्वृहिश्राद्धेषुसर्वदेतीश्वरवाक्यान्निषेधयमित्याह। तद्धि शेषवाक्यानवलोकननिबंधनमित्युपेक्षणीयं।तथाहि। दत्वापिंडान्नकुर्वीतपिंडपात्रमधोमुखमितिबह्वृचसिद्धेनपिंडपात्रन्युब्जतानिषेधोदकश्रुतिमूलक

त्वनालाघवेनेश्वरवाक्यस्यतद्विषयत्वेनार्घपात्रन्युब्जतानिषेधेप्रमाणाभावात्। अतएवमदनरत्नेदानकांडेतुलादानजलाशयोत्सर्गादिगतयाऽभिहितेबह्वृहिश्राद्धप्रयोगेढोढमिश्रपद्धतौवेदांगरायपद्धतौचन्युब्जंपात्रंकर्तव्यमित्युक्तं। अयंचपिंडपात्रन्युब्जकरणप्रतिषेधश्छंदोगपरः।स्वशाखीयप्रकृतिप्रयोगेतद्विधानाभावात्। निषेधस्यप्राप्तानुवादपूर्वकत्वाच्चयद्विषयिणीप्राप्तिस्तद्विषयतायाएवबलवत्त्वंयुक्तत्वाच्च। अत्रबह्वृहिश्राद्धेगुडधूपःकर्तव्यः।तदुक्तंश्राद्धकाशिकायांगुडधूपःप्रयत्नेनसुधाण्येवात्रयानिचेति॥ अत्राग्नौकरणहोमःपृषदाज्याभिघारितोदनेनकार्यः।पृषदाज्यमिश्रओदनोहविःसर्वत्रतस्यहेहेआहुतिंजुहुयादितिबह्वृचपरिशिष्टात्। दधिमिश्रमाज्यंपृषदाज्यं। सर्वत्रेत्यग्नौकरणविप्रभोजनविकिरणपिंडदानेषु।हेहेइतिविप्सावह्वृचविषया। अत्रोपनयनादिस्मृतसंस्कारशेषभूतेबह्वृहिश्राद्धेऽग्नौकरणहोमाजातेषधिकरणन्यायेहोमआपद्येतेत्यलंनिरग्निकस्यनागरस्यनाग्नौकरणहोमः।तदुक्तंनागरखंडे॥ निरग्नेरग्नौकरणंक्षयाहेचैवयार्चणम्॥ भस्मनामंडलंकुर्यांगोमयोत्थंयोगपीठमिति॥ संपन्नमितिप्रश्नः॥ तूष्णीस्छेत्यत्रसंपन्नंवदेदित्यर्थः॥ साकांक्षत्वात्कसंपन्नमितिप्रतिप्रश्नः। सांप्रदायिकास्तुकसंपन्नमितिबह्वृचपठंति। तत्त्वंनाहुतंकर्कीपाध्यायादिभिर्भाष्यकौरः। छंदोगपरिशिष्टे कात्यायनोपि।संपन्नमितितूष्णीस्थप्रश्नस्तूनेविधीयते॥ कुसंपन्नमितिप्रोक्तेशेषसन्नंनिवेदयेदिति। अत्रपरिवेषणेविशेषोभविष्यपुराणे॥ पृषदाज्येननसंयुक्तंदद्यादोदनमादितः।।पायसंचतथामुद्गंमोदकादिरसोत्तरं॥ भोजनंमधुरंदद्यान्नचाम्लंपरिवेषयेत्॥ रक्तपुष्पंतिलंश्वेतंवर्जयेदिति जलोद्भवमप्यरक्तंत्रपुष्पंनदातव्यमित्येतदर्थोपनिषेधः॥ हेमाद्रौब्रह्मांडपुराणे॥ मैरेयंभक्ष्यभोज्यादिदद्यादन्नंपृथग्विधं॥ गुडमिश्रंखगश्चैवसार्ज्यंचेचोरनंपरं॥ रसालान्नोवकांश्चैवनचाम्लंकटुकादिकमिति। रसालाचसूपकारशास्त्रेऽभिहिता। अर्द्धाढकेस्कन्दिरपर्य्युषितस्यदध्नःखंडस्यषोडशपलानिशशिप्रभस्यसर्पिषःपलंमधुपलमरिचद्विकर्षेशुंठ्याःपलोन्मथवौर्द्धपलंचतुर्णां॥ श्लक्ष्णो

पटलललनयामृदुपाणिघृष्टाकर्पूरधूलिस्करभीकृतभांडसंस्थाणषावृकोदरकृतासरणरसालाःस्वादिताभगवतामधुसूदनेनेति। मोचकानकदलीफलानि। आम्रचात्रदधिव्यतिरिक्तं द्रष्टव्यं। तस्मात्येतमांगलिकत्वेनविधानादित्यत्रकस्मृतिरत्नावल्यां। अत्रादिशब्देनोहेजकतिन्त्रीरसंग्रहः क्रियते। निर्णयसिंधौ वृद्धपराशरः। मालत्याःशतपत्र्यावामल्लिकाकुब्जयोरपि। केतक्याःपाटलायावादेयामालानलोहितादति। अयंचश्राद्धेमालानिषेधस्यापवादः। तथाचवैष्णवेषभूषणेस्तत्रमालंकोरस्तथानरैः॥ कुंकुमाद्यनुलिप्तांगैर्भाव्यं तुब्राह्मणैरिह। स्त्रियोपिस्युस्तथाभूतागीतनृत्यादिहर्षिताइति। अत्रशेषंप्रकृतिवदिति चोदकात्प्राप्तेर्विकिरः कार्य्यएव। केचित्तुविकारोवृद्धिश्राद्धेनकार्य्यः। आमश्राद्धेचवृद्धौचप्रेतश्राद्धेतथैवच। विकिरंनैवकुर्वीतमुनिःकात्यायनोब्रवीदिति धर्मप्रदीपादित्याहुः। तन्न। नांदीमुखान्पितॄन्पूजयेत्पिंडकार्यविधानविदितिप्रकृत्यविकिरंचतथापिंडान्दद्याच्चनियमंविना। ब्रूयात्तेषुसंपन्नंवृद्धिश्राद्धेसमाहितइतिहेमाद्रौचतुर्विंशतिमतोक्तेः। सर्वजातायसिद्धमन्नंमेकपात्रेसमुद्धृत्यविकिरंकुर्यादित्यर्थकात्स्न्यंसंपन्नंचेत्ब्रूयुःसर्वमिदंततःक्षिपेदितिहेमाद्रौब्रह्मपुराणाच्च। छंदोगपरिशिष्टेकात्यायनेनविकिरणेविशेषाभिधानाच्च। तथाहि। यस्तत्रप्रकारोन्तस्यतिलवद्यववत्तथा। उच्छिष्टसन्निधौसोत्रतत्प्रेषुविपरीतकइति। पार्वणेउच्छिष्टसन्निधौविप्रहस्तेनतरंयद्दत्त्वाविकिरणंतिस्रस्तद्दिहविपरीतंतत्प्रेषुःपूर्वंकार्य्यं। तथातिलवत्प्रकरोत्रयवद्वयुक्तःस्यात्तथाकार्य्यइत्यर्थः। यत्तुधर्मप्रदीपवचनंतद्यस्यांशाखायांविकिरणनिषेधोक्तितद्विषयं। वस्तुतस्तु धर्मप्रदीपवचनेकात्यायनोब्रवीदित्यत्रकेचित्कात्यायनसूत्रपरिशिष्टादिविरुद्धत्वात्तन्निर्मूलं॥ ॥दधिबदरासक्तमिश्राःपिंडाः। अक्षतायवाः। मिश्रणंमिश्रः। दध्यादिभिर्मिश्रितोदनेनपिंडा अत्रदेयाइत्यर्थः बहुब्राह्मणोपलब्धेः। छंदोगपरिशिष्टेकात्यायनोपिसर्वस्मादन्नमुद्धृत्यव्यंजनेरुपसिच्यच॥ मयोज्ययवकर्कंधुदधिभिःप्राङ्मुखस्तनइति। अत्रपक्षप्राप्तायाःप्राङ्मुखतायाःप्राङ्मुखइत्ययमनुवादोनपुनरुद्दङ्मुखतायाःपरिसंख्या। अ

तएवहेमाद्रौपद्मपुराणे। प्रदक्षिणेपवित्रेणदध्यक्षतफलादिकैः प्राङ्मुखोवापिप्रदद्याद्दर्भेषुतानीति। पिंडानितिशेषः। अत्रपिंडदानंबहिःशालायांकार्य्यं। यथाहहेमाद्रौवृद्धशातातपः। प्रदद्यात्प्राङ्मुखःपिंडान्बृहीनाम्नासवात्यतःइति। सश्राद्धकर्त्ता। वात्यतोभोजनशालायाबहिर्नतूच्छिष्टसमीपइत्यर्थः। अत्रदक्षिणासंस्थमेवलेखावकरणावनेजनपिंडदानादिकार्य्यं। अभ्युदयिकेप्रदक्षिणमुपचारइत्यतत्। केचित्तप्रदक्षिणत्वेप्यस्यदैविकत्वादुदक्संस्थमेवेत्याहुः। तदयुक्तं। आभ्युदयिकेप्रदक्षिणमुपचारइतिविरोधात्। नचोदक्संस्थतायांप्रमाणमुपलब्धं दक्षिणासंस्थलेचप्रदक्षिणंप्रमाणमस्ति। तस्मादक्षिणासंस्थमेवलेखावकरणादि। अमुमेवार्थमाह छंदोगपरिशिष्टे कात्यायनः। प्रागग्रेषुयदर्भेषु आद्यमामंत्र्यपूर्ववत्। अपःक्षिपेन्मूलदेशेऽवनेनिदेतिपात्रतः। हित्वायंचत्रितीयंचमध्यदेशात्प्रदेशयोः। मातामहप्रभृतिंस्तत्पतेभ्योमवदामतइति। एतेषांपित्रादित्रयाणांवामतइत्यर्थः। तत्रपित्रादीनांध्येयत्वेनसैवोध्यत्वेनचस्वसंमुखत्वाद्दक्षिणासंस्थत्वेनैवतद्दामता। यत्तुशातातपेनपिंडानामवयवाभावाद्वामतायांकर्तृगतोऽवयवइष्यतइति। तदसंगतं। एतेषामेववामतइत्येतदुक्त्वेनपित्रादीनांपरामृष्टत्वात्तत्कर्त्रैवपवित्रत्वेतेषामिति बहुव्रीहिरोधाच्च॥ तस्माद्दक्षिणासंस्थत्वेनैवतद्दामतासंभवः॥ नारायणबलौश्राद्धकाशिकायांचाप्येवं। अथकेचित्तत्पितामहप्रपितामहपूर्वकंवाक्यंसमुच्चारद्विहान्अन्यत्रपितृपूर्वकमिति। तन्न। नांदीमुखाःपितरःपितामहाइत्यादिनाभगवताचार्य्येणानुलोमक्रमेणैवहविर्दानात्। छंदोगसूत्रेप्येवं। मातापितामहाश्चैवतथैवप्रपितामहीं। पित्रादयस्त्रयश्चैवमातुःपित्रादयस्त्रयः। एतेनैवार्चनीयाःस्युःपितरोभ्युदयेद्विजैरित्यश्वलायनस्मृतावनुलोमक्रमाभिधानादश्वलायननामप्यनुलोमक्रमणैवेतिपरिगणितादयः। यत्तुबृहद्वसिष्ठेनतल्लाघवोनर्षिषयं। आर्षवर्णानांतुपिंडपितृयज्ञदर्शश्राद्धादौसर्वत्रप्रतिलोमक्रमणैवतद्भृत्युक्तोक्ति। अत्रावनेजनपिंडदानादिसर्वंकर्म

देवतार्थेनकुर्यात्तदुक्तं छंदोगपरिशिष्टेकात्यायनेन। नात्रापसव्यकरणंनपित्र्यंतीर्थमिष्यते। पात्राणांपूरणादीनिदैवेनैवहि कार येदिति। आदीनीत्यादिशब्दादुत्सर्गपिंडदानादियावद्देवपित्र्यं कर्मदैवेनतीर्थेनकुर्यात्। एवकारस्तूष्णीमुखवानांकुर्वीतप्राङ् पिंडोदककियांप्राजापत्यंनतीर्थेनयच्चकिंचित्प्रजापतेरितिमार्कंडेयपुराणोक्तप्राजापत्यव्यावृत्त्यर्थइत्यक्तंनारायणवृत्तौ॥तेन मार्कंडेयोक्तंप्राजापत्यंनुशास्त्रांतरपरं। आशादित्यभाष्येप्येवं। प्राङ्मुखवास्तथादर्भान्विदध्यादीक्षावनेजनमितिब्रह्मपुराणादक्षी क्षीरेणावनेजनंकर्त्तव्यमितिश्राद्धकाशिकाकृत्। तन्न। अपःक्षिपेन्मूलदेशेऽवनेनिक्षेतिनिक्तिलाइतिछंदोगपरिशिष्टेकात्याय नेनाम्भिरेवविहितत्वात्। यत्तुक्षीरावनेजनविधायकंब्रह्मपुराणवचस्तत्सांतरविषयंननुवनिघंटौक्षीरशब्दस्योदकपर्यायेप ठितत्वात्क्षीरशब्दउदकपरःएवंचप्रकृतिवाहुल्यतिरनुज्झिताभवतीतिचेन्न। अवनेजनसाधनीभूतानामपामतिदेशेनैवप्राप्ति त्वात्क्षीरावनेजनविधायकवाक्यंवैय्यर्थ्यापत्तेः। यत्तुतत्पात्रक्षालनेनाप्यपुनरप्यवनेजयेदितिछंदोगपरिशिष्टेकात्यायनेनपु नरवनेजनंपिंडपात्रप्रक्षालनोदकेनैवाभिहितंतत्तंदोगविषयंवाजसनेयिनांतुअथोदपात्रमादायावनेजयतीइतिशतपथश्रु त्यापुनरवनेजनस्योदपात्रेणैवविहितत्वात्। अत्रचबिल्वफलपरिमाणाःपिंडाःकार्याः। तदाहछंदोगपरिशिष्टेकात्यायनः। अव नेजनवत्पिंडान्दत्वा बिल्वप्रमाणकानितिकेचित्तेनैवोक्तेअल्पमित्यस्यस्थानेऽयंपिंडःस्वाहेत्येवंप्रयोगःकार्यः। महालयेगयाश्रा द्धेवृद्धिश्राद्धेदशाहिके। पिंडशब्दप्रयोगःस्यादन्यत्रकीर्त्तयेदितिहेमाद्रौलोगाक्षिणोक्तेरित्याहुः। तन्नायंतोहेमाद्रौश्राद्धकाशि कायांचमहालयेगयाश्राद्धेप्रेतश्राद्धेदशाहिकइत्येवपाठदर्शनात्। अतोवृद्धिश्राद्धइत्ययंपाठोऽशुद्धएवनचहालपाठोमुख्येनपिं डशब्दनिर्देशेनपिंडदानविधानादस्यावेतन्नइतिनपुंसकलिंगनिर्देशाच्चश्रुतिविरोधःशंक्यः। एतदित्यनेननिर्वर्ण्यमानपिंडनि र्देशात्। प्रविश्यपिंडंकुर्ज्यस्यपिंडंपततीतिमहाभाष्यादौपिंडशब्दस्यस्त्रीनपुंसकयोरपिप्रयोगदर्शनात्। तस्मान्नपुंसकेनै

तद्धितिशब्देनपिंडशब्दनिर्देशोनविरुध्यते। अतश्चैतत्तइत्यस्यानंतरमन्नमितिपिंडमितिवाध्याहारःकार्यः। अनयोश्चव्यव स्थाऽभिहितालोगाक्षिणा। महालयेगयाश्राद्धेप्रेतश्राद्धेदशाहिके। पिंडशब्दप्रयोगस्यादन्नमन्यत्रकीर्त्तयेदिति। महालयेतती र्थविशेषेप्रेतश्राद्धइतिसंपिंडीकरणेतुश्राद्धेषुदशाहिकेश्राद्धव्यतिरेकेणापिदशाहनिर्वर्त्येपिंडदाने। यत्तुश्राद्धकाशिकाक्षं कृतामहालयादावितदितिनपुंसकलिंगनिर्देशोपपत्तयेयत्तत्पिंडान्नंस्वधेतिप्रयोगेऽभिहितःसोप्येतेनैवपराक्तः। वैकल्पिक योःपिंडान्नशब्दप्रयोगयोर्लोगाक्षिणाश्राद्धविशेषपरत्वेनव्यवस्थितत्वात्समुच्चयेप्रमाणाभावाच्च अत्रकश्चिदाह हेमाद्रौचाभ्युद येपिंडावेकैकस्यपृथक्पृथक्। एकेनाम्नाऽपरंतस्यैदद्यात्पिंडद्वयंबुधइतिचतुर्विंशतिमतादेकैकस्मैपिंडद्वयंदेयमिति। तन्न। सूत्रकृताभगवताऽस्यविशेषस्यालुप्तदिष्टत्वात्प्रकृतितएवैकैकस्याएकैकपिंडदानप्राप्तेश्च। अतएवोक्तंब्रह्मपुराणे। उक्तमादायपिं डंतुकृत्वाबिल्वप्रमाणकं। दद्यात्पितामहादिभ्योदर्भमूलेष्ववाक्रममिति। पिंडपदनिष्ठैकत्वस्यप्रकृतिप्राप्तस्याप्यत्रपुनः पिंडमित्येकत्वनिर्देशस्यचतुर्विंशतिमतोक्तपिंडनिष्ठसंख्यांतरव्युदासार्थत्वात्। तस्मादेकैकएवैकैकस्मैपिंडोदेयइति। यच्च चतुर्विंशतिमतेपिंडद्वयमेकैकस्मैदेयमित्युक्तंतल्लाघवांतरपरंकुलधर्मपरंवा। स्मृतिरत्नावल्यामप्येवमाशादित्यभाष्येच। अ त्रचपिंडोपरिरक्तसूत्ररक्तगंधादिप्रदानंतदुक्तंश्राद्धकाशिकायांपुराणसमुच्चयेअनुलेपनगंधादिरक्तसूत्रंचशस्यतइति। अत्रपिंडेषित्यधिकृत्योक्तंहेमाद्रौब्रह्मपुराणे। अर्घ्यंपुष्पंचधूपंचप्रशस्तमनुलेपनं। वासःसाध्वहजंशुद्धंदेयंचसदृशंसमं॥ इक्ष्वामलकमूलानियवान्वाथनिवेदयेदिति। पिंडदानंचात्रवैकल्पिकंमित्याक्षरार्थावृद्धिश्राद्धेविकल्पेनपिंडदानं बुधैःस्मृतमितिहेमाद्रौविष्णुपुराणेपिदर्शयतेःसवदेवोप्राङ्मुखोदङ्मुखोवापिवा। देवतीर्थेनवैपिंडान्दद्यात्कामेनवैनृपे ति। कामिनइच्छया। अभ्युदयिकंप्रकृत्याहिताग्नेःपित्र्यंनंपिंडैरेवेतिनिगमपरिशिष्टोक्तत्वादाहिताग्नेःसपिंडकाभ्युदयिक

श्राद्धनियमः । तदितरस्यतुसपिंडकमपिंडकंवेति विकल्पः । अत्रपिंडकरणाकरणयोः कुलाचारपरत्वेन व्यवस्थाभिहितोहमोद्दीप्म विष्णुपुराणे । पिंडनिर्वपनंकुर्यान्नवाकुर्यान्नराधिप । वृद्धिश्राद्धे महाबाहोकुल धर्ममवेक्षवाइति । अनेनयेषांकुलेवृद्ध परंपरयावृद्धि श्राद्धे पिंडदान मनुष्ठीयते तैरनुष्ठेयमेव । येषांतु कुले नानुष्ठीयते तैर्नानुष्ठेय मिति व्यवस्थाभिहिता भवति । आहिताग्नेः सपिंड काभ्युदयिकश्राद्धनियमेसत्यपियेषांकुले वृद्धपरंपरया । पिंडक श्राद्धानुष्ठानं तेषांकुलेकुलाचारत्वेनाहिताग्निनाप्यपिंडकमेवा भ्युदयिकश्राद्धमनुष्ठेयं । केचित्तु योगोतुविद्यमानेपिवृद्धोपिंडान्नानिर्वपेत् । पतंतिपितरस्तस्यनरके सतुपच्यतइतिस्मृतिर त्नावल्यां हेमाद्रौ निर्णयसिंधौचाग्नौकरणेनाग्निमतः सपिंडकमनग्निमतोऽपिंडकमित्याहुः । तन्नार्तावयुक्तं । योगोतुविद्य मानेपीत्यत्रास्मिन्वचनेस्मृतिरत्नावल्यादिसर्वग्रंथसम्मतपादवर्तमानस्यविद्यमानेपीत्यपिशब्दस्यविद्यमानेप्यग्नावित्यर्थो पपादनाग्निमतोपिसपिंडकश्राद्धप्राप्तेः । अन्यथाविद्यमानेपीत्यपिपादयेदितितद्वृत्तावसथ्याधानाभ्युदयिकविषयमिति कर्कोपाध्यायप्रणीतव्यवस्थाविरोधापत्तेश्च । यद्यनग्निमतोसपिंडकं श्राद्धमग्नौतदवाग्नौकरणहोमाधिकरणव्यवस्था कर्कोपाध्यायप्रणीतासंगच्छते । इतरथाग्निमतःसपिंडकश्राद्धविधानानग्नेस्तदग्नौहोमाधिकरणव्यवस्था संगतस्यात् नचापिंडकश्राद्धेग्नौकरणहोमोस्ति । येनतत्रहोमाधिकरणत्वेनपाण्यभिधानंसंगच्छते । तस्मादग्निमाननग्निमांश्चाधिकृत्य पिंडकश्राद्धनिंद्यासपिंडकश्राद्धंस्कृतिपराब्रह्मोक्तिरितिनसाग्निनिरग्निपरत्वेनसपिंडकापिंडकश्राद्धयोर्व्यवस्था । किंतुपूर्वो दितेवव्यवस्थाकेचिदत्रेवंव्याचक्षते । दधिबदराक्षतमिश्राःपिंडाइतिसूत्रेपिंडग्रहणंपक्षप्राप्तस्यापिंडकश्राद्धस्यदृष्टार्थं । पिंडदा नप्राधान्यात्तद्भावेगानुष्ठानायोगात् । पिंडदानप्राधान्यंतुनिर्णयसिंधौछंदोगपरिशिष्टे कात्यायनेनाभिहितं । प्राधान्य पिंडदानस्यैकेविदाहुर्मनीषिणः ॥ गयादौपिंडमात्रस्यदीयमानस्यदर्शनात् । भोजनस्यप्रधानत्वंवदंत्यन्येमहर्षयः । श्राद्ध

२५

णानांप्रतीक्षायांमहायत्नप्रदर्शनात् प्राधान्यमुभयोर्यस्मात्तस्मादेषसमुच्चयइति । अत्रकेचित्पदेनयजुर्वेदिनउच्चंते । अन्यप देनबह्वृचाः । छंदोगानांतुभोजनपिंडदानयोरुभयोःप्राधान्यमिति । श्राद्धकाशिकायांधर्मप्रदीपेपि । यजुर्वांपिंडदानंतुबह्वृचांहि जातर्पणं । श्राद्धशब्दाभिधेयंस्याद्भोज्यं सामवेदिनामिति ॥ विस्तरस्तेस्तु पिंडदानप्राधान्यंकर्कभाष्यनिरूपितं । तस्माद्याज्ञसने यिनांसर्वेषांसपिंडकमेवाभ्युदयिकश्राद्धं भवतीतिस्वसूत्रानुरूपं । यत्तु वृद्धिश्राद्धेविकल्पेनपिंडदानं बुधैः स्मृतमिति मि ताक्षरायांवचनंयच्चपिंडनिर्वपणं कुर्यान्नवाकुर्यान्नराधिपेतिभविष्यपुराणेचवचनं तदन्यशाखाविषयमिति ॥ ॥ नांदीमु खान्पितॄन्नावाहयिष्यइतिपृच्छति ॥ लिङर्थेलेट् । पितॄनावाहयिष्यइत्यस्यस्थानेनांदीमुखान्पितॄनावाहयिष्यइतिपृच्छेदि त्यर्थः । अत्रपितृग्रहणाद्देवानांनांदीमुखविशेषणंनभवतीत्यक्तं भवति । इदंपराशरेणानुदेवानामपिनांदीमुखविशेषणमु क्तं । नांदीमुखेभ्योदेवेभ्यः प्रदक्षिणंकुशासनमिति । अतश्चविकल्पःसर्वशाखाभेदेनव्यवस्थितोद्रष्टव्यः । अत्रावाहनेवि शेषोहेमाद्रौवायवीयब्रह्मपुराणे । नांदीमुखान्पितॄनभ्यर्च्यासांजलिश्चसमाकृत्येत् । पठेत्पवित्रंमंत्रंतु विश्वेदेवासआगत इति प्राकृतोतुहेरंगुष्ठकरग्रहणेनदेवानांजान्वाज्यभोजनेचैनेपितृणामावाहनमासीत् । इहपुनर्विशेषविधानात्सांजलिनेतिध्येयं यद्यपिनांदीमुखान्पितॄनित्युक्तेः पित्राद्यावाहनएवायंविशेषोनदेवावाहनइतिप्रतिभातितथापिपठेत्पवित्रमंत्रंतुविश्वे देवासआगतेत्युत्तरार्द्धंवैश्वदेविकावाहनेवियुक्तमंत्रपठनविधानादुभयसाधारण्यमस्यबोध्यं ॥ पितॄन्पितामहान्प्रपिता महानावाहयिष्यइति पितॄणांमातामहानांप्येवमित्यतिदेशाच्चमातामहान् प्रमातामहान् वृद्धमातामहान् आवाहयिष्यइत्ये वमावाहनमाचारत्नेप्युक्तं । नव्यास्त्वाहुः । स्मृतिपितृशब्दोजनकपरः । बहुवचनांतः पितामहादि पदेसमभिव्याहृतः । पितामहादिपदासमभिव्याहृतोबहुवचनांतंपितृशब्दस्तुसपिंडीकरणांतसंस्कारजन्यपितृभावपरिरूपः

यथा॥ पितृभ्योऽद्यात् । पितृनावाहयिष्ये । पितृन्नहविषेऽन्तवे आपेतुनः पितरइति ॥ अत्रपितरोमायेदं धमिति। अमीमदंत पितरइति। नमोवः पितरइति। मृतहः पितरइतितर्पयतमे पितृनित्यादि। तत्पित्रादिषुमातामहादिषुमातृश्वश्वादिषुचतुल्य त्वान्नोत्पद्यते अतः पितृनावाहयिष्यइत्यावाहनाप्रश्नः अत्रोच्यतेसंदिह्यते किंपित्रादित्रिकस्यनांदीमुखत्वमाहोस्विद्वृद्धप्र पितामहादिकमस्येति स्मृतिषूनपपद्यमानादर्शनात् तत्रपित्रादित्रिकस्यैवेतिब्रूमः नांदीमुखाः पितरः पितामहाःप्रपितामहाइति सूत्रकारप्रस्थानात् पितापितामहश्चैवतथैवप्रपितामहः पिंडसंबंधिनोत्पद्यतेपितरः संप्रकीर्तिताइति स्मृत्यंतराच्च तेनात्रपित्रा दीनामेवदेवतात्वेस्थितेवृद्धौनांदीमुखान्पितॄन्यजेत्त्योर्नांदीमुखशब्दस्याऽन्यत्रतेनोर्ध्वबल्कादिरूपास्तएवविवक्षिताः ऊर्ध्वबल्का रूयेतत्रतेनांदीमुखसंज्ञिताइति यत्तुयेस्युःपितामहादूर्ध्वंतेतुनांदीमुखास्मृताइति मार्कंडेयपुराणवचनं यच्चपितापितामहश्चै वतथैवप्रपितामहः त्रयोत्यश्रुमुखात्यंतेपितरःसंप्रकीर्तिताः तेभ्यःपूर्वेतथैवप्रजावंतः स्मरेवंविधाःतेतुनांदीमुखानांदीसमृद्धिरि तिकथ्यते। प्रसन्नमुखसंसर्गमंगलीयायतस्कृतइतिब्रह्मपुराणवचनात्तज्जीवत्पित्रादित्रिककर्तृकवृद्धिश्राद्धविषयं वृद्धिश्राद्धंप्रकृ त्यदर्शात्रिभ्यःपरंश्रूयतेजीवेच्चेत्तितर्पयेदितिनिगमोकेः यत्तुपितरिपितामहेप्रपितामहेचजीवतिनकुर्यादितिविष्णुवचनंतज्जीवत् पित्रादित्रिककर्तृकतीर्थश्राद्धादिविषयंएवमेवकल्पतरौहलायुधभाष्येचयेस्फः पितामहादूर्ध्वमित्यत्रपितामहशब्देनप्रपितामहो लक्ष्यते अपरेतुनांदीमुखानांप्रत्यब्दंकन्याराशिगतेरवौपौर्णमास्यांतुकर्त्तव्यंवराहवचनं यथेहि हेमाद्रौब्रह्मपुराणवाक्यविहित महालयप्रकरणपठितप्रोष्ठपदीश्राद्धमधिकृत्य पितापितामहश्चैवतथैवप्रपितामहः त्रयोत्यश्रुमुखात्येते पितरइत्यादिपूर्वोक्तब्र ह्मपुराणवचनस्यपठितत्वेनतद्विषयात्वाद्येस्युः पितामहादूर्ध्वमिति प्रागुद्दालकेन मार्कंडेयपुराणवचनमपिप्रोष्ठपदीनिमित्तश्रा द्धविषयमित्येवमूचिरे हेमाद्रादयोप्येवंयत्तुनिगमपरिशिष्टदर्शनान्निगमपरिशिष्टवचनंनिर्मूलं एवंचप्रोष्ठपदीश्राद्धे पित्रादि

त्रयोर्ध्वानांप्रसन्नमुखसंसर्गरूपंवैश्वदेवव्यावृत्तंनांदीमुखत्वंपरिभाषितं प्रसन्नमुखसंसर्गोमंगलिपायतस्कृतइत्यर्थः। अत्रोदका दिदानेविशेषमाह छंदोगपरिशिष्टेकात्यायनः अथाग्नौभूमिमासिंचेत्तस्मंप्रोक्षितमस्त्विति शिवाआपःसंत्विति चयुग्मानेवोदकेन च सौमनस्यमस्त्विति चपुष्पदानमनंतरं अक्षतंचारिष्टंचास्त्विति अक्षतान्प्रतिपादयेदिति हेमाद्रौतु अक्षय्यंचततःकुर्याद्वैवपूर्ववि धानतइतिश्लोकार्द्धमधिकंपठितमस्तिकर्कभाष्येतु अक्षय्योदकदानेतुपित्र्यएव औचित्यादिवस्पचरक्षोघ्नत्वादित्यंतं नांदीमुखाः पितरःप्रीयंतामित्यक्षय्यस्थाने अक्षणोदकमंत्रस्थानेनांदीमुखापितरःप्रीयंतामितिमंत्रःस्यादित्यर्थः यद्यपिनांदिमुखान्पित्रानावाहयिष्यइत्येवनपित्रविशेषणंनांदीमुखत्वंप्राप्तमेवतथापिपुनस्तद्ग्रहणंसर्वत्रप्रयोगार्थं यत्तुवृद्धिश्राद्धंप्रकृत्यअक्षय्योदकदा नेतुअर्घदानवदिष्यतेषष्ठीवनित्यंतत्कुर्यान्नचतुर्थ्यांकदाचनेतिछंदोगपरिशिष्टेकात्यायेनाक्षय्योदकदानंषष्ठ्यादिहितंततस्त छंदोगविषयं नांदीमुखापितरइतिमंत्रेपितृशब्दस्यप्रथमांतप्रयोगविधानात्। एवंसंकल्पवाक्यमपिप्रथमांतमेवात्रप्रयोज्यं ॥ तदुक्तंसंग्रहे श्रुभाद्यप्रथमांतेननवृद्धौसंकल्पमाचरेत् नषष्ठ्यादिवाकुर्यान्महादोषोभिजायतइति प्रकृतिप्राप्तषष्ठ्याअपवा दोयंतद्विधयमक्षय्योदकदानंतंत्रेणभवति नांदीमुखापितरःप्रीयंतामित्यत्रश्रुतस्यपितामहादिपदसमभिव्याहृतस्यबहुवचनो तपितृशब्दस्यसपिंडीकृतप्रमीतमात्रप्रकाशनेशक्तत्वात्सकृदुच्चारणेनैवसर्वेषांप्रकाशनरूपकार्यसिद्धेः तेनाक्षय्योदकदानं प्रतिपुरुषनावर्त्ततेयत्तुअक्षय्योदकदानेतुअर्थदानवदिष्यतइत्यक्षय्योदकदानेऽर्घदानवत्तंत्राभावः उक्तःछंदोगविषयः हलायु धभाष्येविष्णुमित्रश्चभाष्येश्राद्धकाशिकायांचाप्येवं एतेनपितरइत्यपरलक्षणं तेनपितरःप्रीयंतांपितामहाःप्रीयंतांप्रपितामहाः प्रीयंतामित्यादिप्रयोगमभिप्रेत्यतावदुक्तत्वात्तंत्रतात्पर्याभावोवतिविशेषस्यभगवताऽनुक्तत्वाच्चास्मादेवलिंगात्सकृतावपितंत्रेणवपि नृणांदत्तंश्राद्धमक्षय्यमस्तित्येवंषष्ठीबहुवचनांतेनैवप्रयोगेणाक्षय्योदकदानंकार्यं प्राकृताक्षय्योदकांतुवोढ्नविकृतौप्राकृ

तमंत्रस्थानेमंत्रांतरविधानात् अतएवकर्कोपाध्यायेर्व्याख्यातं अक्षय्योदकमंत्रस्थानेनांदीमुखाः पितरःप्रीयंतामिति मंत्रस्या
दित्यर्थइति अक्षय्योदकमंत्रस्थानइ — क्षय्योदकदानवाक्यस्थानइत्यर्थः प्राकृताक्षय्योदकदानेमंत्रस्यानुक्तत्वात्हलायु
धविष्णुमिश्रभाष्यश्राद्धकाशिकाकारादयस्तत्प्रकृतिश्राद्धे अर्घे क्षय्योदकेचैवेतिछंदोगपरिशिष्टे कात्यायनवचनाद् क्षय्योदक
दानेतंत्रतायाअभावः आभ्युदयिकेतुनांदीमुखाः पितरःप्रीयंतामित्यक्षय्यस्थानेआहेतिकात्यायनस्त्वाह्वत्वंतंत्रेतत्याहुः स्वधाव
चनेपितॄंत्रेतेवभवति पितृभ्यः पितामहेभ्यः प्रपितामहेभ्योमातामहेभ्यः प्रमातामहेभ्यश्च स्वधोच्यतामिति
मंत्रप्रयोगंप्रदर्शयताभगवताचार्येणतंत्रतासूचनात् आचार्यांशयंव्याचक्षाणैः कर्कोपाध्यायैरपिपितृभ्यः पितामहेभ्यइत्यमुं
मंत्रमुदाहरद्भिरुक्तत्वाच्च यत्तुअर्घे क्षय्योदकेचैवपिंडदानेऽवनेजनेतत्तत्स्यतुन्निवृत्तिः स्यात्स्वधावाचनपर्वचेतिछंदोगप
रिशिष्टे कात्यायनेनाक्षय्योदकेस्वधावाचनेचतंत्रतायाअभावनुक्तेर्हेसंदोगपरः तेनस्वधावाचनेपितृभ्यः स्वधोच्यतांपितामहे
भ्यः स्वधोच्यतामित्यादिप्रयोगमभिदधानानिरस्तार्थएव अन्वष्टार्घपिंडदानोदीतुतंत्राभावएव भगवत्तासूत्रकृतातेषुपदा
र्थेषुतथैवोक्तत्वात् अत्रचक्षीरयवोदकैरक्षय्योदकदानंकार्यं तदुक्तंब्रह्मपुराणे तथाक्षय्योदकस्थानेदद्यात्क्षीरएवो
दकमिति नांदिमुखान्पितॄन्वाचयिष्यइतिपृच्छतिवाच्यतामित्यनुज्ञातोनांदीमुखाः पितरः पितामहाः प्रपितामहामातामहाः
प्रमातामहावृद्धप्रमातामहाश्चप्रीयंतामिति स्वधोवाचयिष्यइत्यस्यस्थानेनांदिमुखान्पितॄन्वाचयिष्यइतिपृच्छेदित्यर्थः ॥
नांदीमुखवत्वस्याचपुनरुपादानंप्रयोगप्रदर्शनार्थं ततोवाच्यतामितिब्राह्मणेनानुज्ञातोनांदीमुखाः पितर इत्यमुं मंत्रमुदाहरेत्त।
चोदकप्राप्तस्यापिमंत्रस्यपुनर्ग्रहणंचतुर्थ्यंतपित्रादिपदेषुप्रथमांतातादिविधानार्थंनोदीमुखाः पितर इतिमंत्रेचनांदीमुखवा
मातामहाइत्येवंमातामहपदासूत्वेमपिनांदीमुखविशेषणं श्राद्धकाशिकाकृतासमाम्नातंतत्कर्कोपाध्यायहलायुधादीनाम

नादराच्चानाद्दरणीयं अत्रमंत्रेपित्रादिषण्णामेवसंकीर्तनमाभ्युदयिकंषट्देवतमितिप्रज्ञास्यर्थं तथाचवृद्धिश्राद्धमधिकृ
त्यछंदोगपरिशिष्टे कात्यायनः षड्भ्यः पितृभ्यस्तदनुभक्त्याश्राद्धमुपकल्पेदितिषड्देवतमाह तथातत्रैवोक्तार्थप्रतिपादकंवच
नांतरमप्याहसएव कर्षूसमन्वितेमुक्तातथार्घंश्राद्धेषोडश प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थितिरिति कर्षूसमन्वि
तमष्टकश्राद्धं॥ शेषेषुउक्तातिरिक्तेषुश्राद्धेषुउक्तातिरिक्तत्वेनाभ्युदयिकेषिण्डाइत्यर्थः तथातत्रैवयोषिद्भ्यःपृथक्तेनन
देयमित्याहसएव नयोषिद्भ्यः पृथगुद्दद्यादवसानदिनाहते स्वभर्तृपिंडदानाच्चदक्षिरासांयतः स्मृताइति याज्ञवल्क्यो
पि एवंप्रदक्षिणावत्क्रोवृद्धौनांदीमुखान्पितॄन् यजेतत्यादीनादिशिष्टदेवतांतरोपदेशमकुर्वाणःप्राकृतानांपित्रादीनां
षण्णामेवदेवतात्वंदर्शयति सूत्रकारोपिनांदीमुखाः पितरः पितामहाइत्यादिनाप्राकृतान्पित्रादीन्देवतात्वेनानुवदन्व्यक्त
मेवाभ्युदयिकंषट्देवतंदर्शयति छंदोगसूत्रेवसिष्ठोपि नांदीमुखेभ्यः पितामहेभ्यःप्रपितामहेभ्योमातामहेभ्यः प्रमातामहेभ्यो
वृद्धप्रमातामहेभ्यश्चस्वाहोच्यतामिति॥ नचनांदीमुखाः पितर इत्यत्रपितामात्रेतिसूत्रेणैकशेषइतिवाच्यं मातामहश्राद्ध
परित्यागप्रसंगात् नचाविवक्षितासंख्यापट्संख्यायांविधेयान्वयात् तथाप्येविवक्षितत्वेपंचप्रयाजाएकादशप्रजोयाइत्य
त्रापितथाप्रसक्तेः अतएवतंत्रकारोभगवान्जैमिनिः कर्मभेदज्ञापकेषुसंख्यामध्यजीगणत् शब्दांतराभ्यासंख्यासंज्ञा
गुणप्रकरणभेदाइदइतिनचपिंडपित्रयज्ञावत्स्त्रीभ्यश्चित्यत्वष्टकावदत्रविशेषाप्रदेशोस्ति येनमात्रादिनचानांदेवता
त्वंस्यात्।सूत्रेअन्वष्टकावद्विशेषोपदेशाभावेपि अन्वष्टक्यकृष्णोचगयोषायोचक्षयेहनि मातुःश्राद्धं पृथक्शास्त्रमन्यत्र
पतिनासेहतिः।स्मृत्यंतरवाक्ये आभ्युदयिकेपिविशेषोपदेशोस्त्येवतिचेत् ननांदीमुखाः पितरः पितामहाइतिषड्भ्यः पितृ
भ्यइति पिंडाःस्युःषडितिस्थितिरित्यादिपूर्वोक्तवचननिचयविरोधात् तस्मात्पित्रादीनांषण्णामेवहदेवतात्वं अनपवर्गं

२८

दोगपरिशिष्टेकात्यायनः। प्रागग्रेषु अथदर्भेषु आद्यमामंत्र्यपूर्ववत् अपः क्षिपेन्मूलदेशे। वेनेनिस्वेतिनिस्तिलाः हितीयं
चमध्यदेशाग्रदेशयोः मातामह प्रभृतिस्कएतेषामेववाप्रतइत्यनेनपित्रादीनांषण्णां भवने जनमनुवदति। अन्यत्रापि+
आहूमिष्टिजन्याहवनीयप्रयोज्यमिष्टिनिमित्तकंवाचातु इष्टिआहूश
ब्दस्यप्रवृत्तिनिमित्ताभावादलब्धात्मिकाया मपहरतीत्यस्यन्यायस्यप्रकृतेः भावादित्या
हुः हेमा वेष्टिआहूनंचयागानुसारेणेष्टंगआहूमित्येव गतस्यप्र
वेशेनैवाहेष्यबुद्धिपर्य्यवसाने सतिहुष्टि पाग्रहणस्येवाविवक्षितत्वादिति अत्रसत्यव
स्योः स समुच्चयइतिनब्राह्मणहयेप्रत्येकमेककस्यप्रयो
कात्यायनप्रणीतस्तेहोगपरिशिष्टादिवचनविरुद्ध एवदेवताः निषेककालेसोमेचेतिपू
र्वोदात्ततयास्कर कर्मांग आहूबृद्धिआहूदेवताद्यतिदेशात् अत्राप्युद
हेकतुदक्षोसत्योनादिस्त्रेवसइतिहेमाद्रौशंखो कर्मांग आहूमिति
हेमाद्रेर्व्याख्यानात् अन्येतु कर्मां तिकर्मांगंवृद्धिवत्कृतमितिवृद्धिआहूदेवताद्यतिदे
रुविश्वेदेवेतिवचनोक्तमिष्टानिमित्तकं आहूमितिकल्प + चनेनतत्रा
स्वांनरविषयंणनितुमातृआहूंवृद्धू महानांचवृद्धौ आहूत्रयंस्मृतमित्यादीनिवचना
काशिकायां नवानांनवकेवृद्धौतथेवान्व स्कचेतिकात्यायनना
म्नालिखितंवचनं सूत्रस्थेवासाधारणत्वेनबलियस्त्वात् स्मृ

२८

वकाशत्वेनदुर्बलत्वात् एतेनहलायुधश्रा कात्यायनसूत्रानुसारिभिर्यहाजसनेयिनामाद्यु
दयिकंनव+ गइतिहेमाद्रौस्पष्टं। अतश्चसमवसूविश्वान्देवानावाहयिष्यइतिसामान्यविशेषसंज्ञापदयोः समुच्चयेनप्रयोगः का
र्यः यद्यपिहिवचनोनबहुवचनोतयोः सामानाधिकरण्येनमं भवतीतिश्रीरस्तिनोक्तं तथापिशालास्कभ्रातरः पत्न्याः स्वामिनो
देवुदेवरावितिअत्रस्वामिनोभ्रातरोदेवरावितिवदिहापिसामानाधिकरण्येनान्वयेनकिंचिद्बाधकंकिंबहुना अनियत बहुवचन
केनापिबहुवचनांतेनाप्सरःशब्देनैकवचनांतेनोर्वशीशब्देनचोर्वश्यप्सरस इत्यादौसामानाधिकरण्यमेगीक्रियते नचस्त्री
णांबहुस्वप्सरसइतिकोशबलान्नियतबहुवचनांतएवाप्सरः शब्दइतिभ्रमितव्यं वत्सरः अप्सराइत्येकवचनांतस्यापिमहा
भाष्यकृताभ्रष्टमेउदात्तनत्वात् प्रकृतेतुविश्वेदेवाभ्रआगच्छंतीति विश्वान्देवानावाहयिष्यइत्यादिश्रुतिस्मृतिंगतविश्वेदेवाएद
स्यनियतबहुवचनांतस्यैवप्रयोगदर्शनात्तामानाधिकरण्यंस्कतरां हेमाद्रिस्कविश्वेदेवाइतिबहुवचनंपूजार्थंमतासत्यवसू
संज्ञकाविश्वेदेवाइत्यादिप्रयोगमूचे तच्चिंत्यं संज्ञाशब्दांतर्भावेनदेवतात्वाभावादित्यलं नैस्वधांप्रयुंजीत अत्राप्युदपि
केस्वधाशब्दप्रयोगोनकार्यइत्यर्थः प्रदक्षिणग्रहणस्यसकलदेवधर्मोपलक्षणार्थतयाव्याकृतत्वात्पितृनप्यत्रदेववदित्यति
देशादेवकर्मणिस्वधाशब्दोच्चारणाभावाच्चमिनित्यानुवादएवायंननिषेधः प्राप्याभावात् तेनस्वधाकारः पितृणामितिदर्शना
दत्रापिस्वधाशब्दप्रयोगोभवेदेवंतिशंकानिराकारणार्थंमतेत्सूत्रे केचित्तुप्रकृतेस्वधावाचनेस्वधोनप्रयुंजीतेतिवर्णयंति तदयु
क्तं पितृन्वाचयिष्यइतिविधानेबलादेवनिषेधस्यप्राप्तत्वेनपौनरुक्त्यापत्तेः अन्यत्रस्वधाप्रसक्तेश्चा तस्मात्सूत्रेवेवव्याख्याज्याय
सीकेचित्तुस्वधोशहरणप्रतिषेधादस्कस्वधेस्कवाचमालेइतिचोपदेशात्कुशेषुस्वधानिषेककर्मेतिकर्काचार्यास्कमेत्रनिषेकको
रशेषशेषित्वतस्मात्तस्मात्तस्मिन्कालेनिषेकइत्याहुः प्रकृतोयत्रयत्रस्वधाशब्दोच्चारणंविहितंतत्रतत्रतत्स्थानि अत्रस्वाहाशब्दः

प्रयोक्तव्यः स्वाहाशब्दं प्रयुंजीतस्वधास्थानेचबुद्धिमान्इतिहेमाद्रौब्रह्मपुराणात् तेननन्दीमुखाःपितरःस्वधोयेइतिमंत्रेजर्जंवहंती
तिमंत्रेचस्वधाशब्दस्थानेस्वाहाशब्दःप्रयोज्यइतिकेचिन्मिथ्या अत्रकेचित्स्वधाशब्दनिषेधस्यनिषेधांतरापलक्षणत्वान्नस्व
धाशर्मवर्मेतिपित्रनामनवोच्चरेत् नकर्मणिपितृतीर्थेननकुशाद्विगुणीकृताः नतिलैर्नीपसव्येनपित्र्यमंत्रविवर्जितं अस्मच्छ
ब्देनकुर्वीतश्राद्धेनांदीमुखेकचित्इतिपुराणसमुच्चयात् अनस्मद्गुरुशब्दानांमरूपाणामगोत्रिणामितिसंग्रहवाक्याच्छर्मवर्मा
स्मद्गुरुशब्दगोत्रनाम्नामुच्चारणंनेच्छंति। तन्ना नांदीश्राद्धंप्रकृत्यगोत्रनामभिरामंत्र्यपित्रर्घ्यप्रदानपर्यंतेहागपरि
शिष्टकात्यायनेनचोदकप्राप्तस्यापिगोत्रादुच्चारणस्यगोत्रनामभिरित्यनेनपुनर्विधानात्नामानितुशर्मादिशब्दांतानियस्मश
ब्दादिशर्मोच्चारणनिषेधःसोचपुत्रानुवादः नान्तोनिषेधेनशर्मादिशब्दोच्चारणस्यापिनिषेधप्रसिद्धेः॥नचेदमर्घ्यदानमात्रविषयं॥
स्थालीपुलकन्यायेनैकत्रदृष्टस्यापिसर्वविषयत्वात् अतएवमदनरत्नेदानकांडेजलाशयोत्सर्गकांडेढुंढिमिश्रैरप्यनोच्चार्यते
केसर्वत्रगोत्रशर्मशब्दनाम्नामुच्चारणंलिखितं यत्तुशर्मशब्दादिनिषेधकंवचनंतदाश्वलायनादिविषयं तथाचतत्कारिकायां॥
संबंधनामरूपाणिवर्जयेदत्रकर्मणीति संबंधादुच्चारणेक्रमविशेषनियमः श्राद्धकाशिकायां संबंधप्रधमंत्र्यान्नामगोत्रमतःपरं
रूपंततोविजानीयादेषधर्मस्सनातनइति तत्रैव मृतनामसमुच्चार्यतत्सगोत्रमुदीरयेदितिति तत्रैवबृहस्पतिः आमंत्र्यचार्घदा
नेचपिंडदानेवनेजने संबंधनामगोत्राणियथार्हमनुकीर्तयेदिति हेमाद्रौभृगुः संबंधादुच्चारणेक्रमविशेषनियममन्यथाऽहु
गोत्रसंबंधनामानिपितृकर्मणिकीर्तयेदिति तत्रैवव्यासोपि गोत्रसंबंधनामानिपितृणामनुकीर्तयन् एकैकस्यनुनिप्रस्य
अर्घपाद्यंविनिःक्षिपेदिति अतःसंबंधादुच्चारणेक्रमविशेषनियमेविकल्पः तत्रापिगोत्रनामस्वधाकारैस्तत्पर्यंतंपूर्वंशइति
हेमाद्रौयाज्ञियाज्ञवल्क्योक्तेस्तस्यचवाजसनेयिभिर्याज्ञवल्क्योक्तक्रमानुसारिभृग्वाद्युक्तक्रमेणैव

गोत्रादुच्चारणंसमाश्रयणीयः अत्रेतच्चिंत्यते इहकिंवस्वादिप्रयोगः कर्तव्यउतनेतिशेषपार्वणवदित्यतिदेशेनप्राप्तत्वात्कर्तव्य
इतिकेचिदाहुः तन्नेत्याहश्राद्धकाशिकाकृत्पितृणामप्यत्रदेवरूपत्वात् तथाचस्मृतिः पितृणांरूपमास्थायदेवाअन्नंमृदंतितेन
स्मात्सव्येनदातव्यंमृद्विपूर्त्तेषुदात्रभिरिति नांदीमुखेतिप्रयोगस्यतत्प्रतिनिधिरूपत्वाच्च। तथाचोक्तं हेमाद्रौविष्णुधर्मोत्तरे वृ
द्धेःसमर्चयेद्विद्वान्नित्यंनांदिमुखान्पितॄन् संपादितोविशेषस्तुशेषेपार्वणवद्भवेदिति चतुर्विंशतिमतेपि तत्रनांदीमुखइतिविशे
षः समुदाहृतइति पितृणांनांदिमुखसंज्ञाकत्वमित्येषाविशेषः संपादितोनान्यइत्यर्थः अतएवाश्वलायनगृह्यकारिकायारूपो
च्चारणेवर्ज्यभुक्तेसंबंधनामरूपाणिवर्जयेदत्रकर्मणीति संग्रहेपि अनस्मद्गुरुशब्दानामरूपाणामगोत्रिणामिति एवंचस
तिरूपंततोविजानीयादित्युक्तेर्नांदीमुखेतिप्रयोगस्यवस्वादिप्रयोगप्रतिनिधिरूपत्वेनततस्थानापन्नत्वाच्चानांदीमुखश
ब्दोच्चारणंप्राप्नोतितथापिनांदीमुखान्पितॄन्वाहयिष्यइत्यादौनांदीमुखेतिशब्दस्यपितृशब्दात्पूर्वंसमाम्नानात्तत्सर्वत्रनांदी
मुखशब्दःपितृशब्दात्प्राक्प्रयोज्यः अतएवाहेमाद्रि एवंचयत्रपितृशब्दप्रयोगस्तत्रतत्रनांदीमुखपदंपूर्वंप्रयोज्यमिति
अत्रमातृपार्वणानुष्ठानपक्षेऽपिपंतोनांदीमुखशब्दोमातृविशेषणमितिहेमाद्रिमदनरत्नादयोनिबंधाः वाजसनेयिभिर्ढुं
ढिमिश्रादिभिःकृताः यद्वतपक्षेतावतोनांदीमुखशब्दोमातृविशेषणमितिस्मृतिकौस्तुभादयआश्वलायनशारदीकृत
निबंधाःपद्धतयश्च अयमुभयविधोपिनांदीमुखशब्दप्रयोगः साधुरेवमात्रादिष्वपिनांदीमुखशब्दसंकेतस्यानांदीत्वेनविश्वे
षादेवानामित्यादाविवसंज्ञात्वाभावात्संज्ञायाश्चाधुनिकसंकेतात्मकत्वेनोक्तत्वान्मरुन्मुखाःसंज्ञायामितिनिषेधाप्रवृत्तेः स्वांगाच्चोप
सर्जनादसंयोगोपधादितिवैकल्पिकोऽपिषभवत्येव नन्वयंयोगाहारव्यायामितिनित्यएवऽीषस्त्वितिशंक्यं। नांदीमुखशब्दस्यदि
व्यपितृषूर्ध्ववत्कास्कृत्येतत्रतेनांदीमुखसंज्ञिताइतिहेमाद्युक्तवाराहवचनवज्जनकादिषुशक्तिग्राहकवचनाभावेनपितृ

शब्दपरतंत्रत्वात्मातरश्चइत्येकशेषेणपितृशब्दादुपस्थितपितृणांमातृणांचनांदीमुख्यश्चनांदीमुखाश्चनांदीमुखाइत्येकशेष
णनांदीमुखत्वरूपेणशक्त्यैवबोधकत्वात्पुंवाचकस्यशब्दस्यपुंगातस्त्रियांप्रवृत्तोविधीयमानस्यश्राद्धस्यात्रसंभावितत्वात् अन्यथा
प्रथमोपस्थितपित्रादिभिरेवविधिनैवाकांक्षोपपत्तौपश्चादुपस्थितमातृणांतत्रान्वयासंभवान्माहश्राद्धतुपूर्वस्यादित्यादीनांवैयर्थ्यापत्तेः
प्रपितामहीपर्यंतानांदीमुखत्वश्चमातरइति अथनांदीमुखीष्वश्चमातृष्वाह्वमुत्तममितिहेमाद्रौदाक्षंतब्रह्मपुराणेनांदीमुख्य
श्चइतिनिर्देशः मातृपितामहीप्रपितामह्यः नांदीमुखाइतिपदसंकीर्णानांनिर्देशश्चसंगच्छतेइत्यास्तांप्रासंगिकं युग्मानापू
येदत्र अत्राप्युदयिकेयुग्मान्बहुवचनोपदेशाच्चैकैकशोब्राह्मणानांत्रयंद्वौजयेदित्यर्थः अत्राहश्राद्धकाशिकाकृत् अस्म
दोविकल्पोदेवेयुग्मान्यथाशक्तीतिपरिभाषयैवयुग्मत्वप्राप्तेर्विशिष्टविध्यर्थंयुग्मग्रहणं तेनपित्र्येयुग्मानेवप्रातर्निमंत्रयेत
येदित्यर्थः तथाचछंदोगपरिशिष्टकात्यायनः प्रातरामंत्रितान्विप्रान्युग्मानुभयतस्तथेति आशयेदित्यपिविशिष्टविध्यर्थं तृप्
प्रश्नेनैवभोजनोपलब्धेः अतश्चगुडशर्करादिनामधुरान्नंभोजयेदितिविशिष्टविधिरित्यर्थः अत्रविशेषपरिवेषणेप्राक्निरू
तः अत्रचपाद्यार्घ्यंधादीनांदीतादिदानेपुनरुच्चारणीयवाक्यानितुहेमाद्रौब्रह्मपुराणेदर्शितानि इदंवः पाद्यमर्घ्यंचपुष्पं
धूपविलेपनं अयंदीपप्रकाशंचविश्वेदेवाःसमर्प्यते तथा अयंवोगंधइत्फल्कागंधवद्यात्फलशोभनं इदंवपुष्पमित्फल्क
पुष्पाणिचनिवेदयेत् अयंवोधूपइत्फल्कातदग्रेतुदहेत्ततः अयंवोदीपइत्फल्कादीपंतद्यंनिवेदयेत अनंगलग्नंसह
रूपं भवेद्यत्तयुगंशुभंइदंवोवस्त्रमित्फल्कान्वितंयवानिवेदयेत इदंवोमाल्यमित्फल्कादद्यान्माल्यंशुभंभवतीति माल्यं
ग्रथितपुष्पाणि येतस्मादिववाशब्दनिर्देशादमुकसगोत्राः पितृपितामहप्रपितामहाः एषवोगंधः स्वधेतिवाक्यंगंधादिदा
नस्याहुर्मरुनरत्वाहयः तदयुक्तं तथासति अग्नीषोमादिवन्निमंत्रितानांपित्रादीनांदेवतात्वापत्तेः नैवंविष्णवादिवचनवि

DEHAU DAU MEMORIAL

रोधात् यथाहविष्णुः नमोविश्वेभ्योदेवेभ्यइत्येवमादौप्राङ्मुखस्योदङ्मुखोनिवेद्यपित्रेपितामहायप्रपितामहायचनामगोत्राभ्यामुद
ङ्मुखेविधिति अत्रपित्रादेरेकैकस्यसंप्रदानत्वमवगम्यते ब्रह्मपुराणेपि ततोमधुघृताक्तंतुसोष्णमन्नंतिलान्वितं गृहीत्वा
दर्वतीर्थेनप्रणवेनैवतत्पुनःएतद्वोऽन्नमित्फल्कावित्रानेदंवोऽन्नंसंयजेत पितृभ्यश्चततोदद्यादन्नमामंत्रणेनतु अमुकामु
कगोत्रैतत्तुभ्यमन्नस्वधानमइति एवंचपित्रादीनांप्रत्येकंदेवतात्वेसिद्धे अमावास्यायांपितृभ्योदद्यादितिबहुवचने गर्गाभोज्यंतामि
तिवदुपपादनीयं तेनैताहशंवाक्यमुच्चारणीयं अमुकसगोत्रपितरमुकशर्मन् अमुकसगोत्रपितामहःमुकशर्मन् अमुकसगोत्रप्र
पितामहरमुकशर्मनइत्फल्कातएतद्वःपाद्यंएषवोऽर्घःएतद्वःआसनं एषवोगंधःपुष्पंएषवोधूपःएषवोदीपःएतद्वोवस्त्रंइदमन्नंस्वाहे
ति एवमावाहनेपिपित्रादिपदंद्वितीयाबहुवचनांतंमुच्चार्यावाहयिष्यइतिप्रयोगोबोध्यः अत्रयुग्मानितिबहुवचनोपदेशात्पित्रादि
षण्णांश्राद्धेषुप्रतिपुरुषंत्रयंयथाशक्तियुग्मान्ब्राह्मणानामंत्रयेत अस्मिन्पक्षेवैश्वदेवेतंत्रपक्षेनेतिकर्कीयाध्यायः
एतदसंभवेद्वौद्वौब्राह्मणौदेवेपित्र्येचसंभवंत्रामंत्रयेत एवंषोडशब्राह्मणाः तैर्नवौवैश्वदेविकं यावद्वपितृभ्योवैश्वदेविकौब्राह्म
णौमातामहेभ्योपितावेवत्यर्थः एवंचतुर्दश एतस्याप्यसंभवेद्वौपित्रादिश्राद्धेद्वौचमातामहादिश्राद्धेवैश्वदेविकेचद्वौद्वौ ए
वमष्टौयत्तुहेमाद्रौलोगाक्षेरेकैकस्यतुवर्गस्यद्वौद्वौविप्रौसंभर्चयेत वैश्वदेवेतथाद्वौचनसंभवेतविस्तरइत्फल्कं यच्च तत्रै
वसंभविष्ये पूर्वाण्हेभोजयेद्विप्रानपराह्णेसर्वप्रदक्षिणमित्युक्तंतदुभयमपिवैश्वदेविकंतंत्रपक्षेपर्वणत्रयपरं वैश्वदेविकतंत्रपक्षे
षट् एतदसंभवेपित्रादिश्राद्धेमातामहादिश्राद्धेचद्वौवब्राह्मणौ यावद्वपितृभ्यस्तावन्मातामहेभ्यइत्यर्थः वैश्वदेवेतुतत्र
तैव एवंचत्वारः एतस्याप्यसंभवेद्वौपितृमातामहार्थे वैश्वदेविकस्थानेत्वग्निस्थापनीयः तथाचोक्तंहेमाद्रौब्रह्मांडपुराणे।
एकएवयदाविप्रोहितीयोनोपपद्यते पितृणांब्राह्मणोयोज्योदैवेत्वग्निंनियोजयेदिति अत्राग्निर्लौकिकोनमृत्याग्निःविषये

लौकिकमयुक्त्वादितिकात्यायनसूत्रात् इदंचवैश्वदेविकस्थानेग्नि नियोजनंसाग्निकविषयं तदाहनिर्णयसिंधौ प्रचेताः एकस्मिन्ब्राह्मणेदैवेसाग्नेरग्निर्भवेत्सदा अनग्नेः कुशमुष्टिःस्याच्छ्राद्धकर्मणि सर्वतइति हेमाद्रौ शंखेनतुवैश्व देविकस्थानेनैवैद्यस्थापनमुक्तं भोजयेदथवाप्येकं ब्राह्मणंपंक्तिपावनं दैवंकृत्वातुनैवेद्यंपश्चात्तस्यतुनिर्वपेदिति तस्यापि त्र्याद्विजस्यस्थाने अत्रैकस्मिन्ब्राह्मणेऽनेकषांपितृणांदक्षिप्रकार उक्तोहेमाद्रौ प्रभासंवर्तुदेवलस्मृत्योः पितामुक्तेद्वि जकरमुरवेभुंक्ते पितामहः प्रपितामहस्तालुस्थः कंठेमातामहःस्मृतः प्रमातामहस्तूदरेवृद्धौनाभौतुसंस्थितइति वृ द्धौवृद्धप्रमातामहः एकएवयदाविप्रइतिब्रह्मांडपुराणादिवाक्येयदुक्तं तदशौश्राद्धादिविषयं तत्रत्यगुणमतांविधानात् इहतुपु मानाशयेदितिवचनाद्बहुवीति बोध्यं एवंह्यौसर्वथाब्राह्मणालाभेआह हेमाद्रौदेवलः। विधायवादर्भबटुनासतेषुसमाहितः। प्रेषानुप्रेषसंयुक्तंविधानंप्रतिपादयेदितइति बटुर्लघुमनुष्यप्रतिकृतिः बटवस्तुकुशायभागस्यमुरवपरिकल्पनेनदेवे ब्राह्मुरवाः स्थापनीयाः यतः ब्राह्मुरवान्यासनान्येषांह्यदर्भाःपवित्राणिच दक्षिणाग्नेरुदगग्रेषुप्रोक्षितानितिलोदकैरितिहेमाद्रौदेवलस्मृति कूर्मपुराणयोर्वाक्येब्राह्मुरवस्यदक्षिणामुरवत्वस्यचबृधीपादादिषुमुरवस्थानीयकल्पितान्नाभागाग्निभायेणपशुकृत्वादृत्वा पितर्थेवमुरवपरिकल्पनीयेशिष्टाचारोप्येवं प्रेषानुप्रेषाभ्यांसंयुक्तं विधानं श्राद्धमितिकर्त्तव्यताकांडे स्वयमेवप्रतिपादयेत्यर्थः॥ अस्मिन्पक्षेनिमंत्रणादयोधर्माः सर्वेपिकुशबटायेवब्राह्मणशब्दव्यवहारात्कार्यः यथाकुंडपाय्यग्निहोत्रेऽग्निहोत्रेधर्माःतथाच समुद्रकरधृतभविष्यवचने ब्राह्मणानामसंपत्तौकृत्वादर्भमयान्द्विजानिति गौडनिबंधेतुतदभावेकुशमयंस्नापयित्वानिमंत्रये दितिकुशबटोर्वाचनीकमेवनिमंत्रणमुक्तं अत्रशाखामलकाद्रेकमूलयवनिष्क्रयिणीदक्षिणादेया तदुक्तं ब्रह्मांडपुराणे द्राक्षा मलकमूलानियवांश्चविनिवेदयेत् दत्तेवैश्वदेवःस्यूयते नाहुतस्याग्नीर्पुनाहुतंदद्युरिति सान्निकस्यापिश्राद्धविशेषप

श्चादेवैश्वदेवः तथाचपरिशिष्टे संप्राप्तेपार्वणश्राद्धेएकोद्दिष्टेतथैवच अग्नौतौवैश्वदेवःस्यात्सश्वादेकादशेहनिइति॥ अ त्रपार्वणानहणमग्नेकदेवत्योपलक्षणार्थं ततश्चैकादशाहिकव्यतिरिक्तेषुश्राद्धेषुसाग्निकस्यपूर्वमेववैश्वदेवः एकादशाहिक एवतुपश्चात्कर्त्तव्यः तदाहहेमाद्रौशालंकायनः श्राद्धात्पागेवकुर्वीतवैश्वदेवंतुसाग्निकं एकादशाहिकमुक्त्वातत्रत्यंतेवि धीयतइति अनग्नीकस्यतु श्राद्धात्पूर्वकालेवैश्वदेवप्रतिषेधउक्तोहेमाद्रौषट्त्रिंशन्मते प्रतिवासरिकोहोमः श्राद्धादौक्रियतेयदि देवाहव्यंनगृह्णातिकव्यंचपितरस्तथेति तत्रैवगोतमोपि पिंडश्राद्धमकृत्वा तुवैश्वदेवंकरोतियः अकृतंतद्भवेच्छ्राद्धं पितृणांनोप तिष्ठतइति वसिष्ठोपि वैश्वदेवमकृत्वैवश्राद्धंकुर्यादनग्निकः लौकिकेप्येवंहुतशेषः पितृणानोपतिष्ठतइति ततश्चात्रार्थेनिष्क र्षः अनग्निकेनश्राद्धोत्तरकालेश्राद्धैकेनापिवैश्वदेवः कर्त्तव्यः श्राद्धमध्येतुनकदाचिच्छ्राद्धांतरेणकिंतुपाकांतरेणैवश्राद्ध स्यूर्वेतुसर्वथानकर्त्तव्यएवेति अत्रानग्निकशब्देनगृह्याग्निमान्गृह्याग्निशून्यश्चेत्यंतावुभावपिपरिग्राह्यौ॥ हेमाद्रिर्यथातथैव प्रतीतेश्राद्धमध्येकर्त्तव्यतातुब्रह्मांडपुराणे वैश्वदेवाहुतिरत्नावलीकब्राह्मणभोजनात् ऋक्यजुःसामयज्ञाद्दिनान्येवदक्षिणा र्थंतुदद्याद्विप्रेषुसर्वदेति मूलमाद्यंकमूलं॥ ॥इतिश्रीमद्विद्वद्विरिंउद्धवात्मजानंददेवविरचिते श्रीरुद्रकल्पद्रुमे आह्निकेयं निरूपणंसमाप्तिमगात् अथप्रसंगाद्वैश्वदेवकालनिर्णयः अस्यचाहिताग्निनानश्राद्धमध्येश्राद्धांतेवानुष्ठानंकार्यं किं त्वकृतएवश्राद्धे यतःश्राद्धात्पूर्वंपिंडपितृयज्ञोविहितस्तस्मादपिपूर्ववैश्वदेवः तथाचहेमाद्रौदेवलः अकृतेवैश्वदेवेतुस्थालीपाकःप्रकीर्तितः॥ अन्यत्रपिंडपितृयज्ञानुसोपराणेहविधीयतइति अवस्थालीपाकस्तूक्तानिकर्माणिस्थालीपाकशब्देनोच्यंते तानिचपिंडपितृयज्ञादन्यान्यकृतएववैश्वदेवेक्रियंते पिंडपितृयज्ञस्तुकृतेवैश्वदेवेपश्चात्सपराणेहक्रियतेपिंडपितृयज्ञश्चैश्रा द्धात्पूर्वेमुक्तोमनुना पितृयज्ञंतुनिर्वर्त्यविप्रश्चंद्रक्षयेग्निमान् पिंडान्वाहार्यकंश्राद्धंकुर्यान्मासानुमासिकमिति अमु

मेवार्थस्पष्टमाहहेमाद्रौलोगाक्षिः पक्षान्तेकर्मनिर्वर्त्यवैश्वदेवंचसाग्निके पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइति अ
त्रैसाग्निकस्तेनाग्निमान् पक्षान्तकर्मण्यन्वाधानं अन्वाहार्यदर्शश्राद्धं ननुपक्षांत पिंडपित्रयज्ञयोर्मध्येविधानादेवैश्व
देवस्यसाग्निककर्तृकत्वावगमात्किमर्थं साग्निकग्रहणं उच्यते पक्षादिस्थालीपाकपिंडपित्रयज्ञकर्तुर्निरग्निकस्यापा
सनाग्नेर्निवृत्त्यर्थं अतस्तेनापिनिरग्निकांतरवद्दृश्यमाणेषुकालेषुवैश्वदेवः कर्तव्यः श्रुतावपि साग्निकस्याश्राद्धंकृत्वा
तुततःस्मृतमिति अर्क[illegible]क श्राद्धभोजनादित्यनेनाग्नौकरणानंतरं वैश्वदेवाहुतीर्जुहुयादित्यकृत्वं श्राद्धंकृत्वाभृतयज्ञा
दिस्मृतमित्यनेनभूतयज्ञादेरेव श्राद्धांतेकर्त्तव्यतेति कृत्वार्थाद्वैश्वदेवाहुत्यनंतरमेवबलिहरणं कार्यमितिस्मृतिचंद्रिकाकारः
अयमेकोऽनग्निकस्यवैश्वदेवकालः द्वितीयोपिभविष्यपुराणे पित्रन्मंतर्पयित्वाविधिवद्बलिंदद्याद्विधानतः वैश्वदेवंततःकुर्यात्
पश्चाद्ब्राह्मणवाचनमिति बलिशब्दोपितत्रैवव्याख्यातः येअग्निदग्धामंत्रेणभूमौयेनिक्षिपेत्सुधः जानाद्विततबलिंवीरश्रा
द्धकर्मणिसर्वदेति अनेनविकीरसंज्ञकबलिप्रदानानंतरंस्वस्मिन्वानास्यूर्ववैश्वदेवंकुर्यादिति द्वितीयः तृतीयोपिमन्वादिभिरु
क्तः उच्छेषणंभुवस्तिष्ठेद्यावद्विप्रविसर्जिताः ततोगृहबलिंकुर्याद्विधिधर्मोव्यवस्थितइति अत्रहिश्राद्धोत्तरकालेगृहबलिर्विहि
तः सचवैश्वदेवास्यैकदेशः अतोवैश्वदेवएवायंश्राद्धोत्तरकालमुक्तो भवति बलिशब्दस्यप्रदर्शनार्थत्वात् मत्स्यपुराणेपि
उच्छेषणंभुवस्तिष्ठेद्यावद्विप्रविसर्जिताः वैश्वदेवंततःकुर्यान्निवृत्ते पितृकर्मणीति भविष्यत्पुराणे कृत्वाश्राद्धमहाबा
होब्राह्मणांश्चविसृज्यच वैश्वदेवादिकंकर्मततःकुर्याल्लराधिपेति स्मृत्यंतरे यदाश्राद्धंपितृभ्यस्तुदातुमिच्छतिमान
वः वैश्वदेवंततःकुर्यान्निवृत्ते पितृकर्मणीति पैठीनसिरपि श्राद्धंनिर्वर्त्यविधिवद्वैश्वदेवादिकंततः कुर्याद्विप्रांततोद
द्याद्धुतकारादिकंतथेति नैदवमनग्निककर्तृकंवैश्वदेवादिस्मार्यः कालः अग्नौकरणानंतरमेकः अन्योविकीरादुपरि तृती

योब्राह्मणविसर्जनात्यश्चादिति एतएवकालाःगृह्याग्निमतोपि तस्याप्यनग्निकशब्देनग्रहणादितिहेमाद्रावुक्तः कर्कोपा
ध्यायास्तुगृह्याग्निमतःश्राद्धात्पूर्ववैश्वदेवस्ततोवैश्वदेवार्थंनवपाकेनश्राद्धमित्याहुः एवंवैश्वदेवकालत्रयमभिधायाशार्क
णशांखायनपरिशिष्टमुदाहृत्यैतत्सर्वव्यवस्थाभिहिता आद्योनुद्दोसयेचांतइत्यमध्यमहालये एकोद्दिष्टनिवृत्तेनुवैश्वदेवंविधीय
तइति अंतानिरग्निनाप्याद्युदयिकश्राद्धविकीर्षितेपूर्ववैश्वदेवः कार्यः आवसथ्याधानपक्षादिस्थालीपाकांगभूतमाभ्युदयि
कश्राद्धमपिवैश्वदेवानुष्ठानपूर्वकंकार्यं यत्तु अकृतेवैश्वदेवेतुस्थालीपाकाःप्रकीर्तिताइति देवलवचनंतद्धुतीयादिप्रयोगविष
यं तत्रहिवृद्धिश्राद्धाभावेनवैश्वदेवपूर्वकतायाः प्रसक्त्यभावात् रेणुकारिकायांमपि निर्णज्ञानांतंनिर्वर्त्यवैश्वदेवंद्विजोततः श्राद्धं
कुर्यादित्यसंकल्प्यतत्कृत्वापूर्ववत्स्थितः असून्नियम्यसंयुक्तःपत्न्यासंकल्पमुच्चरेत स्थालीपाकेनिवृत्तेतुद्वितीयोहोमवदिहमि
ति इतिवैश्वदेवकालनिर्णयः ॥ प्रसंगात्पाकनिर्णयोपिक्रियते॥ किंवैश्वदेवात्पाकाच्छ्राद्धमुतश्राद्धार्थंपृथक्पाकइति तत्र
सर्वकर्माहस्यान्नाहिकपाकस्यहिवैश्वदेवादन्नादितिपारस्करेणसर्वार्थत्वोक्तेःश्राद्धार्थंपृथक्पाकस्यचवचनाभावाद्वैश्वदेवार्थमेव
पाकेनश्राद्धमितिकर्कोपाध्यायः अन्वहिकस्यहिपाकस्यसर्वार्थत्वेप्यन्वहंमनुष्ठीयमानंकर्ममात्रार्थत्वावधारणात्पार्कातराभि
धानाच्चश्राद्धार्थंपृथक्पाकइतिहेमाद्रावुक्तः यत्तआहलोगाक्षिः पित्र्यंनिर्वपेत्पाकंवैश्वदेवार्थमेवचवैश्वदेवाकुर्मिति।
अत्रयद्यपिपूर्वार्द्धेद्वैपक्यमेवपाकमुभयार्थंनिर्वपेदित्यपिप्रतिभाति तथापिउत्तरार्द्धेपाकभेदस्फुटीक्रियते वैश्वदेवेनपि
त्र्यर्थमितिवैश्वदेवार्थंपक्वमन्नंवैश्वदेवंतन्नपित्र्यं अन्वहमनुष्ठीयमानानांदेवभूतपितृमनुष्यपदानांयज्ञानामेकपादस्वा
ध्यत्वनिश्चयाद्दर्शश्राद्धार्थंनभवति दर्शश्राद्धार्थंपक्वमन्नंदार्शं नेहवैश्वदेवार्थमपिनभवति दर्शशब्दनचात्रदर्शश्राद्धनिरूप्त
व्यंतावत्वात्सर्वाण्विकृतिश्राद्धानिलक्ष्यंते वैश्वदेवशब्देनभूतयज्ञपित्रयज्ञमनुष्ययज्ञाअप्युपलक्ष्यंते अत्रनदार्शंवैश्व

देविकमितियंत्रेणागतिवचनेकदेशेनोक्तंहैश्वदेवस्याह्नात्पूर्वमध्येवानुष्ठानेक्रियमाणेसत्येववेदितव्यंनतदुत्तरकालंक्रियमाणेपीति।
यतआहैवंदिनमिः पित्रुपाकात्समुद्धृत्यवैश्वदेवंकरोतियः आसुरंतद्धेछ्राद्धंपितृणांनोपतिष्ठतइति अत्रहिपित्रुपाकशब्देनसंकल्पितः
पित्रुद्देवत्यत्वावस्थःपाकाभिधीयते तदवस्थाच्छ्राद्धरूपैकदेशस्यतदवस्थतात्प्रच्यावनमेवनविभागमात्रं तदवस्थतात्प्रच्यावनं
पूर्वदेवतासंबंधापनयनेसत्येवोपपद्यते अतःपित्रुरूपदेवताभ्योऽपनयणवाक्यमुद्धरतिनाग्निपाद्यते श्राद्धोत्तरकालंतुश्रा
द्धार्थस्यापिवैश्वदेवविनियोगउक्तएवपैठीनसिना श्राद्धंनिर्वर्त्यविधिवद्वैश्वदेवादिकंततः कुर्याद्विज्ञातताद्यद्धेतुकादिकं
तथेति अत्राद्यनततःशब्देनपूर्वश्लोकार्थोहेतुत्वेनोच्यतेद्वितीयेनतुश्राद्धावशिष्टाद्यन्नादित्यच्यते तेनायमर्थः यतःश्राद्धात्पू
र्वंपित्रुपाकात्समुद्धृतान्नेनवैश्वदेवंक्रियमाणेश्राद्धमाक्षरंस्यात्ततःकारणात्श्राद्धंनिर्वर्त्यततस्तद्धेछ्राद्धावशिष्टाद्यन्नाद्धिंचि
द्दायवैश्वदेवादिकंकुर्यादित्यर्थः अत्राद्यशब्देनसर्वमन्नसाध्यंनेत्यकंकर्मगृह्यते तेननित्यश्राद्धनपिंडपितृयज्ञश्राद्धोपयुक्तपाक
शेषात्कर्तव्यं तदेवंयदिब्राह्मणविसर्जनांतेवैश्वदेवंकुर्यात्तदाश्राद्धार्थेनवपाकेनेतिपदात्पूर्वोक्तेनप्रकारेणविसर्जनात्प्राक्तनक
लत्रयान्यतमकालेवैश्वदेवंकुर्यात्तदापृथक्पाकेनेति पिंडसंज्ञात्पाकपाकभेदस्मृत्यंतरे आतुरेभ्यः प्रहीणेभ्योबालेभ्योय
स्मपच्यते वैश्वदेवंनतत्कुर्याच्छ्राद्धार्थेयच्चपच्यते तथागृह्याग्निहोत्रेवैश्वदेवेयोयतयेब्रह्मचारिणेश्राद्धपाकोनद्दातव्यो
यावत्पिंडान्ननिर्वपेदितिप्रचेतसाप्युक्तं गृह्यपाकाद्बलिंकृत्वानिर्वपेत्पैंडपितृयज्ञियं ततोनिरूप्तमन्नंपक्त्वेभ्योयेतन्निवदयेदि
तिगृह्यकर्माधीनोगृह्यः बलिश्चत्रवैश्वदेवः पितृयज्ञियंयेसांगंपिंडपितृयज्ञंनिर्वर्त्यसमाप्यततस्तदनंतरंश्राद्धार्थंनिरूप्तंयद
न्नंतत्तेभ्यःश्राद्धदेशेक्ष्वाग्नेपूर्वंनिवेदयेद्दद्यात्। अर्थादुत्तरकालमन्येभ्योपिदद्यात इतिपाकनिर्णयः अयंपाकस्तूक्तयात्याग्निहो
त्रीयः चत्वारःपाकयज्ञाइतिसूत्रेपच्यतेऽन्वहमनेनेत्यस्मिन्नितिवापाकइत्यन्वर्थसंज्ञयापाकस्यगृह्याग्नौकर्तव्यतापतीतेःवै

वाहिकेग्नौकुर्वीतगृह्यंकर्मयथाविधि पंचयज्ञविधानंचपक्तिंचान्वाहिकींगृहीतिमनूक्तेश्चगृह्यकोरुक्तकर्मागृह्यं विवाहो
त्तरकालेक्रियमाणेत्वेनगृह्याग्नेर्विवाहसंबंधाद्वैवाहिकत्वेनपुनर्विवाहहोमाधिकरणत्वेन विवाहहोमस्यभार्यात्वसिद्ध्यर्थ
त्वेनाग्निसिद्ध्यर्थताभावात् अतएवभगवतापारस्कारार्याणावसथ्याधानेद्वारकालेइत्यादिनोपासनाग्निसिद्ध्यर्थे आव
सथ्याधानंपृथक्कृत्वासमाम्नातं यद्यपियत्किंचान्वाहिकीगृहीतीमनुनाऽन्वाहिकएवपाकोगृह्याग्नावुक्तस्तथापिपाकत्वाविशेषा
त्तस्माद्धेमस्यपाकयज्ञत्वाच्चश्राद्धार्थपाकोप्येवंवकार्यः अतएवशौचजननाशौचयोर्वैश्वदेवाभावेप्येवंवादश्यमहरहःपाकः
कर्तव्यः तस्माद्यज्ञपात्रैर्वैकात्यायनः पचनाग्नौपचेदन्नंसूतकेमृतकेपिवा अपचन्नेकरोत्रेणपुनराधानमर्हतीति पाक
श्चगृह्याग्नेरेकदेशंमहानसेकृत्वाकार्यः तदुक्तंवसुर्विंशतिमते प्रातर्होमंतुनिर्वर्त्यसमुद्धृत्यहुताशनात्। शेषंमहानसेकृ
त्वातत्रपाकंसमाचरेत् तमग्निंपुनरादत्यशालाग्नावेवनिक्षिपेत् ततोग्नेवैश्वदेवादिकर्मकुर्यादतंद्रितइति शेषमग्नेकदे
शः शौरावायनकाम्यकार्योपि नित्यपाकस्यशालाग्नेरेकदेशस्यकार्यतः पाकार्थमुल्मुकंकृत्वातत्रपक्त्वामहानसेवैश्वदेवा
ग्न्यगारेस्थात्याकार्यः सोयंलौकिकः भूरिपाकोभवेद्यत्रश्राद्धादावुत्सवेषुच कृतेपिवैश्वदेवेलौकिकेनैवकार्यतः होमे
नांतरितकेचिदाहुः सर्वत्रलौकिकंनतत्समंजसंनेषांसुपपद्योमदर्शनात् समासत्वोल्मुकस्याहुरन्यागारेमहानसात्(समा
सेचोल्मुकस्याहुराग्न्यागारे) पाकांतेवैश्वदेवात्पाकेनतदप्युपपद्यते आत्मतेप्युल्मुकेपाकःशमित्रेष्टयेतपशौ॥ वचना
दात्मतिःसातुलौकिकत्वेपवर्गतः धूपकोदीपकश्चैवतापार्थीयश्चनीयते संवर्तनेलौकिकाज्ञेयास्तावन्मात्रापवर्गतइति
समासेकृतेमहानसेऽवशिष्टाग्नेर्धूपाद्यर्थंनीतानामग्नीनांलौकिकत्वमित्यर्थः प्रवासेतुविशेषः नित्यपाकस्यावस
थ्याग्नेर्विहितस्याभावात्स्वगृहएवब्रह्मयज्ञवर्जितोदर्शयज्ञादयश्चत्वारोयज्ञाः पत्न्याऋत्विगादिद्वाराकारणीयाःपाक

यज्ञतेनतेषागृह्याग्निसाध्यत्वाच्च । नस्त्रीऽकुर्यान्नानुपनीतइतिनिषेधात्पत्नीनस्वयंऽकुर्यात्किंतुकारयेत्विगादिसन्नि
धावेवप्रवर्तते । तदसन्निधौतुपत्न्यपिस्वयंदेवयज्ञादिकरोति । नोपवासःप्रवासेस्यात्पत्नी धारयतेव्रतं । पुत्रोभ्राताथवापत्नी
शिष्योवास्यबलिहरेदितिशांखायनागृह्ये । प्रोषितेवाप्यशक्तेवास्वाभिन्यनधिकारिणि॥ पुत्रोभ्राताथवापत्नीशिष्यावाऽकु
र्यादितिइतिरेणुकारिकायांचदेवयज्ञादिषुचतुर्षुयज्ञेषुपत्नीकर्तृकत्वस्याप्युक्तत्वात् निरग्नेस्वकर्तृकापवपंचमहा
यज्ञाः। यत्तुपचनंयदिकुर्वीतप्रवसन्नग्निमान्द्विजः । समारोपेक्षतेवाग्नेर्वैश्वदेवंतु लौकिकेइति । मदनपारिजातेपरि
शिष्टेपि प्रवसेदग्निश्चेत्कश्चित्कालमपेक्षयात । यस्मिन्नग्नौ भवेत्पाकोवैश्वदेवस्तत्रैवेत्यादिवचनबलाद्वैश्वदेवः प्र
वासेपिमाग्निनाकार्यइत्यकृतंतद्यस्योशारवायांपंचमहायज्ञेष्वेवैश्वदेवबलिहरणयोःपृथग्विधिरस्तितत्रापीदंकर्तृक
वैश्वदेवविषयं। वाजसनेयिनांतु अथातः पंचमहायज्ञाइत्यादिनापारस्करार्यैः पंचमहायज्ञभाग्विधानेनैवश्वदेव
बलिहरणयोःपृथग्विधानात्पंचमहायज्ञेष्वेवास्माकंवैश्वदेवव्यवहारात् येषामपिवैश्वदेवबलिहरणयोःपृथग्विधि
रस्तितेषामपिपंचमहायज्ञानुष्ठानंगृह्यवोक्तं। यच्चयज्ञविधानंचागृह्यियम्यनजायतेपत्नी संनिहितेत्यग्नौकर्यंकार्यम्
वासिना।गृह्योक्तेनविधानेनदेवभोजनऋषेःकान्। तथाब्राह्मणमहाप्रधानप्रोषितेलौकिकेवाहित्यकृतंतद्यस्योशारवाया
पत्नीसन्निहितेगृह्याग्नौपंचमहायज्ञानुष्ठानंविहितंनास्तितत्रापिकर्तृकदेवयज्ञादिविषयं पंचयज्ञविधानेचगृह्यस्य
नजायतेपत्नीसन्निहितेत्यग्नावित्यकृतत्वात्। अस्माकंपारस्करगृह्यसूत्रानुसारिणोवाजसनेयिनोनप्रवासेब्रह्मयज्ञ
वर्जितादेवयज्ञादयश्चत्वारोयज्ञाभवंति। चत्वारःपाकयज्ञाहुतोहुतःप्रहुतःप्राशितइतिसूत्रेदेवयज्ञादीनांचतुर्णांयज्ञा
नांपाकयज्ञत्वाभिधानात् पाकयज्ञसंस्थात्वान्यथानुपपत्त्याचपाकयज्ञानांगृह्याग्निसाध्यत्वावगमात्। नोपवासःप्रवासे ३४

स्यात्पत्नी धारयतेव्रतं । पुत्रोभ्राताथवापत्नीशिष्योवास्यबलिहरेदितिशांखायनगृह्ये ॥ पंचमहायज्ञान्कृत्वाप्रोषितेवाप्य
शक्तेवास्वाभिन्यनधिकारिणि। पुत्रोभ्राताथवापत्नी शिष्यावाऽकुर्यादितिइतिरेणुकारिकायां। गृह्याग्नावेवस्वगृह्ये देवयज्ञादी
नांचतुर्णामनुष्ठानस्याभिहितत्वात्। प्रवासकर्मापिप्रकृत्य। प्रवसेनित्यंकर्मकृत्वावैदेयथाविधि। सेकल्प्यपूर्ववन्त्यागान्ता
न्कुर्यात्पंचयज्ञवदितिरेणुकारिकायांमोपासनाग्निपरिचर्यायाःपंचमहायज्ञवत्त्यागकर्तृकत्वंतावदस्तापंचमहायज्ञानुष्ठानस्यस्व
गृह्येदर्शितत्वात्।वैश्वदेवबलिहरणयोःपंचमहायज्ञेभ्यःपृथक्त्वेनविध्यभावेनचैवंवैश्वदेवव्यवहारोवाजसनेयिना मित्यकृत
त्वाच्च।आर्षकल्पाध्येपिनप्रवासेवैश्वदेवइत्यकृत्वाच्च। अथातोधर्मजिज्ञासाएवंषडंगोगर्गोपाध्यायेरपिसाग्नेः प्रवासेसतिया
वत्प्रवासंहोमंवैश्वदेवयोरभावइत्यकृतत्वाच्च। अतएवनिक्षिप्याग्निंस्वदारेषुपरिकल्प्यचक्रुत्विजं। प्रवसेत्कार्यवान्विप्रो
मृषेवनाचिरंक्वचिदितिछंदोगपरिशिष्टेकात्यायनेन प्रवासोपस्थिताग्निसाध्यकर्मणा। स्वगृह्यएवानुष्ठेयत्वेनतदर्थंऋत्वि
ग्परिकल्पनमभिहितंकिंच स्वाग्नावेवभवेद्धोमोलौकिकेनकदाचन। नत्याहिताग्नेःस्वकर्मलौकिकोग्नौविधीयतइतितत्रै
वकात्यायनेनलौकिकाग्नौसाग्निकसंबंधिहोमोपिप्रतिषिद्धः तस्मादग्निमतःप्रवासेदेवयज्ञादयश्चत्वारोयज्ञानभवंतिकिं
तुस्वगृह्यएवगृह्याग्नौ अतएवोक्तंदेवलाघोकंटसूत्रे। प्रवसन्यदाहुतेमन्येताथभुंजीतपर्वण्युपोष्यप्रवासेस्तिनमन्येताथ
भुंजितेतिप्रवासेदेवयज्ञाद्यनुष्ठानेविकीर्षितंचेत्स्यात्तदाप्रवसन्यदाहुतंमन्येतेतिनावक्ष्यत्। किंतर्हि। प्रवसन्हुत्वाभुंजी
तेत्येवमेवावक्ष्यत्। एवमन्वाहार्याश्राद्धादिकमपिस्वगृह्यएवानुष्ठेयं। चत्वारःपाकयज्ञाहुतोहुतःप्रहुतःप्राशितइतिपारस्करगृ
ह्ये। प्रहुतःपिंडकर्मणेतिशांखायनगृह्येचपित्र्यकर्मणःश्राद्धापरपर्यायस्यप्रहुतपाकयज्ञत्वाभिधानात्। अष्टकापर्वणःश्राद्धं
श्रावण्याग्रहायणीचैत्र्याश्वयुजीचेतिमन्नपाकयज्ञमेस्याइतिगोभिलस्मृतौचश्राद्धस्यपाकयज्ञसंस्थाक्रमपरिगणितत्वात्॥

अमावास्यादिनियतं प्रोषितेसहचारिणी। पत्न्योनुकारयेत्श्राद्धमन्येनापृत्विगादिनेति ब्रह्मपुराणाच्च। आदिशब्देन क्षया
हादिनियतसोत्रश्राद्धग्रहणं। तस्मादग्निमानप्रवासीस्वगृहएवकृत्तिगादिद्वारा ब्रह्मयज्ञवर्जपंचमहायज्ञदर्शश्राद्धरूपाह
कुर्यादितिसिद्धम्। हेमाद्रिपक्षस्तोव्यासोविशेषमाह त्यक्ताग्नेःपार्वणंनैवनैकोद्दिष्टकदाचन। अत्यक्ताग्नेस्तुपिंडोक्तिः
स्तस्मात्संकल्प्यभोजयेदिति। अत्यक्ताग्निमधिकारिणंप्रत्येवपिंडोक्तिःश्राद्धोपदेशइत्यर्थः। तेनप्रवासाभावेपिपुनराधानस
तिगृह्याग्नेःपुनराधानंकृत्वैवश्राद्धंकार्य्यं। अन्यथाश्राद्धानधिकारात्पूर्णिमाऽमास्योर्योस्तसाग्नेःपराग्निसिद्धान्नलो
जनेतिसिद्धमेव। पराग्निपक्वंनाश्नीयात्पर्वणिप्रोषितेग्निमानितिवचनात् दर्शेचपौर्णमासेवपराग्निपक्वभोजने आधा
नादिकृतनश्येद्धोतस्मार्तनश्यैवेतिचैवचनांतराच्च अत्रान्येनाहितोग्निःपराग्निशब्देनाभिधीयते अतोलौकिकाग्निपक्वननि
षिद्धइतिकेचित्। अपरेत्वेवमाहुः स्वाहितात्परस्याग्नेः पराग्निशब्देनाभिधानाल्लौकिकाग्निपक्वमपिनिषिद्धमेवेति एवंच
सतिपर्वणिपराग्निपक्वनिषेधात्प्रवसतअग्निसान्निध्याभावेनपाकाभावादुपवासेप्राप्तेनोपवासःप्रवासेस्यात्पत्नी धारयते
व्रतमितिशौनकायनगृह्ये प्रवसन्नोपवसेदितिछांदोग्येवोपवासनिषेधात्कथंवर्त्तनीयमित्याकांक्षायांप्रवसन्नग्निमान्विप्रः
पयोमूलफलादिभिःकालनयेदशक्तोतुविधिनापाकमाचरेदितिवचनेनपयोमूलफलादिभक्ष्यद्रव्यंविधीयते। नचप्रवासे
गृह्याग्न्याभावेनपाकाभावात्प्रवसन्नग्निमानितिवाक्येपूर्वपदाश्रवणाच्च पयोमूलादिनाकालनयनंसार्वकालिकमितिवा
च्यं। तथासतिपराग्निपक्वंनाश्नीयादितिवाक्येपर्वग्रहणस्यदर्शेचपौर्णमासेचेतिवाक्यंदर्शादिग्रहणस्यचैवव्यर्थापत्तेः। त
स्मात्पराग्निपक्वंनाश्नीयादितिअयंनिषेधःपर्वण्येवप्रवर्त्ततइतिकेविदाहुः। अपरेत्वेवमाह। नित्यपाकस्यागृह्याग्नि
साध्यत्वात्प्रवासेचगृह्याग्न्यभावेनपाकाभावात्प्रवासेपर्वान्यकालेपिपाकंविनैवपयोमूलादिनाकालनयनंकुर्यात्। तदसा

मर्थ्यंतुदृष्टोदृष्टविधिश्चेननपाकमपिकुर्यात्॥ तदुक्तं। प्रवसन्नग्निमान्विप्रः पयोमूलफलादिभिः। कालंनयेदशक्तोतु विधि
नापाकमाचरेदिति। यत्तु पराग्निपक्वंनाश्नीयादितिवचनंयच्च दर्शेचपौर्णमासेवेतिकथनं तदुभयमपिविधिमतिक्रम्याविरागतः
पराग्निपक्वभक्षणेप्रवृत्तंप्रतिरोधाधिक्यज्ञापनार्थमिति। केदुपक्वंतुनिषिद्धं। शिष्टाचारात्तथाचत्रिकांडमंडनीयेपठंति।
इक्षुक्षीरविकारांश्चश्राद्धश्वपाक्यान्यवास्तथाफलमूलानिचाश्नीयात्पर्वणिप्रोषितेग्निमान्। पराग्निपक्वंनाश्नीयाद्विहाय
गुडगोरसौ शाकपिण्याकमन्द्काद्यामफलादिकं। सकृत्पर्वणिसर्पिष्मद्धविष्यंलघुभोजनं नसायंनोपवासश्च
सायंशाकास्तथैवस्युरिति। सवैधानिनस्तोपासनाग्न्यभावाद्गृहे पित्रोर्लौकिकाग्नावेवपाकइतिनतस्यप्रवासेकश्चिद्विशेषः। गृ
ह्याग्नावदृष्टार्थंविहितेनपाकेनवैश्वदेवादिदृष्टकार्यमिद्धेनपुनस्तदर्थंपृथक्पाकाभ्रयणंयुक्तं नचदृष्टार्थस्यैवपाक
स्यागृह्याग्नेर्नियमः असतिदृष्टकार्यपाकाभावप्रसंगात् नचेष्टापत्तिः पचनाग्नोपचेदन्नंसूतकेमृतकेपिवा अपचन्नेक
रात्रेणपुनराधानमर्हतीति यज्ञपार्श्वेवैश्वदेवाद्यभावेप्यदृष्टार्थतयापाककर्त्तव्यतानियमित्वात् यत्तुकश्चिदाह आ
शौचेवैश्वदेवानधिकारेतदर्थपाकस्यावश्यंविहितस्याभावाद्गृहस्थितेनापिसाग्निनाफलाहारादिकमेवकार्यमिति। तन्न
युक्तं आशौचेवैश्वदेवानधिकारेपिपक्वनाग्नौपचेदन्नमितियज्ञपार्श्वेवचनेनानित्यपाकस्यादृष्टार्थतयाविहितस्यपचना
ग्नौकर्त्तव्यतायानियमितत्वेनपाकसद्भावात्तन्निरग्नेरूक्तस्वात्मार्थपाकनिषेधादाशौचेवैश्वदेवाद्यभावात्तदर्थःपाकोनप्राप्नोति।
अतएवलघुहारीतेनोक्तं पतदर्थंभवेन्नकुटुंबार्थपाकः कारणीयःतच्छेषंस्वयंभुंजीयात् कुटुंबासन्निधानेतुफ
लाहारादिकमेवाचरितमिति इतिसाग्निकस्यपाकाग्निनिर्णयः अत्रेतद्विचार्यतेकिमिदंगृह्यसूत्रेविहितंवैश्वदेवंवापरपर्या
यंपंचमहायज्ञाख्यंकर्मगृह्याग्न्यधिष्ठितएवस्यादुतानानियतोपीति। तत्रकेआचारादर्शाचारचिंतामणिकारादयः वैश्वदेवं

तु कुर्वीत स्वशाखाविहितं ततइति व्यासेन स्वशाखाविहितस्यैवैश्वदेवानुष्ठेयत्वाभिधानादग्निकेप्रातस्वगृह्येवैश्वदेवंत
र्विधेस्श्रवणाद्वैश्वदेवाकरणापत्त्यास्वगृह्यविहितमेवानग्निमतापिवैश्वदेवकर्मेति। यत्तुछंदोगपरिशिष्टकात्यायनः। भ
ग्न्याहिताग्निरौपासनोक्तो होमः शाकलएवच अनाहिताग्नेरप्येषयुज्यतेबलिभिःसहेतिनिरग्नेः प्रकारांतरमाह नछंदोगविषयमि
तिमन्यते तदतद्वत्तद्यज्ञ गर्गकर्कोपाध्यायाद्यः। परेनक्षममते गृह्यसूत्रविहितानांदेवभूतपितृमनुष्यापपादानांचतुर्णां
ज्ञानांपाकयज्ञेषुनेषु गृह्याग्निमतएवाधिकारात तदुक्तंपारस्करगृह्येचत्वारः पाकयज्ञाहुतोहुतःप्रहुतःप्राशितइतिपंच
स्कंबलिः शालायांविवाहेचूडाकरणउपनयनेकर्णांतेसीमंतान्तयनइति सेपंसत्रयीकर्कोपाध्यायादिभिर्व्याख्यानापिसु
रेवनार्थवि बोधार्थंस्मरणयाव्याख्यायते। पचंतिऽनेहमनेनेत्यग्निरिति व्याकरणव्युत्पत्त्याधिकरणव्युत्पत्त्यावापाकः। अकर्त्त
रिकारकेचसंज्ञायामितिचञ्। पाकः पचनोगृह्य आवसथ्योवैवाहिकउपासनः शालइत्यनर्थांतरं पाकेगृह्य आवसथ्येग्नौ
यज्ञाः पाकयज्ञास्तेचत्वारश्चतुर्विधाभवंतीत्यर्थः। केनेपुनश्चत्वारः पाकयज्ञाइत्यपेक्षायामाह। हुतो ऽहुतःप्रहुतःप्राशितइति
। हूयतएवाग्नौयस्मिन्कर्मणिनबलिप्रदानेसहुतः यथासायंप्रातः कालीनौपासनस्यपरिचरणंदेवयज्ञोपाकर्माद्यश्च॥
शांखायनगृह्येपि हुतोग्निहोत्रहोमेनेति अत्राग्निहोत्रशब्देनतत्साधनीभूताग्निसदृशऔपासनोग्निर्लक्ष्यते नहिस्मा
र्त्ताग्निहोत्रहोमोस्ति अग्निहोत्रहोमस्यश्रौतत्वात् तेनाग्निहोत्रेपाकेऔपासनाग्नौयोहोमः सोग्निहोत्रहोमस्तेनहुतः पाकयज्ञो
भवतीत्यर्थः एतेनदेवयज्ञस्यपाकयज्ञत्वमुक्तं। अहुतःबलिकर्मणेसाऽहुतः पाकयज्ञः यथाभूतयज्ञसंपर्कबलि
स्वस्तारोहणमणिकावधानानि। शांखायनगृह्येपि। अहुतोबलिकर्मणेति। बलिकर्मणस्त्वत्वस्तारोहणस्याप्युपलक्षकं॥
होमाभावात्तएतेनभूतयज्ञस्यपाकयज्ञत्वमुक्तं प्रहुतःप्रकर्षेणहुतः प्रहुतः यत्रहोमोबलिहरणंच प्रकर्षश्चबलिप्रदानाधि

क्यात्। यथापक्षादिश्रवणाकर्माद्यः यद्वाहुतएवपक्षादिश्रवणाकर्मादिरतत्रोक्तः हूयेतप्रधानतयाग्नौसहुतः नचास्मिन्पक्षेबलिसंब
धास्यपरिसंख्या प्रहुतशब्देनत्वन्यष्टकाकर्मपार्वणआह्नादिपित्र्यकर्मोच्यते प्रकर्षश्चहोमपिंडदानभोजनार्थीतिकर्त्तव्यताविशेषात् शांखायनगृह्येपि। प्रहुतः पित्र्यकर्मणेतिएतेनपित्र्यज्ञाख्यपित्र्यबलेरन्वाहार्यश्राद्धस्यचपाकयज्ञत्वमुक्तं अतएवगो
तमेनसप्तपाकयज्ञसंस्थास्कंश्राद्धं पठितंतेअष्टकाःपार्वणः श्राद्धंश्रावण्याग्रहायणीचैत्र्याश्वयुजीत्यन्तिसप्तपाकयज्ञसंस्था
इति अतएवश्रीमद्दर्शयज्ञोपाध्यायैः कर्कोपाध्यायैश्चयत्तगृह्यविहितमतएवश्राद्धेऽधिकारोनानग्निमतइत्यभि
हितंतच्चुक्तरंतेनाग्निमतः प्रवासेश्राद्धेन भवति किंतुअग्निसंनिधावेवत्रिर्गादिद्वारापत्न्याकारणीयं। इतरपाकयज्ञवदग्नि
साध्यत्वात्प्रपेवितंचेतद्विस्तरतः प्राक एवेचसतिगृह्योक्तानांविकृतिश्राद्धानांसर्वेषांपार्वणश्राद्धविकृतित्वेनप्रहुतपाक
यज्ञत्वसिद्धेभवतदुक्तं शांखायनगृह्यकारिकायां। पित्र्ययत्पिंडदानादिकर्मसप्रहुतोमखः अतोयत्किंचनश्राद्धभाव
येत्तच्चहुतत्तुनर्हितियद्यपि नहिस्मृतसंबंधःप्रेतश्राद्धेषु विद्यति कृतेषुतेषु शास्त्रेण पितृलोकाभिरिष्यतइति शांखायन
गृह्यकारिकायासपिंडिकरणपूर्वं भावनांप्रेतश्राद्धानांप्रहुतपाक यज्ञत्वाभावउक्तः सपिंडिकरणांतानिप्रेतश्राद्धानि
यानिवैतानिस्युर्लौकिकेवन्हावितिशाट्यायनोब्रवीदितिसर्वं निबंधोदाहृतवचनेनप्रेतश्राद्धेषुलौकिकाग्नेर्विनियोगश्चोक्तः।
अतानगृह्याग्निसाध्यानिप्रेतश्राद्धानि। तथापिप्रेतवाग्गृहपतेापरेशीकरणमितिछंदोगगृह्यप्रेतवाग्गृहपतेास्वयंज्यायानिति
शांखायनगृह्येचगृहपतौप्रेतेसतिएकादशाहश्राद्धात्पाक एकादशेऽहनिगृह्याग्न्याधानस्यविहितत्वात् गृह्याग्न्याधानपूर्विकै
वैतेषुप्रवृत्तियथाहछंदोगपरिशिष्टकात्यायनः एतद्गृहपतौप्रेतेकुर्याद्वैकादशेऽहनि। प्रागेवैकादशश्राद्धात्सद्योजागरणादिकं
नतत्पूर्वंयतः प्रोक्तः सपिंडनविधिः क्वचित्। वृद्धिश्राद्धस्यलोपः स्यादुभयोरपिपक्षयोः। ज्येष्ठः कुर्यात्तथाधानंकनीयांश्चवि

वर्जयेत्। सेकादशेहिकुर्वीतनहादर्शवाविचक्षणइतिरेणुकारिकायांमपि। एतन्मृतेपतौप्रेतंकुर्याद्देकादशेहनि। प्रागेवैकादश श्राद्धाद्धिश्राद्धविवर्जितात्एवंज्येष्ठः समादध्यात्कनीयांश्चविवर्जयेत्। एकादशेहिकुर्वीतिनहादशेवाविचक्षणइति। एकादशाह ःसंभवेद्वादशाहो यैकादशाहश्राद्धकालेनोक्तः कौर्मेतिनहादशहान्यपिप्रागेवैकादशश्राद्धादित्यनुसंधेयं। यत्तुयद्दहवीद्वहिगाप चेयेतिकात्यायनगोभिलादिसूत्रेवृद्धिनिमित्तभूतकर्ममात्रोपक्रमेतासपिंडिकरणात्पूर्वविधायकं तद्दादशाह्यधानव्यतिरिक्तो पनयनादिसर्वकर्मविषयंबोध्यं। छंदोगपरिशिष्टस्यकात्यायनवचनस्यान्यथाऽनुपपत्तेः। यत्तु उशनसोवचनं। ततःसपिंडि करणंवार्धिकेमृतवत्सरे। आधानाद्युपसंग्राह्यावेतत्त्यागपित्वत्सरादितिनेदंश्राद्धान्यं ध्येयपरं। सपिंडीकरणंतुगृह्याग्निमंत्रणवा धिकारः। पिंडकरणंप्रथमंपितृणांप्रेतःस्यात्पुत्रवांश्चेदितिगृह्यसू त्रेभर्तृयज्ञकर्कोपाध्यायादिभिर्भाष्यकारैःश्राद्धसू त्रेचकर्कोपाध्यायस्तयैवनिर्णीतत्वात् उक्तंचाभियुक्तैः सपिंडिकरणंसाग्नेरग्निर्नेहोद्वाहानुगोधातः निरग्निनोधिकारोस्ति होमाभा वात्सपिंडने होमाधिकरणंश्रुतस्याग्नेरभावेन होमासंभवादिति होमाभावादित्यस्यार्थः एकोद्दिष्टान्यनग्नेश्चहोमाभावाद्ध वेन्निहि। उल्मुकस्यविचारेनभाष्यकारैः कृतमनाकृतलौकिकाग्नेर्निधानस्यार्थिकत्वेनेवोल्मुकोभवेत् अथाच्यते स्मृतौप्रो क्तंप्रेतश्राद्धेषुनोल्मुकः तद्दावसथ्यकेचाप्युदयेश्राद्धेभवेत्तुकिं उक्ततोभाष्यकारणांमतेऽग्नौहूयतेयद्दा। तदोल्मुकनिधा नम्यादेवंसर्वसमंजसमिति। यत्तु आन्वष्टक्यंचपूर्वेद्युर्मासिमासिस्थपार्वणं। काम्यमभ्युदयेश्राद्धमेकोद्दिष्टंतथाष्टमं। चत्तु र्ष्वेषुसाग्नीनांवहोहोमोविधीयते पित्र्यब्राह्मणहस्तेस्याद्गुत्तरेषुचतुर्ष्वपि इतिमिताक्षराहोमाद्युद्दाहृतावलायनगृह्य परिशिष्टेसाग्नेरेकोद्दिष्टेऽग्नौकरणाद्होमाभावादेकोद्दिष्टशब्देनसपिंडीकरणंलक्ष्यते। तेनसाग्नीनामपिसपिंडीकरणेवि प्रपाणावग्नौकरणहोमइत्यकर्तृकंतल्लावंतरविषयमित्यकर्तृकश्राद्धेहोमोस्मृतिदर्पणेच। केचित्तुनिरग्नेरपिसपिंडीकरणंस्त्ये

वाधिकारः। सपिंडीकरणंतानिप्रेतश्राद्धानियानिवै। तानिस्युर्लौकिकेवन्हावितिशाट्यायनोब्रवीदितिसर्वेनिबंधोद्दाहृतवचनेन सपिंडिकरणसहितेषुसर्वेषुप्रेतश्राद्धेषुलौकिकाग्नेर्विनियोगस्यविहितत्वेनगृह्याग्नेर्विनियोगाभावात् एवंचसतिसपिंडीकर णस्यलौकिकाग्निसाध्यत्वान्तदंगभूतःप्राप्तोप्यग्नौकरणहोमोलौकिकेऽग्नौनकार्यः। नपैतृयज्ञियोहोमोलौकिकेऽग्नौविधीयतइति निषेधात् किंतर्हि अन्यभावेतुविप्रस्यपाणावेवोपपादयेदितिमनुवचनात्पित्र्यपंक्तिमूर्द्धन्यविप्रपाणावित्याहुः एवंचसतिलौकि काग्नौहोममात्रप्रतिषेधादुल्मुकस्यचनिषेधाभावाद्धौकिकोल्मुकेचिदिच्छंतितन्न। यत्रहिश्राद्धप्रयोगेहोमार्थतयाअ ग्नेरंतर्भावोस्तितत्रैवोल्मुकनिधानंन्याय्यं। नचहोमार्थतयाग्नेरंतर्भावोऽत्रास्ति। उल्मुकशब्दस्याग्न्येकदेशवाचित्वेनेकदे शीभूताग्न्यपेक्षायांहोमार्थप्रकृताग्नेरेकदेशग्रहणस्योत्तरार्द्धवन्न्यायत्वात् अतोनतत्रोल्मुकनिधानंयुक्तं। एवंनिरग्नेः सपिंडीकरणाधिकारमन्यमानाः केचित् सपिंडीकरणसहितानित्रेतश्राद्धानिविहितकालापकर्षपूर्वकंकृत्वापुनरुनाब्दि कोतान्यनुमासिकश्राद्धानितथैवकृत्वामासद्वयोनाब्दपूर्वकमाब्दस्याधानंगृह्यपंक्तौप्रेतसंपुण्याहंकर्तव्यं। य थाहोशनाः। ततःसपिंडीकरणंवार्धिकंमृतवत्सरे। आधानाद्युपसंग्राह्यावेतत्त्यागपित्वत्सरादिति। शांखायनगृह्यकारिकाका रोपित्र्यंग्राह्यंयथाज्येष्ठःसपत्नीकोधिकारवान् प्रेतेपितरिवाकुर्याज्ज्येष्ठपुत्रोग्निधारणं। सपिंडयित्वापितरमविभक्तो नुजेरपिइत्याहुः अत्रखंडरागपरिशिष्टस्थकात्यायनोक्तमनुमाणिपुरदीक्षितोक्तिमनुस्त्येवंवाजसनेयिनःसभार्यंरतीत्यलं प्रा शितःयत्रभार्यतेनहोमोनापिबलिप्रदानेयथानुयज्ञोयथार्हंभिक्षुकानतिथींश्चसंभजेरन्निति। तथासवांसंपर्यसिषाय संअपयित्वाब्राह्मणान्भोजयेदिति शांखायनगृह्येपि प्राशितोब्राह्मणोहुतइतिएतेनमनुष्ययज्ञस्यपाकयज्ञत्वमभिहितं इतिशब्दः प्रकारांतरपरिग्रहे अस्तिहिपंचमः प्रकारोब्रह्मयज्ञस्तस्यपाकयज्ञत्वंश्रुत्यर्थंचत्वारइतिग्रहणं एवंचाग्निना

पिब्रह्मयज्ञः कर्त्तव्य एव। अत्रभट्टैयज्ञभाष्यं। उपदिश्यमानाएवैतेचत्वारोभवंति प्रकारवचनमप्रकृतिविशेषकरत्वादनर्थकमिति तनानर्थकं प्रकारोतस्सूत्वनार्थत्वात् चत्वारः प्रकारउपदिष्टा अस्तिहिपंचमः प्रकारः सनोपदिष्ट स्तत्सूत्वनार्थमेवैततसूत्रं कश्चमौ। ब्रह्मयज्ञइतितस्यविधेर्ब्राह्मणोपदिष्टत्वात्। यथाहरहः स्वाध्यायोऽध्येतव्यइति। पंचमकूबहिः शालायामितिसूत्रमंडपप्रमंगेपूर्वं व्याख्यातं। सेयंसूत्रत्रयी लौकिकाग्निनिर्णयार्थंहिप्रवृत्ता। तथाहि॥ भगवतागृह्यसूत्रे कृतावाबद्धृत्यस्थालीपाकानांकर्मत्वेननगृह्याग्निसाध्यानिकर्माणिवक्तुंप्रतिज्ञातानि। गृह्याग्न्युत्पत्त्यर्थंवावसथ्याधानमुक्तं तच्चदारकालेविहितादारकालइत्यनेनवक्तव्यतयाविवाहः प्रसक्तः। तत्रचलौकिकोग्निरिष्यते तत्प्रसंगेनकस्मिनकर्मणिगृह्योग्निः कस्मिंश्चलौकिकइत्यग्निविवेकोपिवक्तव्यस्तदर्थंचत्वारः पाकयज्ञाइत्यादिकासूत्रत्रयीसमारभ्यते तत्रचचत्वारः पाकयज्ञाइत्यनेनपाकयज्ञानिश्चत्वारुविधेयप्रतिज्ञापरेहुतइत्यादिनाबहुतादिभेदेनतदेवप्रपंचितं पाकयज्ञसमाख्याः न्यथाऽनुपपत्त्याचगृह्याग्नावेवपाकयज्ञानुष्ठानेगृह्याग्निमतएवपाकयज्ञेष्वधिकारइतिप्रदर्शितं। मनुनापिइदमेवप्रदर्शितं। वैवाहिकेग्नौकुर्वीतगार्ह्यकर्मयथाविधिपंचयज्ञविधानेचपंक्तिश्चाल्वाहिकींग्रहीति। गृह्योक्तत्वेनपाकयज्ञानांगृह्यकर्मत्वात्तद्गृह्याग्नावनुष्ठानमित्यर्थः वैवाहिकोगृह्याग्निः एवंचविवाहादिष्वगृह्यस्थालीपाकानांकर्मेतिप्रतिज्ञाबलात्प्राप्तस्यगृह्याग्नेर्निवृत्त्यर्थंपंचमकूबहिःशालायामित्यादिनाबहिःशालाविधानमुपपन्नं लौकिकाग्निर्विधीयते। अनयात्वसूत्रत्रय्यैतत्सिद्धं यद्धिवाहादिपरिगणितेष्वेवकर्मसुलौकिकोग्निस्तदितरेषुसर्वेषुगृह्योक्तेषुकर्मसुवचनाद्गृह्याग्निर्भवतीति तदेवं स्वगृह्यविहितानांदेवऋषिपितृमनुष्यभूतपक्षाणांचतुर्णांयज्ञानांपाकयज्ञत्वात्तेषुगृह्याग्निमतएवाधिकारः सिद्धः अतएवदेवयज्ञादीनांचतुर्णांसत्यपिप्रवासेगृहएवानुष्ठानमित्यकर्त्तृकनचसमावर्त्तनानंतरमथातः पंचमहायज्ञाइत्यादिनापंचमहायज्ञकथनेनकृतविवाहस्याकृतावसथ्याग्निपरिग्रहस्याकृतविवाहस्य

वापंचमहायज्ञेष्वधिकारसिद्ध्यर्थमितिवाच्यं नहिपंचमहायज्ञेष्वधिकारसिध्यर्थंसमावर्त्तनानंतरंपंचमहायज्ञाभिधानं केशांतादूर्ध्वमपत्नीकउछिन्नाग्निरनग्निकोवाप्रवासीब्रह्मचारीचेतिपृथाद्विविधानपरिशिष्टेकेशांतादूर्ध्वमपत्नीकस्योछिन्नाग्नेरनग्निकस्येतिप्रसवास्थानपरिशिष्टेचतदधिकारस्यविहितत्वात् नचानयोःपरिशिष्टयोर्निर्मूलत्वमित्याशंकनीयं गर्गोपाध्यायहरिहरादिभिः स्वस्वग्रंथे धृतत्वात् किंतु लौकिकाग्निसाध्येषुकर्मस्वभिहितेषुपूर्वंप्रक्रांतत्वेनबुद्धिस्थत्वाद्गृह्याग्निसाध्यकर्मणामेवोपस्थितेः समावर्त्तनानंतरमभिधेयत्वाच्चविवाहावसथ्याधानयोः पूर्वमभिहितत्वादभिधेयत्वेनावशिष्टत्वाच्च पंचमहायज्ञानामंत्राभिधाने सूत्रस्याप्ययमर्थः अथसमावर्त्तनानंतरंयतःकृतविवाहस्यकृतावसथ्यस्यपंचमहायज्ञेष्वधिकारः अतोहेतोः पंचमहायज्ञाःदेवयज्ञादयःपंच व्याख्यास्यंतइतिसूत्रशेषः अपरेत्विदंसूत्रमेवंव्याचक्षते अथप्रातरोपासनाग्निपरिस्तरणानंतरंप्रातर्होमानंतरमितियावत् अनइति भोजनकालप्रत्यासत्तेर्हेतोः पंचमहायज्ञाःदेवयज्ञादयःपंचव्याख्यास्यंतइति भोजनकालप्रत्यासत्तिश्चप्रजापतिंवैभूतान्युपासीदग्निमितिभक्त्वाऽथैनंमनुष्याः प्रावृताऽउपस्थं। कृत्वोपासीदंस्तानब्रवीत्सायंप्रातर्वोशनंप्रजावोमृत्युर्वाग्निर्वोज्योतिरिति तथा। तस्मादुसायंप्रातराश्येवस्यात्सुयोहैवंविद्वानसायंप्रातराशीभवतिसर्वमेहैवासुरितियदुहकिंचवाचाव्याहरतितदुहैवभवतीतिप्रातः शब्दश्चाष्टधाविभक्त्यन्तः पंचमभागपरः तथाचदक्षः पंचमेनुतथाभागेसंविभागोयथार्हतः देवर्षिभूतमनुष्याणां कीटानांचोपजीवनं संविभागंततः कृत्वागृहस्थःशेषभुग्भवेदिति सायं शब्दश्चसार्द्धप्रहरनोत्तरवाक इष्टव्यः। तदाहछंदोगपरिशिष्टकात्यायनः ऋषिभिर्हि दर्शनमुक्तं विप्राणामग्न्यवाहिनां संततंनित्यमहनिचतयातमस्विन्यासार्द्धप्रहरणमोतमिति अत्रपंचमहायज्ञाइत्यपक्रम्यचतुर्णांयज्ञानामनुष्ठानमुक्तं। पंचमस्यब्रह्मयज्ञस्यतुपंचमहायज्ञाइत्यनेनवक्तुमुपक्रांतस्याप्यकथनमदोषः। दर्भेषु दर्भपाणिः स्वाध्यायंचयथाशक्त्यादावारभ्यवेदमितिस्नानवि

धिसूत्रेतर्पणात्पाकउक्तत्वात् तत्रचेतत्कृतस्तदा ऽत्रनकर्त्तव्यः। तत्रचेन्नछतस्तदात्रेतेनैवविधिनाकर्त्तव्यः विकल्पेनहिकालात्सम्पर्यंत इति। तस्मात्सिद्धमेतत् अग्निमतएवगृह्योक्तं वैश्वदेवारब्धंकर्मेति॥ यत्तूक्तं वाजसनेयिनोगृह्यैऽनग्निकंप्रतिवैश्वदेवांतरविधेरनुक्तत्वात्वैश्वदेवाकरणापत्तिरिति। तन्न। स्वगृह्येनिरग्निकंप्रतिवैश्वदेवांतरविधेरविधानेपिगर्गपद्धतिहरिहरभाष्यधृतपृष्ठादिविविधानपरिशिष्टप्रसंगात्यानपरिशिष्टयज्ञपार्श्वपरिशिष्टेनतद्विधानात्। तथाचपृष्ठोदिविविधानपरिशिष्टे अथातोधर्मजिज्ञासाकेशांताध्वंदूमपत्नीकउछिन्नाग्निरनग्निकोवाप्रवासीब्रह्मचारीचान्वग्निरितिग्रामादग्निमाहृत्यपृष्ठोदिवीत्यधिश्रयणसमिंतमितिहाभ्यामुपस्थानंव्याहृतिभिस्त्रिभिश्चसावित्रैःप्रज्वाल्यतार्द्धसक्तुंस्तूस्तत्सवितुर्विश्वानिदेवसवितरितिपुनस्तेतिसमिध्यपूर्ववदक्षेतेहुत्वापाकेश्रपयेत्तेनवैश्वदेवंकुर्याद्ब्रह्मणोप्रजापतयेगृह्यकश्यपायानुमतयेविश्वेभ्योदेवेभ्योग्नयेस्विष्टकृत्यइत्यपस्पृश्यपूर्ववद्हुत्वेकमेनंवक्तेदृषापाकोभवतिनदृषापाकंपचेन्नदृषापाकमश्नीयादन्नपिंडपितृयज्ञपक्षाद्याश्रयणानिकुर्यादिति अस्यार्थः। अथशब्दोगृह्यकल्पविहितपंचमहायज्ञानंतर्य्यप्रज्ञाप्यर्थः अग्निमतोगृहस्थस्यनरधिकारात्तदुहृतस्याधिकारस्यविधेयत्वादतोहेतोः कतिपयधर्मजिज्ञासाज्ञातुमिछायांकर्षाकर्षोभवतीतिसप्तमीस्थाने प्रथमाउच्यते केशांताद्ध्वंमुपकुर्वाणःस्नातकोवाअपत्नीकः अविवाहितपत्नीकोमृतपत्नीकोवाउछिन्नाग्निःपतिताग्निःसंस्थितानिर्गोवा अनग्निकःकृतदारसंग्रहोपिनिमित्तवशादधिकारारंभवेनाऽनाहिताग्निःप्रवासिसाग्निकश्चिरकालोषितपाकः। तदुक्तंप्रवसन्नग्निमान्विप्रःपयोमूलफलादिभिः कालंनयेदयज्ञतोतुविधिनापाकमाचरेदिति। पाकमाचरेविधिनादेवमग्निकस्यनप्रवासेवैश्वदेवः अतएवगर्गोपाध्यायेरुक्तं साग्निःप्रवासस्तावद्यावत्प्रवासंहामेवैश्वदेवयोरभावइतिब्रह्मचारिनैष्ठिकः। ननुब्रह्मचारिणःपाकविधानाभावाद्यतीश्चब्रह्मचारीचपक्वान्नस्वामिनाचुभाविति। अतःकथमेतदुक्तमुच्यते। पितृश्राद्ध

३१

दौनस्यापिपाकसंभवात्गर्गोपाध्यायस्तुब्रह्मचारिणःस्वाग्निविलोपेसतिअनेनैवविधिनाऽग्न्याहरणादिप्रज्वालनांतंविधायसमिदाधानेकार्य्यो। इदंचाग्न्याहरणंसमिदाधानार्थं।पाकस्यतुनिवृत्तिरस्मेत्याह तच्चिंत्यं। यतःपारस्करगृह्यकल्पेब्रह्मचारिणःसमिदाधानार्थंनित्यतयाग्निधारणस्यावश्यकत्वात्। यत्तुतस्मिन्नग्नौपूर्ववदाधायवाचंविसृजतइतिपारस्कराग्न्यात्यंतशब्दः संबंधिन्यासायंकालिनाग्निपरिचर्यायामुपनयनाग्नियामेकेवेदितव्यं - - - - - - - - - - अचार्यविवेकः। अपत्नीकोछिन्नाग्न्यनग्निकानात्रयाणांपाकपचनपूर्वकंवैश्वदेवार्थमग्न्याहरणं। प्रवासिब्रह्मचारिणोस्वपाकार्थमेवनैवैश्वदेवार्थब्रह्मचारिणोवैश्वदेवानधिकारात्। प्रवासिनस्वगृहेवैश्वदेवस्यकृतत्वेनपाकस्यवैश्वदेवविवर्जितत्वाभावेनचाभ्युपेत्याभावात्। पकस्मिन्नहनिवैश्वदेवहुयनिषेधाच्चग्रामादग्निमितिलोकिकेनपुनःसंस्कृतेपूर्ववदहुत्वेतिपूर्ववदित्यनेनगृह्योक्तहोममात्रंगृह्यते। सचहोमःसायंप्रातःकालीनस्तेनपूर्ववद्हुत्वेकमेतिमणिकाभावादुहुकंभसमीपपर्जन्यादिभ्यश्चेत्यादानं। अन्नंउरुकंभइतिगौतमाभिधानात् उरुपानमिति धावित्यापस्तंबवचनाच्च। शेषंनिगदव्याख्यातं विवाहाद्ध्वंभावमध्यधानात्पूर्वंपृष्टादिविविधानानाप्युदयिकपूर्वंकमग्निंस्थापयित्वानित्यहोमादिकुर्यादितिहरिहरः प्रसवोत्थानपरिशिष्टेपि अथसंग्राहितोवाच भगवन्यावज्जीवंकस्यउछिन्नाग्निनाकोविधिःस्यात्सहोवाचदेवपितृमनुष्याणांनिर्वपणार्थंपाकश्रयणंप्रसवार्थंविधिंवक्ष्यामिविधानेनाग्निमुपसमाधायब्राह्मणानांनदृषापाकोभवतिकेशांताद्ध्वंमपत्नीकस्योछिन्नाग्नेरनग्निकस्यानाम्नादन्वग्निरित्यग्निमाहृत्यपृष्टादिवीत्यधिश्रयणंत्रिभिश्चसावित्रैःप्रज्वाल्यतत्सवितुस्तऽसवितुर्विश्वानिदेवसवितरित्यवंप्रणीतेभवतिपूर्ववद्दृक्षेतेहुत्वापाकेश्रपयेत्तेनवैश्वदेवंकुर्याद्ब्रह्मणोप्रजापतयेगृह्यकश्यपायानुमतयेविश्वेभ्योदेवेभ्योग्नयेस्विष्टकृतइतिपूर्ववद्हुत्वेहरेन्नदृषापाकेश्रपयेन्नदृषापाकमश्नीयात्तस्मा

देवनदृथापाकोभतिवैग्रहस्थो ब्रह्मचारिप्रवासीवा आमंभेक्ष्यमाहोरात्रादिपिंडपितृयज्ञाग्र्यणंचेति यज्ञपार्श्वेकात्यायनस्त्व
न्यथाह अनाहिताग्निभिःकार्यो वैश्वदेवोयथाविधि अभक्ष्यस्तुभवेत्पाकोवैश्वदेवविवर्जितइत्स्मृतौ सभार्योयोगृहीताग्निवि
धुरःस्नातकोपिचा। व्याहृतिभिःसमस्ताभिर्व्यस्ताभिश्चततःपरं हुत्वातुशाकलैर्मंत्रैःप्राजापत्यंततःपरं स्विष्टकृच्चहुनेदद्धे
देवयज्ञोयमीरितः भूतयज्ञंततःकुर्यात्पंचन्यादित्रिकंविना नित्यश्राद्धंनिरग्नेःस्यात्साग्नेःपिंड्योवलिःस्मृतः पितृयज्ञोयमा
ख्यातोऽनग्नेर्वापि स्मृतोबलिः निर्वाप्यब्रह्मयज्ञःस्यात्तर्पणंचमनुष्यमतइति ज्योतिष्टोमे काष्ठशकलहोमेविनियुक्ताः देवकृत
स्येनसोवयजनमसीत्यापोमैत्राःशाकलाउच्यंते एतेनाग्निमंतंप्रतिवैश्वदेवमकार्ष्टयमुक्तं पूर्वाहुतिविधानमसत्वात्यापरिशि
ष्टस्यामुक्तपक्षः यज्ञपार्श्वपरिशिष्टोक्तश्चापरः एवचोदाहृतपरिशिष्टानांस्वशाखावियतोहिश्वेदेवंतुकुर्वीतस्वशाखाविहितंतत
इतिव्यासवाक्येनसहनविरोधः केचनस्मृतिनामसर्वशाखासाधारण्यात्स्मृत्युक्तमपिवैश्वदेवमनुष्ययमन्यंते तन्नवक्ष्यमाणैः भ
नग्निकल्पोविप्रस्यान्याद्याहुतिभिःस्वयं हुत्वाशाकलमंत्रैश्चशिष्टंभूतबलींहरेदिति शंखश्च अग्नेव्याहृतिभिर्हुत्वान
धामैत्रैश्चशाकलैः अन्विष्टस्यचभूतेभ्यस्ततोग्नीयादग्निमानिति व्यासः शाकलेनविधानेनजुहुयाद्वौकिकेऽनले। व्यस्ता
भिर्व्याहृतिभिस्तुसमस्ताभिस्ततःपरं षड्भिर्देवकृतस्येतिमंत्रविद्विर्यथाक्रमं प्राजापत्यंयदस्मिन्स्विष्टकृतंहुत्वेवंहारशाहुती। ॐ
कारपूर्वंस्वाहांतेत्यागःस्विष्टविधानतः भूर्विदर्भानसमास्तीर्यषड्भिर्मंत्रैस्तथाक्रमं विश्वभ्यश्चेवभूतेभ्यःसर्वभूतेभ्यएवच।
भूतानांपतयेचेतिनमस्कारेणशास्त्रवित् दद्याद्बलित्रयंचाग्नेपितृभ्योपिस्वधानतः पात्रनिर्णेजनंवारिवायव्यादिशिनिक्षिपे
न्न उच्छृत्यषोडशग्रासमात्रमन्नंघृतोक्षितं इदमन्नमनुष्येभ्योहंतेनक्त्वासमुत्सृजेदिति गोत्रनामस्वधाकारैःपितृभ्यश्चा
पिशक्तितइति॥ अथाग्निमतःपंचमहायज्ञप्रयोगः तत्रपंचमहायज्ञानुष्ठानमन्वहं प्रथमप्रयोगेआवसथ्याधानादिनेमा

न्पूजापूर्वकमाभ्युदयिकंश्राद्धमेकमेवपंचमहायज्ञार्थं वैश्वदेवान्तादुद्धृत्यघृतेनाग्निधारणं ॐ यद्देवादेवहेडनंमित्यादिभि
स्तिसृभिर्मंत्रैरग्निमणिकोद्भवेनसुद्रुष्टिपतनजनितदोषपरिहारार्थमुद्धृत्यानंप्रोक्षणं। कृतकुशपवित्रग्रहणपवित्रपाणिनाचम्यप्राणाना
यम्यदेशकालयोःसंकीर्त्यगोत्रंतेपंचसूनाजनितदोषनिबर्हणपूर्वकनित्यकर्मानुष्ठानसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंपंचमहायज्ञंकरिष्य
इतिसंकल्पःकार्यः ततोग्निपूजनंसंपूज्यचेततोवन्हिंदद्याच्चाहुतयःक्रमादितिमार्कंडेयात् तद्यथा ॐ चत्वारिशृंगेतिमंत्रेणवै
श्वदेवेनुपावकइतिस्मृतेः पावकनामानमग्निंध्यात्वा ॐ एषोहदेवःप्रदिशोनुसर्वाइतिमंत्रेणाग्नेरावाहनं ॐ अग्नेनयेतिमंत्रांते
ॐ सनःपितेवेतिमंत्रांतेवापावकाख्याग्नेर्वैश्वानरायनमइतिगंधादिभिःपंचोपचारैःपूजनं ॐ मुखंयःसर्वदेवानांहव्यभुक्कव्यभुक्तथा
पितॄणांचनमस्तस्मैविष्णवेपावकात्मनेइत्यग्निंप्रणमेत् ततोमणिकोदकेनप्रदक्षिणमग्नेःपर्युक्षणं इतरयाजुहुयात्। दक्षिणजान्वा
च्यदेवतीर्थेनस्रुक्समिद्धेनैकांपंचाहुतीर्जुहुयात् ॐ ब्रह्मणेस्वाहा इदंब्रह्मणे ॐ प्रजापतयेस्वाहा इदंप्रजापतये ॐ मृत्यवेस्वाहा
इदंमृत्यवे ॐ कश्यपायस्वाहाइदंकश्यपाय ॐ अनुमतयेस्वाहा इदमनुमतये। एषपंचाहुतिकोहोमोदेवयज्ञः नात्रसंस्रव
प्रासने अथभूतयज्ञः ॐपर्जन्यायनमः इदंपर्जन्याय ॐ अद्भ्योनमः इदमद्भ्यः ॐ पृथिव्यैनमः इदं पृथिव्यै इतिबलित्रयंप्राक्सं
स्थंउदक्संस्थंवामणीकंसमीपेदद्यात्। ॐ धात्रेनमः इदंधात्रे ॐ विधात्रेनमः। इदंविधात्रे। इतिबलिद्वयं हार्ष्यवोः। ॐ शायवेनमः।
इदंशायवे। इतिप्रदक्षिण्येनप्राणादिप्रतिदिशं। ततस्तेषामेवपुरस्तात् उत्तरतोवाप्रत्येकंप्राच्यादिभ्यो दिग्भ्योबलिचतुष्टयंदद्यात्
तद्यथा। ॐ प्राच्यैदिशेनमः।इदंप्राच्यै ॐ दक्षिणायैदिशेनमः।इदंदक्षिणायै। ॐ प्रतीच्यैदिशेनमः इदंप्रतीच्यै। ॐ उदीच्यैदिशेन
मः।इदमुदीच्यै।इति। ॐ ब्रह्मणेनमः।इदंब्रह्मणे। ॐ अंतरीक्षायनमः इदमंतरीक्षाय। ॐ सूर्यायनमः।इदंसूर्याय। इतिबलित्रयं
प्राक्संस्थेबलिहरणदेशस्यमध्येदद्यात्। ॐ विश्वेभ्योदेवेभ्योनमः।इदंविश्वेभ्योदेवेभ्यः ॐ विश्वेभ्यश्चभूतेभ्योनमः। इदंविश्वे

भ्यश्च भूतेभ्यः इति बलिहरणं तेषामुत्तरतः ॐ उषसेनमः इदमुषसे । ॐ भूतानांपतयेनमः इदं भूतानांपतये इति बलिहरणं तयोश्चोत्तरतः इति भूतपतयः । अथ पितृयज्ञः प्राचीनावीति दक्षिणाभिमुखो भूत्वास्वधां जान्वाच्य । ॐ पितृभ्यः स्वधानमः । इदं पितृभ्यः इति बलिं ब्रह्मादि बलिन्न्यस्य दक्षिणान्तः पिदधतीर्थेन दद्यात् । ततो ऽपः स्पर्शनं च इति पितृयज्ञः ततो यज्ञोपवीति भूत्वा ततस्त्रेप्रक्षाल्य । ॐ यद्वस्मे तत्ते निर्णेजनं नमः इदं यद्वस्मणे । इति पात्रनिर्णेजनं ब्रह्मादि बलीनामुत्तरापरस्यां दिशि निनयेत् । यथोक्तानां स्थानिग्रहहारादीनां बलि दानासंभवे तु तुर्क्कं छंदोगपरिशिष्टकात्यायनेन । एकत्रवेदविकृष्टानां भवंती तिरेणसंसक्तांश्चेति गृहहारादीनां यथोक्तस्थानबलिदानासंभवेनएकत्रवेदैकस्मिन्नेवस्थानेयद्बलयोदीयंते तदा अविकृष्टा अव्यवहिताः इतरेतरासंसक्ताश्चपरस्परमसंलग्नाश्च दातव्याइत्यर्थः अस्मिन्नपिपक्षेग्नेः पश्चिमतश्चतुरस्रे मंडले हारादिकं प्रकल्प्ययथोक्तस्थाने बलिदानंकार्य्यं । बलिनभिधायाह छंदोगपरिशिष्टकात्यायनः । पिंडवच्च पश्चिमामाप्रतिपत्तिरिति । पिंडवत्पिंडानांयामाप्रतिपत्तिः पिंडोत्सर्गोजविप्रेभ्योदद्यादग्नौजलेपिवेत्यनेनविहितासैवबलिनोपश्चिमाहुतीयाप्रतिपत्तिरित्यर्थः । ततोबृहत्सराशरोक्तकल्पेनलघुनाग्नेघृतेनेत्येकया आब्रह्मन्नित्येकया अहाव्यग्नेहविरित्येकयास्वरेणवर्णेनचयाहीनंतथेहीनंक्रिययापियच्छ । तथातिरिक्तं ममतत्समग्वंतनस्तवाग्नेपरिपूर्णमेतत इति बृहत्पराशरोक्तेनश्लोकेनचान्वाधानाग्निप्रकाशकेमंत्रैरग्नेः प्रसादनं । ॐ त्र्यायुषमिति चतुर्भिर्मंत्रैर्भस्मनात्रिपुंड्रधारणं । अथब्रह्मयज्ञः ॥ तत्रासनोपरिन्यस्तेषुप्राग्ग्रेषुत्रिषुदर्भेषु वामाघ्रिमुत्तमं कृत्वाप्राङ्मुखउदङ्मुखोवाग्नेर्ज

ध्वनध्यायोब्रह्मसत्रं हितत्स्मृतमिति मनुस्मृतेः। नित्यश्चब्रह्मयज्ञः। अहरहः स्वाध्याय मधीयतेति श्रुते। ब्रह्मयज्ञे तुहोववानध्या
यो आत्माश्रविस्तदाएकः। देशोऽश्रविस्तदः परः। तत्रानध्यायेब्रह्मयज्ञ अल्पीयान्मनसाचकर्तव्यः सवस्वरप्रदर्शनपूर्वकंकर्तव्यः
स्वरप्रदर्शनंतु हस्तेनैवाहस्तेननेतइतिप्रातिशाख्य सूत्रात् तत्रविशेषः सोऽयंतुकरं कृत्वाऽङ्गुष्ठकोयङ्गुलिरेखितं स्वरविच्छस्वरंकुर्या
त्प्रादेशगामिनमिति। तथाहस्तेनवेदंयोधीतेस्वरवर्णार्थसंयुतं। ऋग्यजुः सामभिर्दृष्टो ब्रह्मलोकेमहीयते।हस्तीनंतुयाधीतेस्व
रवर्णविवर्जितं ऋग्यजुः सामभिर्दग्धोवियोनिंचाधिगच्छतीति। अशक्तौतुगायत्री जपमात्रं। ब्रह्मयज्ञमसि त्यर्थं गायत्र्येकांजपे
त्ततः। तेनप्रीतिंपरामगतिदेवदेवोजनार्दनइतिवचनात्। इति ब्रह्मयज्ञः। एवंब्रह्मयज्ञविधायतत्पूर्वंवानिर्णेजनानंतरं विष्णुपुराणो
क्तमपिफलातिशायायबलिदानं। तद्यथा। ततान्पेदन्नमादायभूमिभागेशुचौपुनः दद्यादर्शषभूतेभ्यःस्वेछयातुसमाहितः। ॐ
देवामनुष्याः पशवोवयांसिसिद्धाःसयक्षोरगदैत्यसंघाः। प्रेताःपिशाचास्तरवःसमस्तायेचान्नमिछंतिमयाप्रदत्तं। पिपीलिका
कीटपतंगकाद्या बुभुक्षिताः कर्मनिबंधबंधाःप्रयांतुतेतृप्तिमिदंमयान्नं तेष्वोविसृष्टंसकलंविनोभवंतु। येषांनमातानपितान
बंधुर्नचान्नमिछिहनंतथान्नमस्ति तत्तृप्तयेन्नंभुविदत्तमेतत्प्रयांतुतृप्तिंमुदिताभवंतु। भूतानिसर्वाणितथान्नमेतद्दत्तंविष्णु
र्नियतोन्यदस्ति। तस्मादिहंभूतनिकायभूतमन्नंप्रयछामिभवायतेषां। चतुर्दशभूतगणोयएषतत्रस्थितायेऽखिलभूतसंघाः।
तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेसुदिताभवंतु॥ इत्यक्त्वार्यनरोदद्याद्दन्नेभ्रहासमन्वितः सर्वभूतोपकारायगृहीत्वासर्वा
न्नंयोयतः। श्वचांडालविहंगानांभुविदद्यात्ततोनरइतिएतैःपंचभिरपिश्लोकैरेकएवबलिर्दद्यात्याचारप्रदीपाचारदर्शाचारचिंता
मण्यादयः। इदंचबलिदानंपौराणत्वात्सर्वशाखासाधारणं। अथगोग्रासः। सौरमंत्रः सर्वहिताः पवित्राः पुण्यरायः। प्रतिगृह्णं
तुमेग्रासंगावस्त्रैलोक्यमातरइतिब्रह्मपुराणोक्तेनपंचभूतेशिवपुण्येपवित्रेसूर्यसंभवे। प्रतिछेमंमयादत्तंसौरम्मोयिनमाप्नुतं

इतिनंदिपुराणोक्तेनवामंत्रेणगवेदद्यात्। इदंगोभ्यः ॐ ऐंद्रवारुणवायव्याग्नेयवैष्णवैर्नैर्ऋतास्तथा॥ वायसाप्रतिगृह्णंतुभूमौ
पिंडंमयार्पितं मितिमंत्रेणवायसेभ्योग्रहहविर्बलिदानं। इदंवायसेभ्यः ॐ श्वानौद्वौश्यामशबलौवैवस्वतकुलोद्भवौ। ताभ्यांपि
ंडंप्रयछामिस्यातामेतावहिंसकाविति श्वभ्योबलिदानं। इदंश्वाभ्यः देवेभ्यस्कृतादन्नाछेषाद्भूतबलिहरेत्। अन्नंभूमौश्वचांडा
लवायसेभ्यश्चनिक्षिपेदितियाज्ञवल्क्येनश्वादिबलिनोपृथग्निर्देशाद्भूतयज्ञबहिर्भावः। ततोगृहमागत्याचम्ययतिब्रह्मचारि
णोरुपस्थितौवेश्वदेवादन्नादुद्धृत्याभिधार्यषोडशग्रासपरिमितमन्नंस्वस्तीतिवाचयित्वाउद्धकपूर्वकंइदमन्नंमनुष्याय हंत
तइतिप्राजापत्यनीर्थेनब्राह्मणायदत्वा पुनर्जलंदद्यात्ततोयथार्हं भिक्षुकानतिथींश्चसंभजेरन्निति। यथार्हमितिउपकुर्वी
त्यब्रह्मचारिणः अक्षारालवणादियतेनक्रमधाहि। अतिथीनभ्यागतान्मे भजेरन्निति बहुवचनमेकवचनस्यार्थे। स्वागतानं
न्नदानादिनातर्पयेदित्यर्थः ततोबालज्येष्ठगृत्याश्रयथार्हमश्नीयुः। बालमनुपनीताः। ज्येष्ठाःस्त्रीविराःगृत्याःस्ववासिनोगर्भिण्या
तुरकन्यकाभृत्यादयः। हिताभिरुचिताद्यश्नीयुः पश्चाद्गृहपतिःपत्नीचाश्नीयात्। दंपत्योःपरस्परमनियमेप्राप्ते पत्न्याः पूर्वंगृ
हपतिरश्नीयात्। कुतःतस्माडस्वाहिंसंगृहपतिःपूर्वोऽतिथीभ्योऽश्नीयादितिश्रुतेः। तस्मात्स्वादन्नात्। उपवार्यं। यद्यहिंसं
अभिरुचितंतद्गृहपतिरश्नीयात्कस्य अतिथिभ्य आशितेभ्य अनंतरंपूर्वंश्चपत्न्याइति इतिगृह्याग्निमत्कर्मैकगृह्योक्तेषु
श्वेदेवप्रयोगः अथनिरग्निकर्मैकपृष्टोदिविधिर्धानाक्तेश्वेदेवप्रयोगः गृहस्वामिनोमरणादेकादशाहेगृहज्येष्ठस्यपंचमहाय
ज्ञाधिकारःसिद्धस्तत्साधनीभूतोगृह्याग्निश्चयस्यनास्तितस्येदंप्रकारांतरमुच्यते। एकादशाहेपंचभ्रसंस्कारान्कृत्वा अन्वग्नि
त्यस्यपुरोधाऋषिःत्रिष्टुप्छंदोऽग्निर्देवताअग्न्याहरणेविनियोगः। ॐ अन्वग्निरुषसामित्यादिनाआवर्तयेत्यंतेनाग्नामाहरेत्ने
राहरणंनिधगृहादाहृतश्चेद्भोनिधायप्रज्वाल्यतत्तोपिहीनयस्थानेप्रज्वाल्यततोगृह्योक्तवृषोत्सर्गादीनिकृत्वाऋषिःत्रिष्टुप्

छंदोऽग्निर्देवताऽग्निनिधाने विनियोगः ॐ इष्टोदित्यनयासंस्कृते देशे प्रतिष्ठापनासमिधमितिद्वयोः प्रजापतिर्ऋषिः उष्णिगु
परिष्टाद्बृहत्यौ छंदसी अग्नित्योरग्नावग्निर्देवते आग्न्युपस्थाने विनियोगः ॐ समिधमठं सकल्पेथांसंवामनाठं सीतिहाभ्यामुपस्था
ने। महाव्याहृतिनांप्रजापतिर्ऋषिः यजुः अग्निवायुसूर्यादेवताः ताठं सवितुरित्यस्याः कण्वऋषिस्त्रिष्टुप्छंदः सवि
तादेवता। तत्सवितुरित्यस्याविश्वामित्रऋषिः गायत्रीछंदः सवितादेवताविश्वानिदेवसवितरित्यस्याः श्यावाश्वऋषिगाय
त्रीछंदः सवितादेवता अग्निप्रज्वालने विनियोगः। ॐ भूर्भुवःस्वरितितिसृभिर्व्याहृतिभिः ताठं सवितुस्तत्सवितु
र्विश्वानिदेवसवितर्दुरितेतितिसृभिर्ऋग्भिरग्निश्चप्रज्वालनं। पुनस्त्वेतिप्रजापतिर्ऋषिस्त्रिष्टुप्छंदोऽग्निर्देवताग्निसमिधनेविनियोगः
ॐ पुनस्त्वेत्यनयासमिधनं। प्रज्वलितस्यापिसुनरिंधनं प्रक्षेपेणप्रदीप्तकरणंसमिंधनं। अथतस्मिन्नग्नौसायंप्रातर्होमस्तंत्रेण
धारितश्चेत्प्रातर्होमुमात्रं। ततस्तस्मिन्नग्नावान्वहिकपाकश्चपरा। अन्नमुद्धृत्याभिघारणंपंचमहायज्ञाश्चतत्रवैश्वदेव
विशेषः अनुमतयेस्वाहेत्यनंतरं ॐ विश्वेभ्योदेवेभ्यःस्वाहा इदंविश्वेभ्योदेवेभ्यः ॐ अग्नयेस्विष्टकृतेस्वाहा। इदमग्नयेस्वि
ष्टकृतइत्याहुतिद्वयमधिकंहोतव्यं। ततःपूर्ववद्बलिकर्म। तत्रोदकुंभसमीपेपर्जन्यादिभ्योदाने। इहमणिकाभावादितिवि
शेषः। अन्यत्सर्वंपूर्ववत्। अतऊर्ध्वमनेनैवविधिनायावर्ज्जावंवर्त्तनीये॥ अन्यतुऔपासनवत्तस्याग्नेर्यावर्ज्जावंधारणक
र्त्तव्यमित्याहुः। शांतेचाग्नेरनेनैवविधिनाग्न्याहरणमिति। अस्मिन्नग्नौपिंडपितृयज्ञयज्ञोद्वाह्यायणादिकर्त्तव्यं। श्रवणाक
र्मादितुनकर्त्तव्यं। तस्मिन्नग्नौएकादशाहश्राद्धोर्ध्वदैहिकंकर्मकर्त्तव्यं। यस्कसर्पंडीकरणंतानिमेतश्राद्धानियानिवै। ४३
तानिस्युर्लौकिकेवन्हावितिशाट्यायनोब्रवीदितिवाक्यैलौकिकाग्निशब्दःसग्रामाग्निपरोनपुनःपारिप्राधिकोलौकिकाग्नि
परअग्निमतःप्रवासेपाकश्रयणेविशेषः। अन्वग्निरितिपूर्वमग्न्याहरणं। इषोदित्यनयासंस्कृतदे







श्वदेववत् इतिस्मृत्यक्तोवैश्वदेवः अंगिरः। शालाग्नौ तुपचेदन्नंलौकिकेवापिनित्यशः। यस्मिन्नग्नौ पचेदन्नेतस्मिन्होमो विधीयतइति। यदर्थमुद्धृतोत्यग्निकृतश्चार्थोयथाविधि। कृतकर्मा। पवृत्तस्कृतोग्निर्लौकिकेस्मृतइतिवचनात्पारिभाषिकएवात्रलौकिकोनपुनर्ग्रामाग्निः। अपवृत्तकर्मा लौकिकेर्थसंयोगादिति कात्यायनेननतस्मिन्नेवाग्नौ लौकिकेशब्दप्रयोगात्। अन्यत्रतुग्रामाग्निनाचेदिति। तूष्णीग्रामाग्निनेवरमिति। अन्वग्निरितिग्रामादग्निमादत्तेतिगार्हपत्येनुगतोग्रामाग्निमादत्तेत्यौदीग्रामाग्निपदप्रयोगाच्च। आचारादर्शोग्निरनपारिजातेचशातातपः। वैदिकेलौकिकेवापिहुतोहिष्टेज्ञलेक्षितौ। आदत्तेत्यौन्नज्यंजहूयात्संचस्रूनापनुत्तयइति वैदिकेआवसथ्येग्नौतदभावेहुतोहिष्टे अन्येनान्यहोमंकृत्वात्यक्ते। तदभावेलौकिकेग्रामाग्नौ। लौकिकाग्नोयात्रांतरकरणमाहरणं। गृत्यग्निस्त्वान्युद्धोधनमाहरणं। उन्मार्जनंभस्मापाकरणं। मनुः। पंचसूनागृहस्थस्यचुल्लीपेषण्युपस्कराः। कंडनीचोदकुंभश्चबर्ह्यतेयास्तकायन॥तासांक्रमेणसर्वासांनिष्कृत्यर्थंमहर्षिभिः। पंचक्लृप्तामहायज्ञाप्रत्यहंगृहमेधिनामिति। कीटादीनांध्वंसापणेनचुल्लीपेषणेनपतितप्राणिवधादीनांपेषणी। क्षेपणादीनामार्जनी। अवहननंकंडणी। सकीटजलाहरणेनोदकुंभः। एतेपंचगृहस्थस्यसूनाः। सूनामाणिवधस्थानंतत्सदृशः। वधजन्यदोषहेतुत्वात्। अतएवैतान्वाहयन्व्यापारयन्सूनादोषैःसबध्यतइत्यर्थउपस्करः संमार्जनीभांडकुंडादिर्गृहोपस्करणमित्येके। तासामित्यादिनाएतत्पापक्षयार्थंपंचमहायज्ञाइत्यर्थः। तथासएव। पंचैतान्योमहायज्ञान्नहापयतिशक्तितः। सगृहेपिवसन्नित्यंसूनादोषैर्नलिप्यतइति। एतच्चार्थवादमात्रं। ततः पंचमहायज्ञान्कुर्यादहरहर्द्विजइतिस्मंतुवाक्येअहरहर्नूतेभ्योबलिहरणंदितिशतपथश्रुतेर्वाहरहरितिद्वीप्सयातेषांनित्यत्वावगमात्। शंखोपि। पंचयज्ञविधानंचगृहीनित्यंनहापयेदिति। अयज्ञोमचक्षतइतिव्यासवाक्यादपिफलंएवंचस्वर्गापवर्गयोःसिद्धिंपाकयज्ञोमचक्षतइतिव्यासवाक्यादपिफलार्थतावबोध्यं॥म

त्येकमपि फलमाह हारीतः। यद्देवेभ्योऽऊह्यते देवलोकंतेनाभिजयति पितृभ्यः पितृलोकंतेन। यत्स्वाध्यायमधीते ऋषीलोकंतेनायद्भूतेभ्यो बलिंहरति भूतलोकंतेनेति। एतेनपुरुषार्थत्वमुक्तं भवतिवैश्वदेवस्य। मनुरपिपुरुषार्थत्वमेवाह। वैश्वदेवेतु निर्वृत्तयज्ञन्यातिथिराव्रजेत्। तस्माअन्नंधौर्यैशक्तिप्रदद्यान्नबलिंहरेदिति। वैश्वदेवानंतरमतिथिपूजायांकृतायांद्वितीया ऽतिथिर्यद्यागच्छति अन्नंचपक्वंनास्तितदापुनःपाकंकृत्वातस्मैप्रदद्यान्नबलिंहरेद्वैश्वदेवंनकुर्यादित्यर्थः। यद्यन्नसंस्कारार्थत्वंवैश्वदेवस्यस्यान्तदापुनःकरणनिषेधानयुज्यतइतिमिताक्षरायामप्येवं। अतश्चपाकसंस्कारार्थत्वंनिरस्तं। पाकसंस्कारार्थत्वेतुपाकभावेवैश्वदेवाभावप्रसंगात्कंचिदुपयोगमाश्रित्यैवान्नेनदीपते। अभोज्यंतद्वैदग्धंभुक्तवत्पर्वसदहरितिमिताक्षरायांलिखितंतत्तुवैश्वदेवाभावेऽन्नस्याभोज्यत्वाभिधानादत्रसंस्कारार्थतापिपतीयते। तेनवैश्वदेवस्याग्न्यर्थत्वंस्विष्टकृद्धोमैकस्यैवगुणकर्मत्वंप्रधानकर्मत्वंवाशक्तिभेदेनविकल्पइत्याहुः। तेनाद्यार्थेविहितस्यैवपाकस्यवैश्वदेवविधिनियोगः। वैश्वदेवादन्नात्पर्युक्ष्यस्वाहाकारेऽऊह्यादिति। वैश्वदेवादित्यन्नंव्यपदिश्यतेविश्वेदेवादेवताकबलिसंबंधात्। यद्यपिदेवतांतरमप्युक्तमस्तितथाप्येकदेशेनव्यवहारः। अतएवहोमेप्यस्मिन्वैश्वदेवपदं। अग्निर्धन्वेतीर्विश्वेदेवाऋजापतिःस्विष्टकृदितिगौतमादिकल्पेहोमेवविश्वेदेवसंबंधात्। वैश्वदेवस्याग्नौऊह्यहोत्यग्नयेस्वाहेतिसूत्रेतुपुरोडाशकपालेनतिवहेद्वैश्वदेवार्हस्यैवपाकस्यविनियोगोत्तरमिति। कृतेवैश्वदेवेऽन्नोपघातमतिपुनःपाकस्कृलोकिकाग्नावेवनगृह्ये। तदाहपराशरोबोधायनः। अन्वादितेनपाकेनकृतेनोऽरणेनवा। लौकिकेऽग्निःसविज्ञेयःपुनराधानमर्हतीति। प्रदनपाणिजाते श्लोककात्यायनः॥ उऽहृत्यहविरासिच्यहविष्येणघृतादिना। स्वशाखाविधिनाहुत्वातलेषेणबलिंहरेदिति। हविष्येणघृतादीनाऽऽहृतेहविरासिच्यतेनहविषाऽऽहुयादित्यर्थः घृताभावेदध्याद्यक्तेहविर्ऽऽहुयात्। तथाचव्यासः। ऽऽहुयात्सर्पिषाप्यु

क्तेतैलक्षारविवर्जितं। दध्यक्तंपयसाप्यक्तंतदभावेऽभसापिवेति। हविष्याभावेचतुर्विंशतिमतेविशेषादर्शितः। अलाभेयेन केनापिफलशाकोदकादिभिः। पयोदधिघृतैःकुर्याद्वैश्वदेवंस्कवेणतु। हस्तेनान्नादिभिःकुर्यादद्भिरंजलिनाजलइति। अत्रापरो विशेषःपरिशिष्टे। शाकंवायदिवापत्रंमूलंवायदिवाफलं। संकल्पयेद्यदाहारेतेनाग्नौऽऽहुयादपीति। पयःप्रभृतिद्रव्याणांहोमःस्कवेणेत्यक्तं। चर्वादिकदिनद्रव्याणांतुविशेषोभिहितःपरिशिष्टे। नुतान्नेनतुहस्तेनअंगुष्ठाग्रेणपीडितं। सेहतांगुलिपाणिस्कवाग्यतोऽऽहुयाद्धविरितिहविष्यश्चेषुमुख्यद्रव्यमाहकात्यायनः हविष्यंयवामुख्यास्तदनुव्रीहयःस्मृताः। माषकोद्रवगोधूमान्सर्वालाभेपिवर्जयेदिति। गोधूमःगोरसर्षपः। आदिशब्देनकोद्रवचणकमाषमसूरकुलत्यचीनकवर्जमितिशंखलिखितोक्तंपरिगृह्यते। आपस्तंबः। नक्षारलवणीहोमोविद्यतेतथापरान्नसंसृष्टस्यचाहविष्यस्यचहोमऽउदीचीनमुष्णं भस्मापोद्यतस्मिन् ऽऽहुयात्तऽहुतमहुतंचाग्नौ भवतीति। क्षारलवणपरान्न संसृष्टेनहविषेणाग्नौ होमोन कार्यः। अपि तूष्णांभस्माग्न्यायतादुत्तरतोऽपोत्यतस्मिन्होतव्यं। उष्णाभस्मेत्यंगारमिश्रितंभस्मेत्यर्थः। अतएवबोधायनः। अंगारान्भस्ममिश्रांस्तऽउद्धृत्योत्तरतोनलात्। ऽऽहुयाद्वैश्वदेवंतुयादृक्षारादीनाशिरहीनतथापरे। परोक्षमन्नमसंस्कृतमग्नावधिश्रित्याद्भिःप्रोक्षेत्तदेवपवित्रंमित्याचक्षतइति। अधिश्रयणंपुनराग्नेरुपरीत्यर्थेनमात्रमन्नसहितस्यैवैश्वदेवपात्रस्य। अधिश्रित्यसंस्कृतंकृत्वाप्रोक्षेदित्यन्वयः। एतेपंचमहायज्ञा अन्वहंसकृदेवकर्तव्याः। अहरहर्भूतेभ्योबलिंऽहरेदित्यादिकरणंयपापएवंविद्वानहरहःस्वाध्यायमधीतेतस्मात्स्वाध्यायोध्येतव्यइत्यंतयाश्रुत्या अथातःपंचमहायज्ञाइत्यादिनाभगवतापारस्करार्चार्येणचसायंप्रातःशब्दानुपादानेनैवान्वहंपंचमहायज्ञविधानात्। औपासनस्यपरिचरणमस्तमितानुदितयोरितिवह्निशेषानभिधानाच्चयदिहिभगवतःपारस्करार्चार्यस्यसायंप्रातःपंचमहायज्ञानुष्ठानमभिप्रेतंस्यात्तर्हि अथातःसायंप्रातःपंचमहायज्ञा

इत्येवमसूत्रं पणीतस्यात्तत्तस्मात्स्वगृह्योक्तेन वाजसनेयिभिरन्वहं सर्वदैवैते कर्त्तव्याः अग्नयेस्वाहा धर्मायस्वाहेत्यादि षडाहुतिर्जुहोति एषवैश्वदेवः संतिष्ठतेनमाकृद्रायपशुपतयइत्यादिभिर्बलिहरणमित्येतत्संतिष्ठते देवेभ्यःस्वाहेत्याग्नेयजुहो त्येषदेवयज्ञःसंतिष्ठतेपितृन्वुद्दिश्यैकं ब्राह्मणं भोजयेदग्नौकरणादक्षिणेनाग्निं दक्षिणाग्रान्दर्भान्संस्तीर्य तेषुपिंडं ददातिपितृभ्यः स्वधास्त्विति एषवाऽपस्तम्बियपितृयज्ञः संतिष्ठतउत्तरेणाग्निं [illegible] देशे प्रागग्रान्दर्भानसंस्तीर्य गंधपुष्पधूपदीपैरलंकृत्य बलिंमुप हरतिभूतेभ्योनमइतितद्भूतयज्ञः संतिष्ठते मनुष्ययज्ञार्थं [illegible] मायदपि वाहुतं कांस्यब्राह्मणेभ्यो दद्यादिति मनुष्ययज्ञः संतिष्ठतइतिमदनपारिजातेबौधायनसूत्रेवैश्वदेवबलिहरणानंतरमानदत्वादेवयज्ञार्थमुद्धृत्यान्याहुतिं जुहोत्येकामाहुतिं मग्नेऊर्ङ्नयुः। पितृयज्ञार्थमपिवैश्वदेवबलिहरणशिष्टादन्नात्प्राचीनावीतिनोदक्षिणाग्नेः पितृतीर्थेनपितृभ्यः स्वधास्त्विति बलिहरेयुः। भूतयज्ञार्थंवैश्वदेवशिष्टान्नादेवोत्तरतोग्नेर्दैवतीर्थेनबलिमुपहरेयुर्भूतेभ्योनमइति मनुष्ययज्ञार्थमतिथिं भोजये दितिश्राद्धाभावेसंकल्पितंदद्युरितिमदनपारिजातेआपस्तंबपरिशिष्टब्रह्मयज्ञव्यतिरिक्तेभ्योमहायज्ञेभ्योवैश्वदेवबलिहरण योःपृथग्विधानाद्बौधायनापस्तंबादीनामपिमहायज्ञाःदिवेवभवंतिनरात्रौवैश्वदेवबलिहरणमुसायंप्रातर्भवतःयथाहमदन पारिजातेजमदग्निः वैश्वदेवंतथारात्रौकुर्याद्बलिहरणंतथा।महतांपंचयज्ञोक्तदिवेवेत्याहधर्मविदिति। अस्माकंवाजसनेयि नांतुगृह्यपरिस्कारान्वीर्यमहायज्ञेभ्योवैश्वदेवबलिहरणयोः पृथक्कल्पनानुक्त्वादाद्येश्वत्तुर्भिर्यज्ञैरनुष्ठितैरेववैश्वदेवबलिहरण योःसिद्धिरवगम्यते। मदनपारिजातेवह्वृचगृह्येपि। देवपितृमनुष्यब्रह्मयज्ञाःपंचमहायज्ञाआद्याश्चत्वारएववैश्वदेविकंबलि कर्मचेत्याहुरितितेनमहायज्ञैर्वैश्वदेवकर्मणोरैक्यादाश्वलायनैरपांवैश्वदेवाख्यकर्मदिवेवभवतिनरात्रौ। अतएवाक्तंयज्ञपा र्श्वेकात्यायनेन। अग्निमानग्निमान्कुर्यादिमांस्तप्रत्यहंसकृत्। अन्यथा प्रत्यवायिस्याद्रौरवं नरकंव्रजेदिति स्मृतिरत्नावल्यां

त्ये

हीरहरभाष्येचवचनोत्तरमुदाहृतं। नहेतत्तंनहोमंचनस्वाध्यायंनतर्पणं। नैकःश्राद्धमेकुर्यात्समानेहनिकुत्रचिदिति मनुष्ययज्ञः होमोवैश्वदेवः। स्वाध्यायोब्रह्मयज्ञः तर्पणंपितृयज्ञः।यत्तुमदनपारिजातेधर्मविन्नाचरेत्स्नानमान्हिकंतुपुनःपुनः तर्पणंब्र ह्मयज्ञंचैवैश्वदेवंचनाचरेदितिविष्णुपुराणवचनमुदाहृत्यैवैश्वदेवाख्यकर्मदिवाहिस्तथारात्रावपिहिनकर्त्तव्यमित्युक्तं तच्चस्मार्शाशवायांसायंप्रातर्वैश्वदेवउक्तस्तद्धि षयं तर्पणं नित्यतर्पणंनपुनः पितृयज्ञः।यत्तुखंडदोषपरिशिष्टेकात्यायनेनास्मा यंप्रातर्वैश्वदेवःकर्त्तव्योबलिकर्मचेत्यपरवचसोवाजसनेयिशाखासाधारण्यं। अग्निमाननग्निमान्कुर्यादितिपूर्वोक्तयज्ञपार्श्व परिशिष्टस्यकात्यायनवचनेनैवप्रत्यहंसकृत्त्वंचमहायज्ञविधानेनसाधारण्यस्यवक्तुमशक्यत्वात्। नचखंडदोषयज्ञपार्श्वप रिशिष्टस्ययोःकात्यायनवाक्ययोरेकवाक्यतासेभवति।प्रत्यहंसकृत्करणप्रत्यहंसायंप्रातःकरणयोर्भिन्नोविरोधात्किंच। अकरणविहिताहिपरीतकरणंचेत्कथमप्यन्यथाशब्दाभिधेयं अतश्चसायंप्रातर्वैश्वदेवकरणेविहितपरीत्यकरणात् प्रत्यवायीस्यादित्यर्थकादन्यथाप्रत्यवायीस्यादित्यक्षरा[illegible]चमहायज्ञानृतेःप्रतिषेधावगम्यते।तस्मात्साधूक्तंवाज सनेयिभिःप्रत्यहंसकृदेवपंचमहायज्ञाःकर्त्तव्याइतियदेवंतर्हिश्रुतिस्मृतिविहितंसायंकालिनंद्वितीयंभोजनंकथंसिध्येत्। स्वात्मार्थपाकनिषेधादितिचेत्। सत्यंब्राह्मणादिभ्यो[illegible]दानार्थत्वेनपाकस्यस्वात्मार्थत्वाभावान्निषेधःप्रवर्त्तते। सायंकालिनपुनर्भोजनपाकस्तूलौकिकाग्नावेवनगृह्ये। अचादितेनपाकेनकृतेनोद्धरणेनवा।लौकिकोग्निःसविज्ञेयःपुनरा धानमर्हतीतिबौधायनवचनात्।यत्तुसायंप्रातर्वैश्वदेवःकर्त्तव्यइतिछंदोगपरिशिष्टमुदाहृत्याचारादर्शकृताउक्तं।सायमि तिपुनःपाकेसतितथाचविष्णुपुराणं।पुनःपाकमुपादायसायमप्यवनीपते।वैश्वदेवनिमित्तंतुपत्न्यासार्द्धंबलिहरेत्॥त त्रापिश्वपचादिभ्यस्तेयान्नापवर्जनमितिमनुरपि। सायंतन्नस्यसिद्धस्यपत्न्यर्धंचबलिंहरेदिति।तेनपुनःपाकाभावेन

सायं वैश्वदेव इति ॥ तदयुक्तं । अनश्ननापि सततमन्यथा किल्विषी भवेदिति नित्यतया श्रवणाविरोधात् । पुनः पाकमुपादाये
त्यनुवादः । वैश्वदेवस्यार्थत्वेनार्थप्राप्तत्वात्तस्यानङ्गपुनः पाकोपादानाभावे सति वैश्वदेवः सिध्यति । तस्मात्सातत्येन सायमपि
छंदोगादीनां नित्यो वैश्वदेव इति दिक् ॥ इति वैश्वदेवोपयोगी निर्णयः । नित्यपित्रे प्रसक्तानुप्रसक्तं अधुना प्रकृतोपयोगीजीवत्पि
तृकस्य संस्कर्तुर्नांदिश्राद्धदेवता निर्णयः प्रस्तूयते । तत्र कात्यायनः । वृद्धौ तिथ्यवसंन्यस्तेनांतेचपतितेसति । येऽप्यनुपनिषादयो
नेष्वादृत्वास्वयंस्मृत इति । सन्यस्तो जीवतीत्यर्थः । अथवृद्धौ । तिथ्यवसंन्यस्तेनेत्यनेन निमित्तसमावेशे वाक्यभेदाद्दर्शनंवर्दीतिवृद्धौ
थादिपदेजीवत्पित्रधिकारिकं श्राद्धमात्रं लक्ष्यते । छंदोगपरिशिष्टेऽप्येतत्कात्यायनोपि । पितुः पित्र्यो वादद्यात्सपितेत्यपराकृतिर्गौतं
यत्तुमेतेभ्यो ददातीत्यपक्रम्यनजीवंतमतिदर्शनंतिक्रांतातिरिक्तेकात्यायनसूत्रंतत्पितृयज्ञादिविषयं । वक्ष्यतेपरिशिष्टेतु ।
नांदीश्राद्धप्रकृत्योक्तं । महत्कर्मपूर्वेद्युस्तदहरल्पेषुतदिदं मेके मातृणांपृथक्कुर्वंत्यथपितृणामथमातामहानामितिचित्रतयामि
तितस्मात्जीवत्पितासंस्कारेषुमातृमातामहयोः कुर्यात्तस्यांजीवत्यांमातामहस्यैवकुर्यादिति । महत्कर्मोपनयनादिषु । अ
ल्पेषुपुंसवनादिषुपृथग्दिनभेदेनपूर्वाह्णादिकालभेदेनवाचितयं श्राद्धत्रयंभिन्नप्रयोगमित्याशयः । तथाचगार्ग्यः । मातृश्राद्धं
तुपूर्वेद्युः कर्माहनितुपैतृकं । मातामहंचोत्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृतमिति । तथाशातातपः पूर्वाह्णेमातृकंश्राद्धमध्याह्नेपैतृकंत
था । ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतमिति । एकेइछंतीतिपरिशिष्टोक्तयासहप्रयोगः स्वाभिमतत्वेनसूचितः । उक्तध्वानु
कल्पत्वेनकृच्छ्रमनुना । अलोभेभिन्नकालानांनांदीश्राद्धत्रयंवृद्धौ । पूर्वेद्युर्वैमातृकुर्वीतपूर्वाह्णेमातृपूर्वकमिति । एवंजीवत्पितृकंप्र
त्यपतीत्यर्थइवश्राद्धत्रयप्राप्तौविषयविशेषेऽपवादार्थमुच्यते । तस्मादिति । तत्रपार्वणद्वयेनेवनांदीश्राद्धफलसिद्धिरित्याशयः ।
एवंजीवन्मातृपितृकस्यमातामहश्राद्धेनेवतत्सिद्धिरित्याशयेनोक्तंतस्यामित्यादि । एतच्चोपलक्षणार्थं । जीवत्पितृमातामहस्यमा

तृपार्वणेनैवतन्नसिद्धिरित्यपिवेध्यं । यद्गार्ग्योजीवतितत्पार्वणातिरिक्तपार्वणानुष्ठानेननांदीश्राद्धफलसिद्धिरित्यत्रतात्पर्य्यस्यना
क्यभेदभयेनतस्मादित्यादिग्रंथेस्वीकर्तुमुचितत्वात् । एवंचसतिमृतपितृकजीवन्मातामहस्यपितृपार्वणमात्रेणनांदीश्रा
द्धसिद्धेः साधकतयासकलदाक्षिणात्यस्वीकृतेनपितृवर्गोमातृवर्गेतथामातामहस्यच । जीवंतुयदावर्गीयस्तंवर्गंतुपरित्यजेदि
तिशाखांत्रेणसंवादलाभात् । एवंचसतिये प्यएवपितादद्यात्इतिशाखांत्रेणपितुःपितृपार्वणंपरिशिष्टबलेनचस्वमातृश्राद्धिपार्वणंस
मुच्चयेन कार्यमिति अत्यंतानुचितं । तस्मांजीवत्यांमातामहस्यैवं कुर्यादितिपाराशर्यजातायनेकग्रंथसंमतपौंढवकारविरोधाच्च । नचिरा
त्रिरेतिद्रव्यादितिवदर्थप्राप्तेतन्निवृत्त्यनुवादतयातत्स्वीकारेणात्रत्यवापंवर्तीतिवत्श्रौतपरिसंख्यांगिकारेणोरवयस्याप्यनाप
त्तेश्च । तंवर्गंतुपरित्यजेदितिशाखाविरोधाच्च । येप्यएवेतिशाखास्थपरिशिष्टस्यचपाराशर्यजातोक्तव्यवस्थाविरोधापत्तेश्च । तथाहि । तत्रो
क्तपरिशिष्टमुदाहृत्यतत्संवादितयासपितुः पितृकृत्येष्वधिकारोनविद्यते । नजीवंतमतिक्रम्यकिंचिदाद्यादितिश्रुतिरितिकार्तीयव
चनमुदाहृत्यपितृकृत्येषुपितामहादिसंबंधेषु नांसंवेधोस्तीत्याख्यायकेषुचिदेवनदपवादत्वेनउद्वोढपुत्रजननेपित्र्येष्वंसो
मिकेभरवे । तीर्थेब्राह्मणआयातेघंडेतेजीवतः पितरि । इत्यारभ्यायकेषुचिदेवनदपवादत्वेनउद्वोढपुत्रजननेपित्र्येष्वंसो
नत्समानार्थविष्णुस्मृतिरुदाहृता । पितरिजीवतियस्त्यक्त्वा कुर्यात्सयेषांपिताकुर्यात्तेषांकुर्यात्पितरिपितामहेचयेषांपितामह
इति । ततश्चवक्ष्यपरिशिष्टस्यकृतसंस्कारविषयत्वान्नजीवंतमतिक्रम्येत्यत्तद्विषये । मैत्रपरिशिष्टस्यतुतदतिरिक्तविषयत्वाद्येप्यएवपितादद्यादित्येतत्तद्विषयमित्येवंव्यवस्थाप्रतीयतइतिवा ॐ घ्रांवृधन्वत्योरिवसमुच्चयासंभवः । नचैमैत्रपरि
शिष्टस्यकृतसंस्कारविषयत्वमस्तीतिशंक्यं । उद्वाहशब्दस्यकर्तुर्द्वितीयविवाहपरत्वात् । नांदीश्राद्धंपिताकुर्यादाद्येपाणिग्रहे
पुनः । अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकमितिवचनात् । नचपुत्रजननमित्तिकमपिमेसंस्कारांगं । नीर्थइवतत्रापिपुरुषार्थस्ये

वविधानात्। नचजीवद्गर्गत्रयाद्यकृतसंस्कारेष्वपियेभ्यएवपितादद्यादित्यत्रतत्स्वीकारआवश्यकइति भिन्नशंक्यं। पितरिपितामहेप्रपितामहेचजीवतिनैवकुर्यादितिविध्यूकरीत्यालोपस्योधित्यप्रतीतेः। एतदपवादमप्यनंतरंवक्ष्यामः। यत्तुपरिजातोक्तव्यवस्थाद्दष्टायस्मृतिरत्नावल्यामुक्तं। वक्ष्यतेपरिशिष्टेशिस्यवक्ष्यतेविषयत्वान्नेत्रायणीयस्यतत्तुल्यविषयत्वान्नव्यवस्थांतरंकल्पनीयमिति। तन्न। आश्वलायनपरिशिष्टेकृतसंस्कारे [illegible] श्रवणात्पार्वणशिष्टोक्तेस्त्वतद्भिन्नकर्मणामेव श्रवणात्कर्मभेदेन व्यवस्थाया अत्रकल्प्यत्वात्तच्छब्दानारूढशास्त्र [illegible] ाकल्पनस्यैवान्याय्यत्वात्तद्दोलाधिकरणन्यायबाधितत्वाच्च। यत्तु पारिजाते। नजीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते [illegible] वपिताकुर्यात्तेभ्यः कुर्वीतसाग्निकः। पितामहेप्येवमेवकुर्याज्जीवति साग्निकः। साग्निकोपिनकुर्वीतजीवतिप्रपितामहइतस्मृत्यनुवचनान्नेत्रायणिपरिशिष्टोक्तविषयेषु पितृजीवत्पितृकस्यमातृश्राद्धेरेवाधिकारः। नचैरग्नेरितिश्रुतिप्रतिपादितंतदुद्वाहपुत्रजननिमित्तकनांदीश्राद्धव्यतिरिक्तनैमित्तिकश्राद्धादिविषयं। अनग्निकोपिकुर्वीतजन्मादौवृद्धिकर्मणि। येभ्यएवपितातत्याज्यानेवेदोद्दिश्यपार्वणमित्याचारप्रदर्शनरूपोदाहृतहारितवचनेनस्मृतेर्वाक्यापवादात्। साग्निस्त्वश्रौताग्निमान्स्मार्त्ताग्निमाञ्चतदितरोनिरग्निरित्यपितत्रैवोक्तं। अतश्चनिरग्निजीवत्पितृकस्यतीर्थश्राद्धात्औनाधिकारइतिसिद्धं। यत्तुतत्रैवोक्तं। येभ्यएवपितादद्यादित्यत्रये भ्यइतिपितुः पित्रादयएवपरामृश्यंतेनतुमात्रादयोमातामहादयश्चनजीवंतमतिक्रम्यकिंचिद्दद्यादित्यादिशास्त्रेणतावत्पित्र्यपार्वणमेवनिषिध्येत। तत्रैवजीवतोतिक्रमसंभवात्। प्रमीतस्वमात्रादिकेनस्वमात्रादुद्देशेन श्राद्धकरणे तदभावात्। प्रतिप्रसवार्थस्त्वेयेभ्यइति शास्त्रस्यनिषेधस्यमानविषयलोपित्यात्। किंच। येभ्यइत्यत्रवाक्ये पितुर्मात्रादिग्रहणेतत्समानार्थे विष्णुवाक्येपितरदापद्येत। तच्चेष्टंपद्यते। पितरिजीवतियः श्राद्धंकुर्यात्सयेषांपिताकुर्यात्तेषांकुर्यात्पितरिपितामहेजीवतियेषांपितामहः। पितरिपितामहेप्रपितामहे

हेचजीवतिनकुर्याद्यस्यपितासेतः स्यात्तमपित्रे पिंडंनिधायपितामहात्परंह्याद्यादद्याद्यस्यपितापितामहश्चप्रेतोस्यानांसतांभ्यांपिंडंदत्वापितामहपितामहायदद्याद्यस्यपितामहः प्रेतःस्यात्तस्मैपिंडंनिधायप्रपितामहात्परंह्याद्यादद्यात्। मातामहानामप्येवंश्राद्धंकुर्याद्धिचक्षणः। मैत्रेहनयथान्यायंशेषाणांमंत्रवर्जितमिति। अत्रचप्रभृतिमातृमातामहोपिजीवत्पितृकश्चपितुः पित्रादीनिवत्तदीयानेवमात्रादीन्मातामहादींश्चोद्दिश्यश्राद्धंकुर्यादितिचेत्प्रथमवाक्येविवक्षितोर्थः स्यात्तदाये षांपितामहः कुर्यात्तेषांकुर्यादितिसानुषंगेद्वितीयवाक्येतेनैवविवक्षापद्येत। ततश्चस्वीयानांमात्रादीनांमातामहादीनांपितृमात्रादीनांमातामहादीनांचप्रभृतीनांपरित्यागेनपितामहस्यमात्रादीन्मातामहादींश्चोद्दिश्योद्वाहपुत्रजननादौजीवत्पितृपितामहस्यश्राद्धानुष्ठानमापद्येत। तथामातामहानामप्येवमित्यतिदेशाज्जीवन्मातामहस्यस्वीयानांपैतृकाणांपैतामहानांचमात्रादीनांमातामहादीनांमनादेशेनमातामहसंबंधिनोमात्रादीन्मातामहादींश्चोद्दिश्यतदनुष्ठानंस्यादितिप्रथममेववाक्येपितुः पित्रादिपार्वणस्यैवप्रापकमितिस्वीकृत्यजीवत्पितृकस्तेनसहस्वीयानामेवमात्रादीनांमातामहादीनांचश्राद्धंकुर्यादितिस्वीकर्तुमुचितमिति। तन्न। येतायेभ्यएवंपितादद्यादीदृशार्थकानांसर्वेषांविष्णुस्मृत्यादिवाक्यानांप्रतिप्रसवत्वंतदेवघटतेयदाजीवंतमतिक्रम्येत्यादिनाजीवत्पितृकंप्रतिपितुः पित्राद्युद्देशकप [illegible] धपरत्वंभवति। नचैवंतत्प्रतिप्रसवत्वाभिमतवाक्येभिन्नस्यनादृशपार्वणप्रापकस्यनिषेधाकांक्षितस्याप्राप्तात्। त [illegible] षुपित्रादिशब्दानांसंबंधिकत्वमहिम्नाकर्तुः पित्रादीनामेवप्रतीत्यानादृशपार्वणप्राप्तेरनाशंक्यत्वात्। निषेधस्त्वप्रेताभ्योदद्यात्। प्रेतेभ्यएवनिपूणीयादितिपिंडपित्र्ययज्ञप्रकरणस्थकात्यायनाश्वलायनोक्तिभ्योजीवत्पितृकेनजीवमानेनदेयस्याद्यस्मादुरतसत्तम। तस्माज्जीवत्पितानकुर्याद्धाभ्यामेवनसंशयायइतिभविष्यपुराणवचनेनप्राप्तस्यमृतपुंद्वयमात्रोद्देशकप्रदानस्यनिषेधकतयोपपत्तेः। शक्यतेचहारितवचनस्यानग्नि

कं प्रतिमात्रादिपार्वणविषये पितृप्रतिप्रसवत्वं वक्तुमनायासेन। तस्यापि दृष्टित्वं। यौ द्वौ मैत्रायणीयप्राप्तस्यक्रमं तु वचनेननिषिध्यत्वात्। यत्तु जीवत्पितृकस्य पितामहेनापितामहप्रमात्राद्युद्देशेनश्राद्धानुष्ठानंस्यादित्युक्तं तन्नानिष्टं। पितृमात्राद्युद्देशेनैवतदुद्देशेनापिप्रमाणसिद्धस्मार्तदनुष्ठानस्यस्वीकर्तुमुचितत्वात्। यत्तु माताम[illegible]श्रवणात्तत्रैवोक्तित्यतिदेशमूलकमनिष्टापादानंनतत्तदर्थाज्ञानविजृम्भितं। अत्रहिमाताम्हानांश्राद्धे पितृपार्वणवत्कर्त्तव्यमु[illegible]ाकल्पनेदुक्तमित्यादिनिश्चयते। तुल्यमतिदेशेनचयथाविसर्जनेनातान्यगान्यतिदिश्यंतेतथाऽव्यवहितपूर्वयेयोक्तान्कमेरोकव्यादिजा[illegible]वननिमित्ताव्युत्क्रमणमरणनिमित्ताचपितृपार्वणगतादेवताव्यवस्थापि॥ अंगत्वादितिचेन्न। नचैवंमात्रादौश्राद्धे पितृपार्वणांगायनातिदिश्यते। नचविष्णुस्मृतिव्याख्यानेशेषंपिताम्हानामप्येवमितिवचसइतरेतिकर्त्तव्यतातिदेशपरतामवोक्तविधेर्देवताव्यवस्थातिदेशपरतांमन्यमानाअपिमात्रादिपार्वणातिदेशपरतांमन्यते। मन्यतेचसयेषांपिताकुर्य्याद्येषांपितामहइत्यनयोमात्रादिमाताम्हादिपार्वणगोचरतामपि। युक्तंचैतत्। येषामितियत्तच्छब्देनपितृकर्तृकश्राद्धोद्देश्यतायाःपुत्रकर्तृकश्राद्धोद्देशयत्वाव्याप्यत्वप्रतीतेः यत्तुकृतंकंतदनित्यमितिवत्। येऽप्यणवपितादद्यादितियत्तच्छब्दोपबंधेदकोरणवीप्सायामतीतेश्चायमेवधात्वर्थोनुभूयमानोभ्युपेक्ष्यते। क्षणमात्रेणनेहंतिव्याघ्रोमृगाणांयथेतिवत्। अतोयेऽप्येवंपितादद्यादितिदृशशास्त्रानुसारिण्यनुष्ठानेपितृकर्तृकश्राद्धोद्देशेपितृमातृमाताम्हाद्युद्देश्यकश्राद्धत्रयस्यकर्त्तव्यत्वान्नपुत्रेणात्मीयमात्राद्युद्देशेनश्राद्धसंभवः। नचाश्वलायनपरिशिष्टानुसारिण्यनुष्ठानेपितुः पित्राद्युद्देशेननतत्संभवइतिप्रयोगवावेदितं। अतस्तदुभयार्थंसमुच्चयोभिः साहसमाचे। अस्तुतावित्यादिनाऽपिनादद्यादित्यस्यचस्मृतंसंस्कारसमाधारणंतथाश्वलायनशासनं। भिन्नस्तत्परिशिष्टोक्तएवपक्षः संभवकर्तुमुचितोनतूक्तसमुच्चयः। बहुल्यंवास्वशक्त्योक्तं भिन्नस्मृतेः कुलपरंपरायातत्वेनयदिनश्छासिनोपिविष्णुस्मृत्युक्तमाचरंति। आचरंतुनाम। नतूक्तसमुच्चयः परंपरायातोस्ति। स्मृतिर्कोस्तु

भेष्यवं॥ ॥इतिजीवत्पितृकस्यसंस्कर्त्तृनांदीश्राद्धदेवतानिर्णय अथमृतसंस्कारेप्रवासादिनापितृकर्तृकलाभंभवनिमित्तकर्तृकंतरेप्रतिनांदीश्राद्धदेवतानिर्णयः। तत्रछंदोगपरिशिष्टेकात्यायनः। स्वपितृव्यःपितादद्यात्कृतसंस्कारकर्मसु। पिंडानोह्याहनात्तेषांतस्याभावेतुतत्क्रमादिति। ओह्याहनादित्यादुभिविधौ। तेनोह्याहेविवाहमभिव्याप्यकृतसंस्कारकर्मसुपितास्वपितृव्यःपिंडान्दद्यात्ततदुपलक्षितमाभ्युदयिकं श्राद्धं कुर्यादित्यर्थः उह्याहोह्यपूर्वाभिप्रेतः। द्वितीयेतुपितरिजीवत्यपिस्वकर्तृकत्वात्। तथाचस्मृतिः। नांदीश्राद्धे पिताकुर्यादाद्येपाणिग्रहेपुनः। अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकमिति। तस्माभावेतुतत्क्रमाहितिनस्यपितुःप्रवासादिना। भावेतुतेषांस्वकर्मकृतान्निमित्तः पितृसन्निधिनिमित्तोयोधिकारिकर्मअसंस्कृतात्संस्कार्यो भ्रात्रादिभिः पूर्वसंस्कृतेरितिशास्त्रावगतस्तेनक्रमेणतेषांपूर्वसंस्कृतानां मध्येज्येष्ठभ्रात्रादिःकुर्वन्स्वपितृव्योदद्यात्। समावर्त्तनस्यापिविवाहात्प्राचीनकृतसंस्कारत्वाज्जीवत्पितृकसमावर्त्तनेपितास्वपितृव्योदद्यात्। अजीवत्पितृकस्तुपूर्वसंस्कृतभ्रात्रादिसंभवेस्वयमेवस्वपितृव्यादीन्दद्यात्। उपनयनेनकर्माधिकारसत्वात्। विवाहेप्यवंभवद्दृष्टव्यमितिपारिजातेव्याख्यानं। अत्रचपितुर्जीवत्पितृकस्याजीवत्पितृकस्यचज्येष्ठभ्रात्रादेश्चतथाहिद्विविधस्मृतिशास्त्रांतरेश्राद्धीयदेवतात्वेनयेवगताः पित्रादयोमात्रादयोमाताम्हादयश्चतेषामेवस्वपितृव्यइतिनिर्णयः। स्वेज्यत्वस्यधर्म्यार्थत्वात् जीवत्पितृकेनस्वजनकाद्युद्देशकश्राद्धानुष्ठानस्यबाधितत्वात् अतएवसमावर्त्तनश्चतथामयि॥२॥ एकत्वेपितृदंशभूतनांदीश्राद्धेपितुस्तदभावेज्येष्ठभ्रात्रादेरप्राप्तकर्तृत्वापपादनादिनावचनस्यार्थवत्त्वमित्याशयेनैतदुपन्यासइतिवोध्यं॥ अजीवत्पितृकइतिजीवदसंनिहितपितृकस्याप्युपलक्षणं। स्वपितृव्यइतिचपूर्ववत्॥ आद्यस्येज्याजनकादयएवपरस्यपितुर्जनकादयएवनत्वाश्वलायनपरिशिष्टोक्तरीत्यापितृपार्वणत्यागेनमात्रादयः समावर्त्तनस्यात्तसंस्कारत्वेनकृतसंस्कारत्वाभावात्। हेमाद्रिणात्वस्मा

कं प्रतिमात्रादिपार्वणविषये पितृप्रतिप्रसवत्वं वक्तुमनायासेन। तस्यापि दृष्टिनी। र्थादौ मैत्रायणीयप्राप्तस्यक्रमंतुवचननिषि
धत्वात। यत्तुजीवत्पितृकं पितामहेनपितामहप्रभृत्यादुद्देशेनश्राद्धानुष्ठानंस्यादित्यक्तंतन्नानिष्टं। पितृमात्राद्युद्देशेनवतदुद्देशेना
पिप्रमाणसिद्धस्यतदनुष्ठानस्यस्वीकर्तुमुचितत्वात्। यत्तुमातामहश्रवणात्सपिण्डीकरणेत्यतिदेशमूलकमनिष्टापादानंतत्तदर्थाज्ञानवि
जृम्भितं। अत्रहिमातामहानांश्राद्धं पितृपार्वणवत्कर्त्तव्यमुक्त्वाकल्पनाप्रकरणेमातामहश्राद्धमित्यादिनाशयतेदुत्यमतिदेशनचयथाविसर्जनंनातान्य
गान्यतिदिश्यंतेतथाऽव्यवहितपूर्वमेवोक्तकर्मसंकल्पादिजातवनिमित्ताच्युत्क्रमणमरणनिमित्ताच्चपितृपार्वणगतादेवता
व्यवस्थापि॥ अंगत्वाविशेषात्। नचैवंमात्रादौश्राद्धं पितृपार्वणंमांसेनातिदिश्यत। नचविष्णुस्मृतिव्याख्यानेसोपिमातामहा
नामप्येवमितिवचसइतरेतिकर्त्तव्यतातिदेशपरतामवोक्तविधेदेवताव्यवस्थातिदेशपरतांमन्यमानाअपिमात्रादिपार्वणाति
देशपरतांमन्यते। मन्यतेचसयेषांपिताकुर्याद्येषांपितामहइत्यनयोमात्रादिमातामहादिपार्वणगोचरतामपि। युक्तंचैतत। ये
षामितियच्छब्देनपितृकर्तृकश्राद्धोद्देश्यतायाःपुत्रकर्तृकश्राद्धोद्देश्यत्वव्याप्यत्वप्रतीतेः यत्कृतंकृतदनित्यमितिवत। येष्वप
वपितादद्यादितियच्छब्दोपबंहणकारणवीप्साप्रतीतेश्चायमेवार्थोलभ्यतेनुभामसेनोक्ष्येक्षते। क्षणमात्रेण नेहंतिव्याघ्रोमृगाणांय
थेतिवत्। अतोयेष्वपवपितादद्यादुद्देशास्त्रानुसारिण्यनुष्ठानेपितृकर्तृकश्राद्धोद्देशेपितृमातृमातामहाद्युद्देश्यकश्राद्धत्रय
म्यकर्त्तव्यत्वान्नपुत्रेणात्मीयमात्राद्युद्देशेनश्राद्धसंभवः। नचाश्वलायनपरिशिष्टानुसारिण्यनुष्ठानेपितुः पित्राद्युद्देशेननत्तत्संभव
इतिप्रयोगवाक्यविरोधः। अतस्तद्दुभयार्थसमुच्चयोयुक्तः साहसमानं। अस्तुवाविष्णुस्मृतेर्येष्वपवपितादद्यादित्यस्यक्रमसंस्कारस्मा
धारण्येतयाप्याश्वलायनशास्त्रीयभिन्नतत्परिशिष्टोक्तएवपक्षःसंभवेकर्तुमुचितोनतूक्तसमुच्चयः। बहुल्यंवास्वरूप्यात्तूक्तभिन्नस्मृ
तेः कुलपरंपरायातत्वेनयदितत्रास्विनोपिविष्णुस्मृत्युक्तमाचरंति। आचरंतुनामानतूक्तसमुच्चयः परंपरायातास्ति। स्मृतिकोस्तु

भेष्यवं॥ ॥इतिजीवत्पितृकस्यसंस्कर्त्तुर्नांदीश्राद्धदेवतानिर्णय अथमृतसंस्कारे प्रवासादिनापितृकर्तृकत्वासंभ
वनिमित्तकर्तृतरेप्रतिनांदीश्राद्धदेवतानिर्णयः। तत्रछंदोगपरिशिष्टेकात्यायनः। स्वपितृभ्यःपितादद्यात्कृतसंस्कारक
र्मसु। पिंडानोह्यहनात्तेषांतस्मात्प्रेतंतुतत्क्रमादिति। ओह्यहनादित्यादुभिविधौ। तेनोह्याहंविवाहमभिव्याप्यकृतसंस्का
रकर्मसुपितास्वपितृभ्यःपिंडान्दद्यात्ततदुपलक्षितमात्मोदयिकं श्राद्धं कुर्यादित्यर्थः उह्याहोत्रपूर्वोभिप्रेतः। द्वितीयेतुपित
रिजीवत्यपिस्वकर्तृकत्वात्। तथाचस्मृतिः। नांदीश्राद्धं पिताकुर्याद्विवाहेपाणिग्रहेपुनः। अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकं
मिति। तस्मात्प्रेतंतुतत्क्रमादिति। तस्यपितुःप्रवासादिनाभावेतुतेषांतत्क्रमकृतान्निमित्तःपितृसन्निधिनिमित्तोयोधिकारिकक्रम।
असंस्कृतातुसंस्कार्योभ्रातृभिःपूर्वसंस्कृतेरितिशास्त्रावगतस्तेनक्रमेणतेषांपूर्वसंस्कृतानेमध्येज्येष्ठभ्रात्रादिःकुर्वन्स्वपि
तृभ्योदद्यात्। समावर्त्तनस्यापिविवाहात्प्राचीनकृतसंस्कारत्वाज्जीवत्पितृकसमावर्त्तनेपितास्वपितृभ्योदद्यात्। अजीवत्पितृ
कस्तुपूर्वसंस्कृतभ्रातृसंभवेस्वयमेवस्वपितृभ्यो दद्यात्। उपनयनेनकर्माधिकारसत्वात्। विवाहेप्येवमेवद्रष्टव्यमितिपारिजा
तेव्याख्यानं। अत्रचपितुर्जीवत्पितृकस्याजीवत्पितृकस्यचज्येष्ठभ्रात्रादेश्चतथाहिद्विविधस्यशास्त्रांतरेश्राद्धीयदेवतात्वेनये ज्ञ
गताःपित्रादयोमात्रादयोमातामहादयश्चतेषामेवस्वपितृभ्यइतिनिर्णयः॥ स्वेज्यत्वस्यषष्ठ्यर्थत्वात् जीवत्पितृकेनस्वजनक
द्युद्देशकश्राद्धानुष्ठानस्यबाधितत्वात् अतएवसमावर्त्तनश्चतथामयि॥२॥एकत्वेपितृदंशभूतनांदीश्राद्धेपितुस्तदभावेज्येष्ठ
भ्रात्रादेरप्राप्तकर्तृत्वप्रापणादिनावचनस्यार्थवत्वमित्याशयेनतदुपन्यासइतिवोध्यं॥ अजीवत्पितृकइतिजीवदसंनिहि
तपितृकस्याप्युपलक्षणं। स्वपितृभ्यइतिचपूर्ववत्॥ आद्यस्येज्याजनकादयएवपरस्यपितुर्जनकादयएवनत्वाश्वलायनप
रिशिष्टोक्तरीत्यापितृपार्वणत्यागेनमात्रादयःसमावर्त्तनस्यात्मसंस्कारत्वेनकृतसंस्कारत्वाभावात्। हेमाद्रिणात्वत्रा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

५१ रूढमप्राप्तविधिदर्शयितुंव्याख्यातरमकारिपित्रभावे अन्योयः कश्चित्तंसंस्कारंकुर्यात्सतत्क्रमात्तंपितरमारभ्यसं
स्कार्य्यस्यपितृणांयःक्रमस्तेनक्रमेणदद्यान्नतुस्वी ये भ्यपितृभ्यः। तस्मात्पितृव्याचार्यमातुलादयःसंस्कार्यस्योपनयादेरव
पितृभ्यःआद्धंदद्युर्नस्वपितृभ्यइत्यत्रपारमार्थिकःपक्षोविव[illegible]त्यपितृभ्यइत्यस्यानुषंगकल्पनायाअन्यायत्वा
त्पितृव्यादीनामपिपितृत्वंतस्वपितृभ्योदानाविशेषस्वपितृ[illegible]हित्यस्यानर्थक्यापत्तेः पितुःपितृव्यादिष्वेवल
क्ष्यद्योतकतुशब्दानुपपत्तेः उपनेयस्यप्रेष्यकन्यायाश्चानुस्वाधिकारित्वेनतदीयपित्रादिनाभिन्यैवोनित्यात्त्वंमहार्णवो
दाहरेतगर्भाष्टमेवर्षब्राह्मणंआत्मानमुपनयेदित्यादिवाक्येणिजंतमुपनयनशब्दाच्चकोणेपराकोदिभिरु
पणदितंचोपनयकन्ययोरेवोपनयनादौस्वाधिकारित्वमिति अयमेवमकारःपितृव्यकर्तृकविवाहोध्यः नचतत्र
मानाभावःपित्र्यभावेनामकरणेकर्त्रंतरप्रापकशेषवस्मृतौ. अन्योवाकुलवृद्धइत्यस्यानामकरणप्रकृतिसंस्कार विष
यतायांहिमात्रिणेचाकृत्वादिति अत्रापिपित्र्यभावेद्विधा मरणेनप्रवासादिनावापितरमारभ्येत्यपिइज्यत्वेनज्येष्ठलक्षण
त्वेनवा। संस्कार्य्यस्येतिषष्ठ्यानमनिरूपितसंबंधार्थासंस्कार्यंप्रतिसमावर्त्तनादौइज्यदेवताकोयोविहिनइत्यर्थः अ
तएवेज्यत्वमुपनेयादेरितिषष्ठ्यर्थ ततश्चाजीवत्पितृकस्योपनयनकुर्वन्मातुलादीस्तदीयजनकादीनुद्दिश्यैवकुर्यात्।जी
वत्पितृकस्यतुजनकस्यजनकादीनन्तुपरिशिष्टानुसारेणकेवलान्प्रभा।तानपिसंस्कार्यमात्रादीनसंस्कार्यंप्रतिस्वसं
स्कारसमावर्त्तनादौकर्तव्येतासामुक्तरीत्येज्यत्वाप्राप्तेः। अतउपनयनेसमावर्त्तनइवसंस्कार्य्यस्यैवयद्यधिकारःस्यात्त
दासंस्कार्यस्यनादौ।श्राद्धदेवताया औचित्यायातात्तातंवाद्दिश्यमातुलादीनोद्दिश्याद्धंकुर्यादितितात्पर्यार्थः स्मृतिरत्नावृ
त्त्योतुबद्धचपरिशिष्टेइत्युपन्यस्यसमावर्त्तनांतेपितादद्यान्मृतेपितरिमातापितर्यवकारयेदुभयाभावेभ्रात्रादयोपितर्ये ५१

५२ वकुर्युःसंस्कारस्ययःपितातस्यमातरःपितरोमातामहाश्चेति। अपरेसंस्कार्यस्यैवमातृप्रभृतयोभवंतीतिमन्यंते। पूर्वस्मि
न्पक्षेपितुरधिकारानुवृत्तिरुपनयनात्पूर्वंनियमेनमृतस्यापिसत्ववत् तथाचछंदोगानामुपप्रथमस्त्रेकृतामत्रविषयेतु
ब्रह्मण्यायांयजमाननामग्रहणमधिकृत्योक्तं।दीक्षितेप्रेतेमेतस्मैपूर्वपुरुषैःसहनामानिगृह्णीयुरिति अस्यायमर्थः॥
अस्योयजतइत्यादियद्यजमाननामग्रहणंमृतस्यापितस्मैवगृह्णीयात्तनेदिक्षिनःनसंनिहितस्यदीक्षितस्येत्यर्थः एव
मातापित्रभ्यःस्वइत्येणश्राद्धंकृत्वाचालकंसंस्कुर्यात्। अकरणेममप्रत्यवायःस्यादितित्थंमन्यतेयःसएवाधिकारि ननु
बालस्याधिकारःनचेत्थंशास्त्रमस्तिस्वयमात्मानंसंस्कुर्यादिति यद्गर्भाधानानंतरंपितामृतस्तदाकथमजातस्यपुंसवनादावधि
कारइत्येतद्दिचार्य्यनुष्ठेयमित्यलं एतदनुसारेणैवस्वपितृभ्यःपितादद्यादितिवचनंश्राद्धकाशिकाकृताव्याख्यातं तथाहि तस्य
पितुरभावेतेषांपितुर्मात्रादीनामभवनवानांतत्कर्माधिनकर्मणपित्रादत्तेनैवकर्मणाधिकारिज्येष्ठभ्रात्रादिरपिमृतेपितरिद्द्याद्दि
ति। नहेतद्दिमाद्र्याद्यनेकनिबंधविरोधादभियुक्तैरनादृतमित्यलंभूयसा इतिस्मृतसंस्कोरप्रवासादिनापितृकर्तृकत्वासंभवनि
मित्तककर्म्मांतरंप्रतिबुद्धिश्राद्धदेवतानिर्णय श्रीशंभाम्बरणाद्दृब्धमाधायत्दृश्यांबुजे उद्धवस्यतनूजेनकाशिपुरनिवासिना १
रचितोनंतदेवेनसर्वकर्मांगनिर्णय॥ गुरवस्तेनतुष्यंतुविद्वांसश्चतथामयि॥२॥ इतिश्रीमद्विवेदिउद्धवसूनुनाद्विवेदीश्रीदेवानुज्ञेनहि
वेदिअनंतदेवेनविरचितेश्रीरुद्रकल्पद्रुमेसर्वकर्मसाधारणांगकर्मनिरूपणंसमाप्तिमगमत्। अथसर्वकर्मसाधारणानांप्रयोगःप्रारभ्य ५२
ते॥ श्रीकृष्णायनमः ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥